NĪTISĀRA

of

Ācāryā Kāmandaki

Sanskrit Text with the Com. Jayamaṅglā
Nītisārapañcikā of Saṅkarārya,
English Trans. with Notes &
Glossary

Sujatha Reddy

2

NĪTISĀRA

of Ācāryā Kāmandaki

Sujatha Red

२
३००
रेड्डी -

RATIBHA

164667

Nītisāra of Kāmandaki has seen the light for more than ten centuries but even to-day the authorship of the text is debated. Here in this translation and in this edition of the text it is an attempt to correct its authorship. *Nītisāra* of Kāmandaki is a ancient political text. It is borrowed heavily from *Arthaśāstra* of Kauṭilya. It has State and its elements, Bureaucracy and its divisions, inter - state relations and foreign policy including the secret services. It deals elaborately about the inter-state relations and situations related to foreign policy. This text is mainly meant to teach the children of royal families.

The present edition although has followed its precursors, and the manuscripts used are mainly from Tanjore library Considering all seven manuscripts, this edition has been prepared. Authorship ,date of the text have all been discussed in the Introduction.

The entire text is flourished with the *Jayamaṅgalā* commentary by Śaṅkarāya & Eng Translation.

At the end an exhaustive glossary and bibliography has been present for the benefit of the general reader as well as the scholar of Polity.

23cm.; 700pp.; (2 vols.) ; 2018 ₹2000 (set)

Stock Verification-2024

NĪTISĀRAḤ

of Ācāryā Kāmandaki

Text with the Commentary *Jayamaṅgalā*
***Nītisārapañcikā* of Śaṅkarārya, English Trans.**
Notes and Glossary

Vol. 2

Stock Verification-2024

300,RED-N
164664

By

Sujatha Redd

पुस्तकालय
164664
गुरुकुल कांगड़ी विश्वविद्यालय

Pratibha Prakashan

Delhi-110007

R

300
रेड्डी - नी

First Edition : 2018

© Author

ISBN : 978-81-7702-425-6 (Set)
978-81-7702-427-2 (Vol. 2)

Price : 2000 (Set)

Published by :
Dr. Radhey Shyam Shukla
M.A., Ph.D.
PRATIBHA PRAKASHAN
(Oriental Publishers & Booksellers)
7259/23. Ajendra Market, Prem Nagar,
Shakti Nagar, Delhi-110007
Ph. : (O) 011-47084852, 09350884227
e-mail : pratibhabooks@ymail.com

Laser Type Setting :
S.K. Graphics, Delhi-84
Ph. 09910320500

Printed at : **S.K. Offset,** Delhi.

आचार्या कामन्दकि प्रणीतः

नीतिसारः

श्रीशङ्करार्यकृतया जयमङ्गलाख्ययानीतिसारपञ्जिकयाः
आङ्ग्लभाषानुवादः वृहद्शब्दावलीटिप्पण्यादि समेतः

द्वितीय भागः

लेखिका
डॉ० सुजाता रेड्डी

RATIBHA

प्रतिभा प्रकाशन

दिल्ली :: भारत

प्रथम संस्करण : 2018

ISBN : 978-81-7702-425-6 (सेट)
978-81-7702-427-2 (भाग-2)

© लेखक

मूल्य : 2000 (Set)

प्रकाशक :
डॉ० राधेश्याम शुक्ल
एम.ए., एम. फ़िल्., पी-एच.डी.
प्रतिभा प्रकाशन
(प्राच्यविद्या-प्रकाशक एवं पुस्तक-विक्रेता)
7259/23, अजेन्द्र मार्केट, प्रेमनगर
शक्तिनगर, दिल्ली-110007
दूरभाष : (O) 011-47084852, 09350884227
e-mail : pratibhabooks@ymail.com

यईप सेटिंग : एस० के० ग्राफिक्स
दिल्ली-84

मुद्रक : एस० के० ऑफसेट, दिल्ली

Volume -II

अथैकादश सर्गः (Canto – 11)

षोडशं प्रकरणम्

यानासनद्वैधीभावसंश्रयविकल्पप्रकरणम् (Varities of Marching, Encamping) 223

अथ द्वादश सर्गः (Canto – 12)

सप्तदशं प्रकरणम्

मन्त्रविकल्पप्रकरणम् (Varities of Policy decisions) 240

अथ त्रयोदश सर्गः (Canto – 13)

अष्टादशं प्रकरणम्

दूतप्रचारप्रकरणम् (Ambassdors and envoys) 262

एकोनविंशं प्रकरणम्

दूतचरविकल्पप्रकरणम् (Varities of spies) 272

अथ चतुर्दश सर्गः (Canto – 14)

विंशं प्रकरणम्

उत्साहप्रशंसाप्रकरणम् (In Praise of Energy and Initiative) 282

एकविंशं प्रकरणम्

प्रकृतिकर्मप्रकरणम् (Functions of the constituent element of state) 288

द्वाविंशं प्रकरणम्

प्रकृतिव्यसनप्रकरणम् (Vices of state elements) 303

अथ पञ्चदश सर्गः (Canto – 15)

त्रयोविंशं प्रकरणम्

सप्तव्यसनवर्गप्रकरणम् (Seven Varities of lapses of state) 316

अथ षोडश सर्गः (Canto – 16)

चर्तुविंशं प्रकरणम्
यात्राभियोक्तृप्रदर्शनप्रकरणम् (Circumstances suitable for Expeditions) 338

अथ सप्तदश सर्गः (Canto – 17)

पञ्चविंशं प्रकरणम्
स्कन्धावारनिवेशनप्रकरणम् (Establishment of Encampments) 363
षष्ठविंशं प्रकरणम्
निमित्तज्ञानप्रकरणम् (Nimittajnana Prakaranam) 371

अथाष्टादश सर्गः (Canto – 18)

सप्तविंशं प्रकरणम्
उपायविकल्पप्रकरणम् (Various Expidents) 378

अथ ऊनविंशः सर्गः (Canto – 19)

अष्टाविंशं प्रकरणम्
सैन्यबलाबलप्रकरणम् (Strength and weakness of the Army) 403
ऊनत्रिंशं प्रकरणम्
सेनापतिप्रचारप्रकरणम् (Qualifications of Commander-in-Chief) 414
त्रिंशं प्रकरणम्
प्रयाणव्यसनरक्षणप्रकरणम् (Remedies for lapses in Marches) 421
एकत्रिंशं प्रकरणम्
कूटयुद्धविकल्पप्रकरणम् (Deceitful tactics in Warfare) 425

अथ विंशः सर्गः (Canto – 20)

द्वात्रिंश प्रकरणम्

गजाश्वरथपत्तिकर्मप्रकरणम् (Position and Functions of Army during march) 433

त्रियस्त्रिशं प्रकरणम्

पत्त्यश्वरथगजभूमिप्रकरणम् (Convenient ways for the march of the Army) 437

चतुस्त्रिंशं प्रकरणम्

दानकल्पनाप्रकरणम् (Rewards for fighting forces) 441

पञ्चत्रिशं प्रकरणम्

व्यूहविकल्पप्रकरणम् (Varieties of Array of the Army) 444

षट्त्रिंशं प्रकरणम्

प्रकाशयुद्धप्रकरणम् (The conduct of open war) 460
Glossary 463

अथैकादशः सर्गः (Canto – 11)

षोडशं प्रकरणम्

यानासनद्वैधीभावसंश्रयविकल्पप्रकरणम्

(Varities of Marching, Encamping)

उत्कृष्टबलवीर्यस्य विजीगीषोर्जयैषिणः।
गुणानुरक्तप्रकृतेर्यात्रा यानमिति स्मृतम्।।1।।

सन्धिविग्रहौ प्रधानगुणौ सर्गद्वयेनोपदिश्येदानीमस्मिन् सर्गे यानासनद्वैधीभावसंश्रयविकल्पानाह। तत्र यानमधिकृत्याह– उत्कृष्टेत्यादि। बलं शक्तिदेशकालानां, वीर्यम् उत्साहः, तदुभयं परापेक्षयोत्कृत्यं यस्य तस्य। जयैषिणः, अन्यथा न यातव्यं, जेतुमनिच्छतो यानासम्भावात्। गुणानुरक्तप्रकृतेरिति। स्वामिगुणैः प्रकृतैरनुरक्तामात्यादिप्रकृतेरित्यर्थः। यथा ह्युक्तं "गुणातिशययुक्तो यायाद्" (कौटि० अर्थ० 6-2-99) इति।।1।।

Expedition by eminent and powerful king along with his loyal subjects, with the support of his prakritis, to obtain victory against enemy king is termed as Yana.

विगृह्य सन्धाय तथा सम्भूयाथ प्रसङ्गतः।
उपेक्षा चेति निपुणैर्यानं पञ्चविधं स्मृतम्।।2।।

तद् यानं पञ्चविधमाह–विगृह्येत्यादि।।2।।

Vigraha, Sandhya, Smabhuya prasanga and Upeksha these are the five types of Yana, according to eminent politicians.

विगृह्य याति हि यदा सर्वाञ्छत्रुगुणान् बली।
विगृह्ययानं यानज्ञास्तदाचार्याः प्रचक्षते।।3।।

तानि यथाक्रमं श्लोकाष्टकेनाह– विगृह्य यातीति। गुणशब्देनात्र द्रव्यप्रकृतयो द्रष्टव्याः, तासामप्रधानत्वात्। स्वामिप्रकृतिरेव प्रधानम्। यदा पश्चात् स्थायिनः

शत्रोः सर्वा द्रव्यप्रकृतीर्दाहविलोपादिना बलाद् विगृह्य पुरस्ताच्छत्रुं याति, तदा विगृह्ययानमित्येकः प्रकारः।।3।।

When a king marches onward for crushing his host of enemies by the absolute impression of his powers, it is called Vigrihya-yana by the Acharya's conversant with the nature of Yana's.

अरिमित्राणि सर्वाणि स्वमित्रैः सर्वतो बलात्।
विगृह्य [1]वारिगमनं विगृह्यगमनं स्मृतम्।।4।।

द्वितीयमाह– अरिमित्राणीति। अरेर्यातव्यस्य मित्राणि। सर्वाणीति पुरस्तात् पश्चाच्च यानि स्थितानि। स्वमित्रैः पुरः पृष्ठतश्च स्थितैः करणभूतैः। बलाद् विगृह्य वेति सम्बन्धः। सर्वतः उभयसंपीडनेनेत्यर्थः।।4।।

When a king supported by his own friends, arches forth for completely crushing the friends of his enemies by force, it is said to be Vigrihya-gamana.

(सन्धाय सार्धमरिभिश्चेष्टासंरोधकारिभिः।
यदन्यत्र रिपौ यानं सन्धायगमनं हि तत्।।)
सन्धायान्यत्र या यात्रा पार्ष्णिग्राहेण शत्रुणा।
सन्धायगमनं प्रोक्तं तज्जिगीषोः फलार्थिनः।।5।।

सन्धाय पार्ष्णिग्राहेण शत्रुणेति सम्बन्धः। अन्यत्र या यात्रा पार्ष्णिग्राहमित्रे यद् गमनम्। फलार्थिन इति। मा मे दीर्घयात्रां गतस्य पार्ष्णिं ग्रहीष्यतीत्येवं फलार्थिनः।।5।।

Subsequently concluding a treaty with the enemy in the rear, the Vijigisu with aspiration for victory, progresses upon another enemy, it is said to be Sandhyagamana.

एकीभूय यदेकत्र सामन्तैः सामवायिकैः।
[2]शक्तिशौचयुतैर्यानं सम्भूयगमनं हि तत्।।6।।

---

1. 'चा' मूलकोशेषु पाठः
2. 'शौर्यशक्तिगुणैर्या' क. पाठः, 'शक्तिकोशयु' ख. पाठः

एकीभूयेति। यदा न शक्यमेकेन यातुम्, अवश्यं च यातव्यं, तदा सामन्तैरेकीभूय यद् गमनं, तत् सम्भूययानम्। एकत्रेत्येकस्मिन् यातव्ये। सामवायिकैः समवायप्रयोजनैरेकमतिभिः। शक्तिशौचयुतैरिति। शक्तिमान् हि पार्ष्णिग्रहणे साहाय्यदाने च शक्तः, शुद्धश्च सिद्धौ च यथास्थितकारी भवतीत्येकः प्रकारः।।6।।

When a king, in conspiracy with Samanta as faithful, warlike and powerful, marches against a common enemy, it is called Sambhuya-gamana.

उभयारौ तु वा यानं द्वयोः प्रकृतिनाशने।
सम्भूयगमनं प्रोक्तं हनूमत्सूर्ययोरिव।।7।।

द्वितीयमाह– उभयारौ तु वेति। अरेर्विजिगीषोश्चोभयोर्यः शत्रुस्तस्मिन् द्वयोरपि सम्भूय यानम्। प्रकृतिनाशन इति उभयारिप्रकृतिविलोपादिनिमित्तम्। हनूमत्सूर्ययोरिवेति। हनूमान् किल बालावस्थायामालोहितं[1] भानुमन्तं दृष्ट्वा किमिदमिति चापलादुत्प्लुत्य[2] हस्ताभ्यां गृहीतवान्। तत्काल एव च राहुः सूर्यं ग्रसितुमाजगाम। तद्ग्रसनार्थं च तं मोचयितुं प्रयतमानं दृष्ट्वा हनूमान् किमिदमपरमिति भानुं मुक्तवा तमेवाभ्यधावत्। आदित्येनापि ज्ञातं, ममाप्ययं राहुः शत्रुः। अतोऽस्य हनूमतः साहायकं प्रतिपद्येऽहमिति[3]। सोऽपि तमभिजगामेत्येतावदत्रौपम्यकम्।।7।।

When it is, like two king's surya and Hanumat: jointly undertake an expedition against an enemy, who threatens the safety of the Prakritis of both, it is called Sambhuya Yana.

(उभयत्र तु या यात्रा द्वयोः प्रकृतिनाशने।
सम्भूययानं तत् प्रोक्तं रासमुग्रीवयोरिव।।
अल्पसारानुपादाय प्रतिज्ञाय फलोदयम्।
गम्यते यत् परान् जेतुं सम्भूयगमनं हि तत्।।)

---

[1] तमुद्गच्छन्तं भा' च. पाठः

[2] 'दुपप्लु' क. ख. ग. घ. पाठः

[3] द्ये गृहीतमि' क. ख. ग. घ. पाठः

After winning over Samanantas of little ability by the promise of reward in case of success, a king marches against his enemies, it is called Sambhuya gamana.

अन्यत्र प्रस्थितः सङ्गादन्यत्रैव[1] हि गच्छति।
प्रसङ्गयानं तत् प्रोक्तमत्र शल्यो निदर्शनम्।।8।।

अन्यत्र प्रस्थित इति। द्वयोर्यातव्ययोरेकमभीष्टमभियोक्तुं प्रस्थितो यदा पथि कुतश्चित् प्रसङ्गादितरं प्रति याति, तदास्य प्रासङ्गिकं गमनम्। यथा कुरुपाण्डवानामुद्योगे मद्रराजस्य पाण्डवमातुलस्य शल्यस्य तदनुबलाधानार्थमेकयाक्षौहिण्या सह पाण्डवार्थे प्रस्थितस्य तस्य पथि दुर्योधनेनात्मनिवेदनात्[2] पूर्वकेणोपकारेण[3] हृतचेतसस्तत्प्रसङ्गात् कुरुषु लब्धशरव्यस्य पाण्डवान् प्रति गमनं दर्शयति– अत्र शल्यो निदर्शनमिति।।8।।

When a king, originally marching against a particular enemy, afterwards through some eventuality, proceeds against another.

रिपुं[4] यातस्य बलिनः सम्प्राप्यारिकृतं फलम्।
उपेक्ष्य [5]तन्मित्रयानमुपेक्षायानमुच्यते।।9।।

रिपुं यातस्येति रिपुं प्रति यातस्य। विजिगीषोरिति शेषः। बलिन इति द्वितीयाबहुवचनम्। इदमुक्तं भवति–यं रिपुमभियोक्तुं प्रयातो विजिगीषुस्तदनुबलाधानार्थं तत्सुहृदोऽपि येऽन्ये बलिनः समायातास्तान् सम्प्राप्य यदरिणा कृतं फलं प्रत्यभियोगलक्षणं तदुपेक्ष्य तन्मित्रेषु च बलिषु सम्प्राप्तेषु यद् यानं, तदुपेक्षायानम्।।9।।

When a dominant king marching against an enemy has every chance of success, but ignoring them, he proceeds against the latter's friends, it is called Upeksha Yana.

---

[1] 'वापि ग' ख. ग. पाठः
[2] 'नात्तेपरिधानपृ' ङ. च. पाठः
[3] 'चारेणापकृष्टचे' ङ.च. पाठः
[4] 'पोः' क. पाठः
[5] 'ते हि तद्यान' क. पाठः

निवातकवचान् हित्वा हिरण्यपुरवासिनः।
उपेक्षायानमास्थाय निजघान धनञ्जयः।।10।।

तदेव दृष्टान्तेन स्फुटयन्नाह–निवातकवचानिति। शक्रः स्वर्गतमर्जुनं दिव्यास्त्राण्यधिगमय्य[1] गुरुदक्षिणापदेशेन निवातकवचनाम्नोऽसुरान् जहीत्य-भिहितवान्। सोऽपि तथेति प्रतिज्ञाय मातलिसनाथं[2] रथमारुह्य तानभियोक्तुं प्रयातः। अभियुक्तेषु तेषु तदनुबलाधानाय हिरण्यपुरवासिनः कालकञ्जनामानोऽसुरा बलीयांसः समायाताः। तान् सम्प्राप्य निवातकवचाः प्रत्यभियुयुजुः। ततस्तानुपेक्ष्य तत्सुहृद एव कालकञ्जानभियोक्तुं प्रयातस्तानभियुज्य निजघान, पश्चात् तानपीति।।10।।

Having had recourse to this Upeksha-yana, Dhananjaya slew the dwellers of the Golden city, cautiously the Nivatkavachas who had already been defeated by him.

स्त्रियोऽथ पानं मृगया तथाक्षा दैवोपघातश्च बहुप्रकारः।
इति प्रदिष्टं व्यसनं ह्यनेन समन्वितो यो व्यसनी स गम्यः।।11।।

कः पुनर्यातव्य इत्याह–स्त्रिय इत्यादि। व्यसनी यातव्यः। व्यसनं च दैवमानुषभेदेन द्विविधम्। तत्र मानुषं द्विविधं कामजं कोपजं च। तत्र स्त्रियः पानं मृगया द्यूतमिति कामजम्। वाक्पारुष्यं दण्डपारुष्यमर्थदूषणमिति कोपजमिति। तदिह 'कामात् क्रोधो हि जायत' (भ० गी० 2. 62) इति दर्शनार्थं साक्षात् कोपजं नोक्तम्। दैवोपघातश्चेति। स चाग्न्युदकदुर्भिक्षमरकादिभेदेन बहुप्रकारः। इति प्रदिष्टमिति। इतिशब्द आद्यर्थे। अनेन कोपजमप्युक्तं वेदितव्यम्।।11।।

Women, intoxicated with drinks, hunting, gambling and diverse kinds of tormentors off fate, these are called the Vyasanas, He who is under the influence of these, is called a Vyasanin. and is the right person against whom march with hostile intentions, should be directed.

परस्परस्य [3]सामर्थ्याविघातादासनं स्मृतम्।
अरेश्च विजिगीषोश्च तत् पञ्चविधमुच्यते।।12।।

---

1. 'ध्याप्य गु' च. पाठः
2. 'सारथिं र' च. पाठः
3. 'र्थ्यावि' ख.ग. पाठः

आसनमधिकृत्याह– परस्परस्येत्यादि। अरेश्च विजिगीषोश्च परस्परस्येति सम्बन्धः। सामर्थ्याविघातादिति। यदा शत्रुर्विजिगीषोर्विजिगीषुश्च शत्रोर्विग्रहे[1] सामर्थ्यमुपसोढुं समर्थः, तदा यदुपेक्षणं, तदासनम्। तथा ह्युक्तं "न मां परो नाहं परमुपहन्तुं शक्त इत्यासीत" (कौटि० अर्थ० 7.1.18.99) इति। तत् पञ्चविधं यानवत्॥12॥

In concern of the contraction their strengths suffer. Both the Ari and the Vijigisu stop for a while either in the beginning or during the progress of a war, it is called Asana. There are five kinds of Asanas.

अन्योन्याक्रान्तिकरणं विगृह्यासनमुच्यते।
अरिं विगृह्य वास्थानं विगृह्यासनमुच्यते।।13।।

तदेव श्लोकदशकेन दर्शयति– अन्योन्याक्रान्तिकरणमित्यादि। आक्रान्तिरतिसन्धानम्। इदमुक्तं भवति– अरिविजिगीष्वोः परस्परमतिसन्धानपूर्वकं यदासनकरणं, तद् विगृह्यासनमित्येकः प्रकारः। द्वितीयमाह– अरिं विगृह्य वेति। देशविलोपादिना शत्रोरपकृत्येत्यर्थः। पूर्वत्रोभयोर्व्यापारः, इह तु विजिगीषोरेवेति विशेषः॥13॥

When each of the Ari and the Vijigisu's accomplishments to prevent the plan of operation of the other, it is called Vigrihyasana. When again a king besieges a foe it is called Vigrihyasana.

यदा दुर्गस्थितः शत्रुर्ग्रहीतुं न च शक्यते।
विगृह्यैनं तदासीत [2]हत्वास्यासारवीवधौ।।14।।

कदा विगृह्यासनमित्याह– यदेत्यादि। ग्रहीतुं नैव शक्यते, शुद्धेन विग्रहेण तदासीत। आसारवीवधाविति। 'धान्यादेर्वीवधः प्राप्तिरासारस्तु सुहृद्बलम्' (सर्ग 14. श्लो. 27) इति वक्ष्यति। उपलक्षणार्थं चैतत्। तेन यवसेन्धनादि च वीवध इति बोध्यम्॥14॥

---

[1] 'हेणासामर्थ्यं विहन्तुमुपहन्तुं सोढुं वा न स'ङ. च. पाठः

[2] 'छित्वा' क. पाठः

When it becomes difficult to capture an enemy and secure within the stronghold of his fort, then a king should lay siege to it, cutting off the Asana and blockading the road by which supporting forces from the country are likely to advance.

अरेश्च विजिगीषोश्च विग्रहे हीयमानयोः।
विच्छिन्नवीवधासारं प्रक्षीणयवसेन्धनम्।
विरज्यमानप्रकृतिं कालेनैव वशं नयेत्।।15।।

एवञ्च विगृह्यासने सति क्रमेण शत्रुर्विरज्यमानप्रकृतिर्वध्यो भवति। यदाहविच्छिन्नेत्यादि।।15।।

Unkind to the Asana and the communication with the country, reducing the strength of the enemy and disuniting his Prakritis, a king should steadily bring his enemy under suppression.

सन्धाय [1]समवस्थानं सन्धायासनमुच्यते।।16।।

हीयमानयोरिति तुल्यबलत्वात् क्षीयमाणयो:[2]।।16।।

When the Ari and the Vijigisu both suffering loss in a war, stop it by the conclusion of an armistice, it is called Sandhay Asanam.

निवातकवचैः सार्धं रावणः शत्रुरावणः।
ब्रह्माणमन्तरे कृत्वा सन्धायासनमास्थितः।।17।।

निवातकवचै: सार्धमिति। रावणो हि[3] ब्रह्मवरप्रदानाल्लब्धत्रिलोकविजयो लोकत्रयं जित्वा लब्धोत्साह: पातालं जेतुं प्रविष्ट:। तत्र भोगवती नाम पुरी। तत्रस्थान् निवातकवचान् दीर्घकालं योधितवान्। तयोश्चोभयोर्विग्रहे क्षीयमाणयोर्ब्रह्मा शिरोवेदनया समुपलब्धवृत्तान्तो विफलत्वमस्मद्वरप्रदानस्य मा भूदिति विचिन्त्यागत्य[4] दैत्यान् विग्रहान्न्यवर्त्तयत्। रावणश्च सन्धित्सुस्तमेव ब्रह्माणं प्रातिभाव्ये स्थापयित्वा तै: सन्धायासितवान्।।17।।

---

1. 'यदव' क. पाठ:
2. 'योरिति।।' क. ख. ग. घ. पाठ:
3. 'हि तुल्यबलत्वाद् ब्रह्मवरप्रसादाल्ल' च. पाठ:
4. 'त्या तौ द्वौ वि' क-ख-ग-घ. पाठ:

Even Ravana the crusher of his enemies, had recourse to the Sandhdyasanam, offering Brahma as his hostage, when he had to fight with the Nivatakavachas.

उदासीने मध्यमे च समानप्रतिशङ्कया।
एकीभूय व्यवस्थानं सम्भूयासनमुच्यते।।18।।

उदासीने मध्यमे चेति विषयसप्तमी। समानप्रतिशङ्कयेति अरिविजिगीष्वोस्तुल्यया मध्यमोदासीनविषयप्रतिशङ्कयेत्यर्थः। एकीभूयेति शत्रुणा।।18।।

When a king, thinking the Udasina and the Madhyama to be equal to himself in respect of power, awaits, mustering all his forces, ready for an attack from either of them, it is called Sambhuyasanam.

उभयारिं हि[1] वाञ्छन्तं विनाशमुभयोरपि।
सम्भूयैनं प्रतिव्यूहेदधिकं स[2]र्वसम्पदा।।19।।

तदेव स्फुटयन्नाह – उभयारिमित्यादि। यदा मध्यमोदासीनयोरन्यतरो विजिगीषुं विनाशयितुं वाञ्छति तदायमुभयोरप्यनयोररिर्भवति। [3]तमुभयारिमधिकं शत्रुणा सम्भूय प्रतिव्यूहेत्।।19।।

If the Ubayari(?) desires? the destruction of the Ari and the Vijigisu, being himself more powerful than both of them, he should be withstood by what is known as Sanghadharma.

यियासोरन्यमन्यत्र प्रसङ्गेन हि [4]केनचित्।
आसनं यत् तदर्थज्ञैः प्रसङ्गासनमुच्यते।।20।।

यियासोरिति अन्यं शत्रुं यातुमिच्छोर्विजिगीषोः। अन्यत्र यातव्यात्। प्रसङ्गेन हीति अन्तरा मित्रोत्सवादिप्रसङ्गेन।।20।।

When a king eager to visit a certain place or person, halts through some eventuality or other, at a place different from where he intended to go at first, it is called Prasangasana by those versed in the science of Polity.

---

[1] 'विधित्सन्तं' ख-ग. पाठः
[2] 'सङ्घधर्मणा' क. पाठः
[3] 'दु' क. ख. ग. घ. पाठः
[4] 'केवलम्।' क. पाठः

अथोपेक्ष्यारिमधिकमुपेक्षासनमुच्यते।
उपेक्षां कृतवानिन्द्रः पारिजातग्रहं प्रति।।21।।

अथोपेक्ष्येति। स्थानमासनमुपेक्षणं चेत्यासनपर्यायायः। तत्र गुणैकदेशे स्थानम्। स्ववृद्धिप्राप्त्यर्थमासनम्। उपायानामप्रयोग उपेक्षणम्। तत्र बलवन्तमरिमुपायानाम् अप्रयोगपूर्वकमुपेक्ष्य यत् स्ववृद्धिप्राप्त्यर्थमासनं, तदुपेक्षासनमुच्येत। पारिजातग्रहं प्रतीति। विष्णोः प्रियां सत्यभामां पत्या स्वगृहमागतां शची स्वमुद्यानं दर्शयामास। तत्र पारिजातमञ्जरीं दृष्ट्वा सत्यभामया प्रणयादभ्यर्थिता मानुषीत्यवज्ञया न ददौ। तदीर्प्यया च जातकोपया तया प्रोत्साहितो विष्णुर्नन्दनं वनं गत्वा तदारक्षकान् निहत्य पारिजातकमेवोत्पाट्य द्वारकायां रोपितवान्। इन्द्रोऽपि देवकार्यमनेनानेकं कर्त्तव्यं, बलवांश्चेति विचिन्त्य तमुपेक्ष्य स्थितवान् इत्येकः प्रकारः।।21।।

Obvious apathetic attitude of a king before an enemy more powerful than himself is called Upekshasana.Indra treated with indifference while carrying the Parijata from him.

उपेक्षितस्य [1]वान्यैस्तु कारणेनैव केनचित्।
आसनं रुक्मिण इव [2]तद्ध्युपेक्षासनं स्मृतम्।।22।।

द्वितीयमाह– उपेक्षितस्य वान्यैरिति। यदा द्वयोरमित्रयोः परस्परमभियुक्तिकृतोः कार्यसम्भववशाद् यथास्वं पक्षमाश्रितेषु शत्रुविजिगीषुसमवायार्थिषु ताभ्यां[3] गौरयुक्तोऽयमित्यनेन प्रकारेणोभ्यामप्युपेक्षितो न समवेतः, तदास्योपेक्षितस्य यदासनं, तदुपेक्षासनम्। रुक्मिण इवेति कुरुपाण्डवानामुद्यमे यथाप्रयोजनं द्विधा समाश्रितेषु सामवायिकेषु सर्वक्षत्रियेषु रुक्मी क्रथकैशिकेष्वेकाक्षौहिणीपरिवारः सन् शत्रुभ्यो भयात् कुरुपाण्डवान् साहाय्यदानेच्छया प्रत्येकमुपगभ्योवाच 'यदि भीताः स्थ साहाय्यं करिष्यामि रण' इति। तैश्चासौ मन्दप्रयोजनोऽयं युयुत्सुरित्युपेक्षितो निवृत्यासितवान्।।22।।

---

[1] 'चान्येन का' क. पाठः

[2] 'दु' क. पाठः

[3] 'भ्यामस्यैव गौ' क-ख. पाठः, 'भ्यामस्यैव यु' ग-घ. पाठः

King, Because of some other reason being led to treat with irrelevance of certain acts, they remain inactive like Rukmin or does not have recourse to vigorous measures it is called Upekshasana.

बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन्।
द्वैधीभावेन वर्त्तेत काकाक्षिवदलक्षितः।।23।।

द्वैधीभावमधिकृत्य श्लोकचतुष्टयमाह– बलिनोरित्यादि। तत्र कौटिलीये द्विधा द्वैधीभाव उक्त:। तथा षाड्गुण्यसमुद्देश उक्त: "सन्धिविग्रहोपादानं द्वैधीभाव" इति। अवस्था चास्योक्ता "सहायसाध्ये कार्ये द्वैधीभावं गच्छेदि" (कौटि० अर्थ० 7-1-18, 99) ति। तथा[1] संश्रयवृत्तावुक्तं "पार्श्वस्थो वा बलस्थयोरासन्नभयात् प्रतिकुर्वीत, दुर्गापाश्रयो वा द्वैधीभूतस्तिष्ठेत्, सन्धिविग्रहहेतुभिर्वा चेष्टेते" (कौटि० अर्थ० 7-2-100) ति। इह तु सन्धिविग्रहयोरुक्तत्वात् तत्समुदायोऽपि द्वैधीभावोऽर्थादुक्त एवेति नोक्तम्। इतरं तु द्वैधीभावमभिसन्धायाहबलिनोर्द्विषतोरिति। वाचात्मानं समर्पयन् इदं राज्यमहं च त्वदर्पण इति द्वैधीभावेन उभयत्रात्मार्पणेन दुर्गापाश्रयो वर्त्तेत। काकाक्षिवदलक्षित: काकदृष्टिर्ह्येकाप्युभयत्र गोलके वर्त्तमाना नोपलक्ष्यते। द्वैधीभावश्चायमुभयाश्रय: संश्रयश्चैकाश्रय इत्यनयोर्भेद:।।23।।

Encircled in between two potent enemies, a king surrendering himself only in words should like the crow's eye-ball, carry on a double dealing, without being detected by either of them.

यापयेद् यत्नमास्थाय सन्निकृष्टतरस्तयोः।
उभयोरपि सम्पाते सेवेत बलवत्तरम्।।24।।

यापयेद् आत्मानमिति शेष:। सन्निकृष्टतरस्तयोस्तद्देशाक्रान्त्या द्वाभ्यामुपहितत्वात्। सम्पात इति स्वदेशात् सम्भूय विजिगीषुदेशमभिपततोरित्यर्थ:। बलवत्तरं द्वयोरेवान्यतरम्।।24।।

Of the two dominant enemies the one who is seriously at hand, should be put off diligently with empty promises. But if both of them assail him simultaneously, a king should submit himself to the stronger of the two.

---

[1] 'था तत्सं' क-ख-ग-घ. पाठ:

यदा द्वावपि नेच्छेतां संश्लेषं जातसंविदौ।
तदो[1]पसंर्पस्तच्छत्रुमधिकं वा समाश्रयेत्।।25।।

जातसंविदाविति उच्छेत्तव्योऽयमस्माभिर्न सन्धातव्य इति कृतसंवित्कौ। तच्छत्रुमिति तयोः शत्रुम्। अधिकं वा अशत्रुमपि विशिष्टबलम्।।25।।

When again both of them, seeing through his double-dealing and becoming convinced of his duplicity, reject all overtures of peace, then he the attacked king should go over to be friend the enemies of both of them ; or if that is not possible, should seek shelter with the stronger of the two as before.

द्वैधीभावो द्विधा प्रोक्तः स्वतन्त्रपरतन्त्रयोः।
स्वतन्त्र उक्तो ह्यन्यस्तु यः स्यादुभयवेतनः।।26।।

द्विधा प्रोक्तः स्वतन्त्रपरतन्त्रयोश्च भेदात्। तत्र स्वतन्त्र उक्तः। अयमेव विजिगीषुः, तस्य स्वकर्मप्रधानत्वात्। अन्यस्तु परतन्त्रः। कोऽसावित्याह– यः स्यादुभयवेतन इति। यो या[2]भ्यां यत्र प्रणिहितः, स ताभ्यां वेतनमाददान उभयवेतनः। तयोरुभयोर्वर्तमानः परक[3]र्मप्रधानत्वात् परतन्त्रः।।26।।

Dvaidhibhava is of two kinds, Swatantra and Paratantra. What has been described above is Paratantara Dvaidhibhava; it is of him who receives remuneration from two kings hostile to each other.

उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः।
कुलोद्भतं सत्यमार्यमाश्रयेत बलोत्कटम्।।27।।

---

1. 'तो' क. पाठः, 'दा समापतेच्छ' ख-ग. पाठः
2. 'येन य' क-ख-ग-घ. पाठः
3. 'तन्त्रप्र' क-ख-ग-घ. पाठः

संश्रयमधिकृत्य श्लोकाष्टकमाह– उच्छिद्यमानः स्वदेशादुत्थाप्यमानः। निरुपायप्रतिक्रिय इति उपायेन प्रतिक्रिया उपायप्रतिक्रिया सा शक्तिहीनत्वाद् व्यपेता यस्येत विग्रहः। तथा ह्युक्तं "शक्तिहीनः संश्रयेते" (कौटि० अर्थ० 7.18.99) ति। कुलोद्गतं राजबजिकम्। आर्यं सद्वृत्तम्। बलोत्कटं शत्रोर्बलाधिकम्।।27।।

When a king is attacked by a dominant enemy and has no other means or measure open to him and prevent the calamity, there and then only, should seek protection from one who comes from a noble family and is truthful, generous and highly powerful.

तद्दर्शनोपास्तिकता नित्यं तद्भावभाविता।
तत्कारिता प्रश्रयिता वृत्तं संश्रयिणां स्मृतम्।।28।।

समाश्रितस्य वृत्तिमाह – तद्दर्शनेत्यादि। तद्दर्शनायोपास्तिः[1] उपासना यस्येति विग्रहः। पश्चात् कप्रत्ययान्तस्य भावप्रत्ययः। तद्भावभाविता तदभिप्रायानुकूलता। तत्कार्यकारिता तदर्थकारिता। प्रश्रयिता सादरता।।28।।

The duties of one taking recourse to Samsraya are to be reverential attitude in his presence and also always united with him in his thoughts and plans and to render facility to him and be considerate to him.

विनीतवत् तत्र कालं गमयित्वा गुराविव।
[2]तत्सङ्गात् प्रतिपूर्णः सन् क्रमेण स्ववशो भवेत्।।29।।

विनीतवत् विनीत इव। तत्सङ्गात् प्रतिपूर्णः तत्संश्रयादभ्युच्चितः। स्ववशो भवेत् स्वकर्मप्रधानः स्यात्।।29।।

Being protected to his ruler as if to his own teacher, the protected should pass some time with the former like one very meek and gentle. Then gaining strength by such association, he should once more become independent.

---

1. 'नोपास्तिः सेवावसरो य' क-ख-ग-घ. पाठः
2. 'त्रसङ्गात् समापू' क. पाठः

[1]ददद् बलं वा कोशं वा भूमिं वा भूतिसम्भवाम्।
आश्रयेदभियोक्तारं विसन्धिरनपाश्रयः।।30।।

बलं दण्डः। भूतिसम्भवां गुणवतीं भूमिम्। विसन्धिरनपाश्रय इति। यदा बलोत्कटो नास्ति, तदा निराश्रयोऽभियोका सह सन्दध्यात्। तेनापि विसन्धिश्चेदतिघोरमेवाश्रयेत्[2]।।30।।

To remain under asylum, a king should seek it with the peace-breaking assaulter by surrendering to him his army or his treasury or his lands or the produce of the lands.

सर्वाणि चैतान्यार्त्तः सन् दद्यात् ताणार्थमात्मनः।
युधिष्ठिर इवाप्नोति पुनर्जीवन् वसुन्धराम्।।31।।

कस्माद् बलादीनि दद्यादित्याह– सर्वाणीत्यादि। त्राणार्थमात्मनः तस्य प्रधानत्वात्, जीवतः[3] पुनरावृत्तिदर्शनात्। यदाह– युधिष्ठिर इवेति। युधिष्ठिरो हि द्यूतेन [4]हृतराज्योऽपि जीवन् [5]पुनरवाप्तवान् राज्यमित्यतिप्रसिद्धम्।।31।।

Involved in difficulties, all prakriti's -army, treasury, lands, produce of lands, etc. Should be given up simultaneously for the preservation of the self. If living is certain there is every chance of regaining the kingdom at the end, like king Yudhisthira.

निष्पतेदात्मलाभे वा व्यसने वा रिपोः श्रियः।
[6]प्रहरेद् वाबलीयस्या सैंह्या वा काल उत्थितः।।32।।

संश्रितः कदा निर्गच्छेदित्याह– निष्पतेदिति। आत्मलाभे स्ववृद्धौ सत्याम्। व्यसने वा शत्रोरन्तः कोपादौ प्रहरेद् वा। यदि न निष्पतेद्, आबलीयस्या

---

1. 'द्याद् ब' क. पाठः
2. 'दिभियोक्तारमे' ङ. च. पाठः
3. 'तश्च पु' च. पाठः
4. 'हारित' ङ. च. पाठः
5. 'नस्तदेवा' ङ. च. पाठः
6. 'वृत्त्या वाथ ब' ख.ग. पाठः

वृत्त्येति शेष:। मत्तप्रमत्तवदि (स० 10. श्लो० 37) त्यादिना प्रागुक्तयाबलीयस्या वृत्त्या वा सैह्या वा सिंहवृत्त्या वा स्वोत्साहमवेक्ष्येत्यर्थ:।।32।।

When his own strength increases or when some calamity threatens his foe the assailant with whom he has sought shelter, the sheltered king should fall upon the former, or acquiring power, he should smite his foe down by means of svaihi vritti.

नाकारणात् सङ्गमियाज्ज्यायसा वेतरेण वा।
क्षयव्ययकृताद् दोषाद् विस्रम्भद्रोहजादपि।।33।।

नाकारणादिति। यदा परस्यारिविगृहीतत्वं न पश्येत्, तदा न संश्लिष्यात्। किन्त्वदृष्ट एव कोशादीन् ददत् संश्रयेत्। तथा चोक्तं "कोशदण्डभूमीनामन्यतमेनास्योपकर्तुमदृष्ट: प्रयतेत। महादोषो हि निविष्टबलसमागमो राज्ञामन्यत्रारिविगृहीतादि" (कौटि० अर्थ० 7.2.100) ति। इतरेण समहीनाभ्यां वा। दोषादपि न सङ्गमियादिति सम्बन्ध:। विस्रम्भद्रोहजात् विस्रम्भघातसमुत्थात्।।33।।

Never rush into a union either with a stronger or a weaker rival king without sufficient cause or reason; for in such union there is danger of losing men, money and munitions and of being disloyally treated.

संयोगं हेतुना गत्वा पितर्यपि न विश्वसेत्।
विश्वासमागतं सन्तं प्रायो द्रुह्यन्त्यसाधव:।।34।।

हेतुना कारणेन। पितर्यपि न विश्वसेत् किमुत शत्रुषु। विश्वासमागतं विश्वस्तम्।।34।।

King even while making treaty with his own father should not trust him, for the wicked when the Virtuous confide in them, always the latter proves false, and take advantage of them.

इति षाड्गुण्यमन्ये तु द्वैगुण्यमभिचक्षते[1]।
यानासने विग्रहस्य [2]रूपं सद्भि: प्रकीर्तितम्।।35।।

---

1. 'मिति च' ख. ग. पाठ:
2. 'द्वयं सन्धे: परं स्मृतम्' क. पाठ:

इदानी श्लोकसप्तकेन षाड्गुण्योपसंहारपूर्वं मतभेदं दर्शयति–षाड्गुण्यमित्यादि। प्रतिपादितमिति शेषः। द्वैगुण्यमिति सन्धिर्विग्रहश्च द्वावेव गुणौ। शेषाणामत्रैवान्तर्भावात् कारणात्। तदेव दर्शयति यानासने इत्यादिना।।35।।

These are the Sadgunas or the six types of foreign policy. But some say that there are only two Gunas, Yana and Asana falling within the category of Vigraha, and the rest Dvaidhibhava and Asraya being other forms of Sandhi only. indeed does an insect falling on fire reap except burning.

सन्धेस्तु सन्धिमार्गज्ञैर्द्वैधीभावसमाश्रयौ।
सोऽभिगच्छंश्च तिष्ठंश्च विग्रहं कुरुते यतः।।36।।

सन्धेः परं रूपं द्वैधीभावसंश्रयौ। स इति विजिगीषुः। अभिगच्छंश्चेति। अपरभूमौ गच्छन् देशविलोपादिनापकारलक्षणं[1] विग्रहं च कुरुते। तिष्ठन् स्वभूमौ परमभिहन्तुमशक्तोऽप्यतिसन्धातुकामः। स्वदण्डैर्वा कर्शयन् विगृह्णाति।।36।।

Without the conclusion of some kind of a peace, double-dealing Dvaidhibhava and shelter seeking Samsraya are not possible; therefore these two also are said by the wise to be merely other forms of peace.

असन्धाय यतो नास्ति द्वैधीभावः समाश्रयः।
ततो द्वावपि तौ प्राज्ञै रूपं सन्धेरुदाहृतौ।। 37।।

असन्धयेति। सन्धिकृत्वा कथं द्विधा वर्तेत, संश्रयेद्[2] वा, तस्मादुभावपि सन्धे रूपम। यानासनभेदा[3] अपि यथास्वमत्रान्तर्भूतत्वादव्यतिभिन्ना एव। सम्भूयप्रसङ्गोपेक्षा अपि यथासम्भवं योज्याः।।37।।

As without finalising some sort of peace dvaidhibhava and samsrya policies can not be adopted , the wise take this as variations of Sandhi.

---

1. 'ना पराप' ङ. पाठः
2. 'येत' च. पाठः
3. 'नरूपभे' च. पाठः

(सन्धायेति हि यत् प्रोक्तं तत् सन्धे रूपमुच्यते।
विगृह्येति च यत् प्रोक्तं विग्रहस्य तदुच्यते।।
सन्धिश्च विग्रहश्चेति द्वैगुण्यमिति चक्षते।
एतौ च संश्रयश्चैव त्रैगुण्यमिति चापरे।।38।।

यताविति सिन्धविग्रहौ। संश्रयश्च तृतीयः।।38।।

Though the Sandhi and Vigraha are considered by some to be the two expedients only others taking samsraya in to account describe expedients to be three in number.

तस्मादन्यं संश्रयतेत बाध्यमानो बलीयसा।
तत्सन्धेः संश्रयो ह्यन्य इत्युवाच बृहस्पतिः।।39।।

तस्मादन्यमिति। अभियेक्तुरन्यं बलोत्कटं संश्रयते। सन्धिः पुनरभियोक्रैव बलीयसा सह क्रियते।।39।।

According to Brihaspathi, A king when oppressed by a powerful aggressor, is obliged to seek protection from another more powerful than the former, it is called Samsraya, the other forms of union are said to be Sandhi.

न्याय्यो गुणो विग्रह एक एव सन्ध्यादयोऽन्ये तु गुणास्तदुत्थाः।
अवस्था भेदमुपागतः सन् षाड्गुण्यमित्येव गुरोर्मतं नः।।40।।

एक एवेति। कौटिल्यदर्शनमेवैतत्। एवं मन्यते—यदि प्राधान्यचिन्तया गुणोपदेशः, तदा विग्रह एवैको गुणः, यस्मादभियोक्ताभियोज्यश्च द्वे प्रकृती इति। तत्र प्राधान्येन प्रथमं विग्रह एव व्याप्रियते, शेषास्तु तदङ्गभूतास्तद्भविनो[1] गुणीभूता एव। अथ[2] स्वाकार्यावस्थापेक्षया गुणाख्यानं, तदा षडेव गुणा, इत्याह—अवस्थया भेदमुपागतः षाड्गुण्यमिति। तथा चोक्तं 'षाड्गुण्यमेवैतदवस्थाभेदादिति कौटिल्यः। तत्र 'हीयमानः सन्धीयेत, अभ्युच्चीयमानो विगृह्णीयात्, न मां परो नाहं परमुपहन्तुं शक्त इत्यासीत, गुणातिशययुक्तो यायात्, शक्तिहीनः संश्रयेत्, साहाय्यसाध्ये कार्ये द्वैधीभावं गच्छेदि' ति (कौटि० अर्थ० 6. 2. 99)।।40।।

---

1. 'नोऽनुगु' ङ. च. पाठः
2. 'थाका' ङ. पाठः

Firmly speaking there is only one guna, viz., Vigraha. Sandhi and the others are the result of it amended according to circumstances the one guna - Vigraha multiplies itself into the six gunas. This is the opinion of our own teacher – Vishnugupta.

(इति यानासनद्वैधीभावसंश्रयविकल्पनं नाम षोडशं प्रकरणम्)

इति कामन्दकीय नीतिसारे यानासनद्वैधीभावसंश्रयविकल्पनं नाम एकादशः सर्गः।

अथ द्वादशः सर्गः (Canto – 12)

सप्तदशं प्रकरणम्

मन्त्रविकल्पप्रकरणम्

(Varities of Policy decisions)

पाङ्गुण्यनिश्चितमतिर्गुह्यं गूढप्रचारवान्।
मन्त्रयेतेह मन्त्रज्ञो मन्त्रज्ञैः सह मन्त्रिभिः।।1।।

परमण्डलविजयोपायः षाड्गुण्यं सर्गत्रयेणोक्तम्। तत्र विज्ञाततत्स्वरूपस्यापि मन्त्रहीनस्य तत्प्रयोगासम्भव इति षाड्गुण्यप्रयोगाय तच्छेषभूतो मन्त्रस्य विमर्शोऽस्मिन् [1]सर्गे विधीयत इति प्रकरणक्रमः। यदाह—**पाड्गुण्य-निश्चितमतिरित्यादि।** यथोक्ते षाड्गुण्ये प्रतिष्ठिमतिः[2]। विग्रहे गूढप्रचारवान् स्वपरैरविज्ञातचेष्टितत्वात्[3]। इहेति स्वपरमण्डलविषये[4], गुह्यं मन्त्रं मन्त्रयेतेति सम्बन्धः। मन्त्रज्ञः तदङ्गतत्त्वपरिज्ञानात्। सह मन्त्रिभिः। तथाहि[5] नैकस्य मन्त्रसिद्धिरस्तीति विशालाक्षः[6]' (कौटि० अर्थ० 1-14.11)॥1॥

A wise Vijigisu after analytically reviewing his own condition as well as that of his enemies should set out on an expedition. That is to know his own as well as his enemy's strength or weakness, is to be conversant with the essentials of good counsel.

---

[1] 'सर्गेऽभिसन्धीय' क-ख-ग-घ, पाठः
[2] 'तिरिति विग्रहः' गू च पाठः
[3] चेष्टत्वा च पाठः
[4] ले गुह्यं मन्त्रये च पाठ
[5] ह्युक्तं नै ङ पाठः
[6] क्ष इति। ङः पाठः

मन्त्रार्थकुशलो राजा सुखं विजयमश्नुते।
विपरीतस्तु विद्वद्भिः स्वतन्त्रोऽप्यवधूयते।।2।।

मन्त्रज्ञ इत्यस्य स्थिरीकरणाय श्लोकद्वयमाह-**मन्त्रार्थकुशल** इत्यादि। विपरीतो मन्त्रार्थाकुशलः। स न केवलं भूतिं न समश्नुते, अवधूयते च विद्वद्भिर्मूर्खोऽयमिति। स्वतन्त्रोऽप स्वयं कार्यं प्रवर्तयन्नपि।।2।।

An intelligent king should never do an act that would be totally unproductive, or appear with great dangers or about the success of which there would be any doubts, or that would bring confirmed hostility in its sequence.

दुर्मन्त्रमेनं रिपवो यातुधाना इव क्रतुम्।
समन्ततो विलुम्पन्ति तस्मान्मन्त्रपरो भवेत्।।3।।

दुर्मन्त्रम् अविशुद्धमन्त्रम्। यातुधनाः राक्षसाः। क्रतुं यज्ञम्। तस्मान्मन्त्रपरो भवेत्, तत्पूर्वत्वात्[1] सर्वारम्भाणाम्।।3।।

An act unblamable at the time of its being done and in all times to come, pure and accomplished in the proper manner, and bestowing countless blessings -both here and here after - such an act is always acclaimed by the virtuous.

मन्त्रयेतेह कार्याणि सहाप्तेन विपश्चिता।
आप्तं मूर्खमनाप्तं च मन्त्रिणं परिवर्जयेत्।।4।।

मन्त्रज्ञैः सह मन्त्रिभिरित्यस्य विशेषमाह—**सहाप्तेन विपश्चितेति**। आप्तेन मन्त्रज्ञेन च मन्त्रिणा कार्याणि मन्त्रयेतेत्यर्थः। यः पुनरनाप्तः, योऽपि न मन्त्रज्ञस्तदुभयमपि त्यजेत्।।4।।

An act that would be appeared with continuous virtuous and that would bring no blame on its performer, such an act should be engaged in, although for the time being it might not be agreeable.

मार्गं सन्मार्गगतिभिः सिद्धये सिद्धकर्मभिः।
पूर्वैराचरितं सद्भिः शास्त्रीयं न परित्यजेत्।।5।।

---

[1] वकत्वा च पाठः

असम्मन्त्र्यैव कस्मान्न कार्यं कुर्यादित्याह — मार्गमित्यादि । शास्त्रीयं मार्ग मन्त्रनिर्णयाख्यं सिद्धये न परित्यजेदिति सम्बन्धः। पूर्वैराचरितं सेवितम्। ते ह्यमुमेवाश्रित्य सिद्धकर्माणोऽभवन्।।5।।

In implementing counsels to achieve success in any act, it is better to have recourse to one's familiarity of means, from the very beginning. He should not deviate from the sastras and predecessors and of the wise.

उच्छास्त्रपदविन्यासः [1]सहसैवाभिसम्पतन्।
शत्रुखङ्गमुखग्रासमगत्वा न निवर्त्तते।।6।।

तत्परित्यागे दोषमाह— **उच्छास्त्रपदविन्यास** इति। उच्छास्त्रः पदविन्यासः कार्यानुष्ठानलक्षणो यस्येति विग्रहः। सहसैव विना निर्णयेन।।6।।

The achievement of wealth from wicked persons by precipitating assault is ever difficult. But with the help of the procedures of policy,and sastras he can get back his wealth securely.

प्रभावोत्साहशक्तिभ्यां मन्त्रशक्तिः प्रशस्यते।
प्रभावोत्साहवान् काव्यो जितो देवपुरोधसा।।7।।

शक्तित्रये च मन्त्रशक्तिर्गरीयसीत्याह—प्रभावेत्यादि। काव्यों जितो देवपुरोधसेति। देवासुरसङ्ग्रामे देवैर्निहतानसुरांस्तन्मन्त्री शुक्रः सञ्जी[2]वन्या विद्यया जीवयतीति श्रुत्वा बृहस्पतिर्देवमन्त्री चिन्तामापन्नसतदतिसन्धानोपायं च ज्ञानबलेनालोच्य तद्विद्याग्रहणार्थं कचाख्यं स्वपुत्रं शिष्यत्वेन प्र[4]हितवान्। तस्य च त[5]माराधयतस्तद्दुहित्रा देवयान्या[6] सह महान् स्नेहोऽभवत्। तं

---

1. 'व नृपः प' क० पाठः
2. 'वनविद्यया यावज्जी' क-ख-ग-घ पाठः
3. 'द्याकर्षणा' च० पाठः
4. प्रणिहि च० पाठ
5. 'स' क-ख-ग-घ, पाठ
6. न्या सुम क-ख-ग-घ, पाठः

CR
300
2551-A

चैकदा [1]शत्रुपक्षीय इति [2]बहिर्गतमसुरा निजघ्नुः। देवयान्या च तमपश्यन्त्या 'तात कचो [3]नायाती'ति प्टष्टेन शुक्रेण योगचक्षुषा [4]मृतमालोच्य पठित्वा च विद्याम् 'एहि कचे'त्याहूतस्तन्मूल एवोपतस्थौ। एवमनेकधा व्यापादितं प्रापितजीवितं चासुरास्तं पुनरेकदा हत्वा पिष्ट्वा च तस्मै[5] मदिरामदविह्वलाय शुक्राय पानेन सह ददुः। पुनश्च तयाा तथैव पृष्टो निरूपयन्[6] स्वोदरगतं ददर्श। तत्र विद्याबलात् सुसम्पूर्णदेहोऽपि [7]कुक्षिमविदार्य न निर्गच्छतीति शुक्रस्तत्रस्थायैव तस्मै विद्यां ददौ। मित्त्वा[8] च कच उदरान्निर्गत्य विद्यया पुनस्तमजीवयदिति ततो विद्यापहाराज्जितः। पानव्यसनाच्चायं दोष इति ततः प्रभृत्युशना द्विजानां मद्यमपेयं भविप्यतीति शापमुत्सृष्टवान्॥7॥

Of the three sakthis Mantra Sakthi is of greater significance than either Prabhava or Prabhu sakthi or Utsaha sakthi. Sukra the teacher of demons inspite of gods priest Brihaspathi was defeated.Brhaspathi disguised as Sukra deceived the demons and for that sukra cursed Brhaspathi.

(असुरान् मोहयामास शुक्ररूपी बृहस्पतिः।
बृहस्पतिं तथा शुक्रः शशापानुपमद्युतिः।)
अशिक्षितनयः सिंहो हन्तीभं केवलं बलात्।
तं च धीरो नस्तेषां शतानि मतिमान् जयेत्॥8॥

अशिक्षितनयः मन्त्रशक्तिविकलः। बलाद् उत्साहशक्त्या। तत्र सिंहश्च तेषां हस्तिनां शतानि जयेदिति सम्बन्धः। मतिमान् मन्त्रशक्त्युपेतः॥8।

A lion lacking of training in moral laws kills its prey by

---

1. 'क्र' क-ख-ग-घ, पाठ
2. गर्हित क-ख-ग-घ, पाठ
3. नागच्छती च० पाठः
4. तद्वृत्तमा ङ-च० पाठः
5. स्मा एव म च० पाठः
6. न् उद ङ, पाठः
7. 'क्षि विदार्य नि क-ख-ग-घ, पाठः
8. हित्वा च तदुदरं नि' ङ पाठः

पुस्तकालय
164664
गुरुकुल कांगड़ी विश्वविद्यालय
164664

absolute physical force but hundreds of such lions are subjugated by a man by virtue of his cleverness and insight – mantra sakthi.

पश्यद्भिर्दूरतोऽपायान् सूपायप्रतिपत्तिभिः।
भवन्तीह फलायैव विद्वद्भिर्मन्त्रिताः[1] क्रियाः।।9।।

तस्मान्मन्त्रशक्त्या निरूपित एव कार्यारम्भः फलायेत्याह - **पश्यद्भिरि**त्यादि। सूपायप्रतिपत्तिभिः। सदुपायानुष्ठानैः।।9।।

A ruler anticipating future trobles should take adequate measures by training his own influence after due consideration with his counselors in order to get sure results.

उपायपूर्वं लिप्सेत कालं वीक्ष्य समुत्पतेत्।
पश्चात्तापाय [2]भवति विक्रमैकरसज्ञता।।10।।

इदानीं मन्त्रनिर्णयमेव विस्तरतो गुणख्यापनेन स्थिरीकर्तुं विंशतिश्लोकानाह। उपायपूर्वमिति मन्त्रशक्तिव्यापारं सूचयति। विक्रमैकरसज्ञता उत्साहशक्तिपरता।।10।।

Desirous of acquisition a king should under take a march against his enemy finding the opportune time for it only after applying necessary political expedients such as upayas.Too much reliance on military power alone leads to repentance.

शक्याशक्यपरिच्छेदं कुर्याद् बुद्ध्या प्रसन्नया।
केवलं दन्तभङ्गाय दन्तिनः शैलताडनम्।।11।।

बुद्ध्या प्रसन्नाया अन्यथा ह्यपरिच्छेदमोहादशक्येषु प्रवर्तमानस्याङ्गवैकल्यं निष्फलक्लेशता विपत्तिरन्तस्तापश्चेति दोषाः। स्युः। तान् दर्शयति केवलमित्यादिना। दन्तभङ्गायेति। गजो हि निर्मलशिलातलेषु स्वबिम्बं दृष्ट्वा प्रगिजोऽयमिति मन्यमानो मोहात् तस्मिन् परिणतो दन्तभङ्गमवाप्नोति।।11।।

A clear determination between what is achievable and

---

[1] श्चिन्तिताः क० पाठ
[2] निर्दिष्टा वि क० पाठ

what in not possible has to make by cool and intelligent application of Mantra sakthi. A rash action leads only to one's own suffering like the elephant charging against mountain rocks suffers only from broken tusks.

अशक्यारम्भवृत्तीनां कुतः क्लेशादृते फलम्।
आकाशमास्वादयतः कुतस्तु कबलग्रहः।।12।।

कुतस्तु कबलग्रहः शून्यत्वात् ।।12।।

Those who indulge in trying for unachievable objects hardly get anything but suffering. What can a man expect to get if he desires to touch the sky.

नाग्निं पतङ्गवद् गच्छेत् स्पृश्यमेव स्पृश्यमेव तु संस्पृशेत्।
किमन्यत् स्यादृते दाहात् पतङ्गस्याग्निमृच्छतः।।13।।

स्पृश्यमेव तु संस्पृशेत् शक्यमेवारभेत।।13।।

Flies should not touch the burning fire. That which can be touched safely can be touched What else than can be achieved by a fly approaching fire.

मोहात् प्रक्षिपतश्चेष्टं दुःखलभ्येषु वस्तुषु।
भवन्ति परितापिन्यो व्यक्तं कर्मविपत्तयः।।14।।

चेष्टां प्रक्षिपतः कुर्वतः। परितापिन्यः परितापनशीलाः। कर्मविपत्तयः कर्मव्यापादः।।14।

Anybody through delusion striving for an object difficult to acquire has to repent later for dangers associated with it.

बुद्धा बोध्यानुगतया परीयात् सम्पदः पदम्।
विशुद्धपदविन्यासः पर्वताग्रमिवोन्नतम्।।15।।

यस्मादपरिच्छेद्या एते दोषास्तस्माद् बुद्धा सर्वं परिच्छिन्द्यादित्याह—बुद्ध्येति। बोध्यानुगतया यथावस्थितवस्तुविषयया विशुद्धपदविन्यास इति सम्बन्धः। परीयात् सम्पदः पदम् आक्रामेद् राज्यम्।। 15।।

One who continues with sensibly planned steps on the

path of carefulness after clever considerations attain prosperity and position as high as the peak of a mountain?

दुरारूढं[1] पदं राज्ञां सर्वलोकनमस्कृतम्।
स्वल्पेनाप्यपचारेण ब्राह्मण्यमिव दुष्यति।।16।।

अविशुद्धे च पदन्यासे तत् स्वल्पेनापि दोषेण दुष्येदित्याहदुरारूढमित्यादि।।16।।

The position of a king who is greeted by all is really difficult to attain for it may be stained with blame due to the slightest of misbehaviors on his part as in the case of the high position of the Brahmans.

प्रारब्धानि यथाशास्त्रं कार्याण्यमलबुद्धिभिः।
वनानीव मनोहारि प्रयच्छन्त्यचिरात् फलम्।।17।।

गुणख्यापनेन मन्त्रनिर्णयं स्थिरीकर्तुमाह-आरब्धानीत्यादिना। वनानीवेति। तान्यपि[2] वृक्षायुर्वेदविहितेन विधिना ज्ञात्वाब्धानि अचिरात् फलं ददतीति।।17।।

Whenever activities are taken in agreement with orders of Sastras and after considerations with clear intellect quickly do they bear beautiful fruits on well nurtured trees.

सम्यगारभ्यमाणं हि [3]कर्म यद्यपि निष्फलम्।
न [4]तत् तथा तापयति यथा मोहसमीहितम्।।18।।

ननु[5] सम्यगारबधमपि कर्म कदाचिन्निष्फलं भवत्येव। ततश्च निर्णयानिर्णययो: को भेद इत्याह - सम्यगित्यादि। न तापयति, तत्र पुरुषस्यानुपालभ्यत्वात् ।।18।।

If deeds commenced properly bears no fruit even then it

---

1. रारोहं प क० पाठ:
4. प्यायु क, ख, ग, घ, ङ, पाठ:
2. कार्यंय क० पाठ:
3. तथा तापमयति ख-ग० पाठ:
5. नु च स च० पाठ:

does not cause as much pain as one begins with uncertainty or incorrect decision.

यत् तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम्।
पुमांस्तत्रानुपालभ्यो दैवान्तरितपौरुषः।।19।।

यदाह-यत् तु सम्यगित्यादि। उपक्रान्तम् आरब्धम्। पिर्ययं नैष्फल्यम्। दैवान्तरितपौरुषः अलक्षणेन दैवेन[1] बलवता तिरस्कृतपुरुषकार इत्यर्थः। तत्र दैवमेवोपालभ्यम्, अत्र पुमान्।।19।।

When an act commenced in the right way is followed by results conflicting to all opportunities, the performer is not to blame, in as much as his masculinity which is handicapped by fate.

प्रयत्नस्तावदास्थेयः फलायामलबुद्धिना।
अथर्ववेदनिपुणः शेषं दैवं समाश्रयेत्।।20।।

यदि दैवं प्रधानं किं तर्हि पुरुषकारेणेत्याह - प्रयत्न इत्यादि। अमलबुद्धिनेति विचारपूर्वकः पुरुषकारः कार्य इति दर्शयति। अथर्ववेदनिपुणः अकाण्डविनाशकुशलः। दैवं समाश्रयेत् सहकारितया।।20।।

In order to secure success, a man of pure intelligence should-in the first instance- put forth his efforts, the rest lies with destiny which can cut him short at any stage.

आत्मानं च परं चैव वीक्ष्य धीरः समुत्पतेत्।
एतदेव हि विज्ञानं यदात्मपरवेदनम्।।21।।

उत्साहवतोऽपि विक्रमो विचारपूर्वक एव फलवानिति दर्शयितुमाह— आत्मानं चेत्यादि। एतदेव हि विज्ञानं बुद्धेः कौशलं, यत् प्रथममेवात्मपरवेदनम् अभ्युच्चयापचयाभ्याम्।।21।।

A wise ruler should launch upon a war only after reviewing his own as well as that of his enemies resources. Correct knowledge of one's own and of enemy's properties is the essence of counseling.

---

[1] नि ति क-ख-ग-घ पाठः

निष्फलं क्लेशबहुलं सन्दिग्धफलमेव च।
न कर्म कुर्यान्मतिमान् महावैरानुबन्धि च।।22।।

उपायपूर्वकं लिप्सेतेत्युक्तम्। कीदृशं पुनस्तत् कर्म लिप्सेत त्यजेच्चेति प्रसङ्गादाह-निष्फलमित्यादिना।।22।।

No activity should be under taken that is likely to be troubled with unsafe moments or of doubtful results which likely lead to serious results.

तदात्वायतिसंशुद्धं सुविशुद्धक्रमागतम्।
हितानुबन्धि च सदा कर्म सद्भिः प्रशस्तयते।।23।।

सुविशुद्धक्रमागतं देशकालोपेतत्वात्।।23।।

Actions Yielding results useful for the present and for the future which are in agreement with the sastric injunctions and followed in proper way are likely to produce happiness and profits are praised by the wise.

हितानुबन्धि तज्जातु गच्छेद् येन न वाच्यताम्।
तस्मिन् कर्मणि सज्जेत तदात्वकटुकेऽपि हि।।24।।

तदात्वकटुकेऽपि आरम्भकाले समुद्वेजनेऽपि तिक्तौषधपानवद्।।24।।

Ministers, for the advancement of their own interests, deAn act likely to produce benefit should be pursued in all seriousness not by mere worldly sayings even if it tastes bitter for the present.

बुद्धैवोपक्रमः श्रेयान् फलनिष्पत्तये सदा।
क्वचित् कल्याणमित्रस्य [1]दृश्यते सिंहवृत्तिता।।25।।

बुद्ध्यैवोपक्रमः। श्रेयान् यथोक्तेषु कम्रसु। क्वचिदिति भीते। तत्रापि कल्याणमित्रस्य सुसहायस्येत्यर्थः।।25।।

In order to be sure of achievement it is always better to start a endeavor with intelligence by the application of political expedients but sometimes one intent upon well-being and relationship may have to accept the policy of a lion.

---

[1] शस्यते क० पाठः

सहसोत्पत्य दुष्टेभ्यो दुष्करं सम्पदार्जनम्।
उपायेन पदं मूर्ध्नि न्यस्यते मत्तहस्तिनः।।26।।

सहसोपक्रमे चार्थसिद्धिर्दुष्करैवेत्याह—सहसोत्पत्येति। उपायेन बुद्धिपूर्वकेण।।26।।

To gain wealth from the hands of wicked enemies by unexpected or un planned attack is always troubled with complications. It is only by presentation of political expedients that one can conquer his violent enemy like with thoughtfulness and intelligence the rider puts his foot on the head of a intoxicated elephant.

न किञ्चित् क्वचिदस्तीह वस्त्वसाध्यं विपश्चिताम्।
अयोऽभेद्यमुपायेन द्रवतामुपनीयते।।27।।

न किञ्चित् क्वचिदस्तीत्यादि उपायस्याभिव्यापितां दर्शयति। अयो द्रवतां नीयत इति सम्बन्धः। अभेद्यमपि सद्।।27।।

Here-in the earth of ours there is nothing that is incapable of being achieved by the learned and wise. Metals such as iron are known to be unable of being penetrated; but by suitable scientific measures -heating -they also are liquefied.

वाह्यमानमयःपिण्डं महच्चापि न कृन्तति।
तदल्पमपि धारावद् भवतीप्सितसिद्धये।।28।।

वाह्यमानं व्यापार्यमाणम्। तत्रापि स्वल्पमपिच्छेद्यम्। धारावद् धारोपेतम्। ईप्सितसिद्धो छिदयारिपीडयैव।।28।।

A unsharpened piece of iron carried on the shoulder does not cut it at all. But as soon as it is sharpened a little, it is turned into a means for fulfilling desirable ends, such as, for slaughter of foes, etc.

लोकप्रसिद्धमेवैतद् वारि वह्नेर्नियामकम्।
उपायोपगृहीतेन तत् तेनैव विशोष्यते।।29।।

उपायोपगृहीतेनेति। वह्निनाधस्तात् प्रतप्यमानायां स्थाल्यां तद्गतं वारि शोष्यते। तस्मान्मन्त्रनिर्णय: कार्य इति स्थिरीकृतम्।।29।।

That water extinguishes fire is a fact well known on earth. But assisted by the employment of proper measures, fire can also wither water up.

अविज्ञातस्य विज्ञानं विज्ञातस्य विनिश्चयः।
अर्थद्वैधस्य सन्देहच्छेदनं शेषदर्शनम्।।30।।

इदानीं मन्त्रस्य ज्ञानरक्षाप्रकाशनप्रशस्ताङ्गव्यापारोत्पत्तिक्रमशुद्धिसिद्धावर्तनधरणप्रदेशानष्टादशिभि:। श्लोकैराह—अविज्ञातस्येत्यादि। मन्त्रनिर्णयो मन्त्रज्ञानम्। तच्च मन्त्रिभि: सह मन्त्रयमाणस्य, नैकाकिन:। तथाहि देशकालान्तरितत्वादसाक्षात्कृतस्य विज्ञानं मन्त्रिभ्य एव। मन्त्रिसाक्षात्कृतस्यापि तत्त्वाभासनिश्चयभूयस्त्वे निश्चयो बुद्धन्तरात्। अर्थद्वैधस्य दशया यातव्ययो: कं प्रति यायाद् इत्यादिसन्देहे तच्छेदनं मन्त्र्युपदेशात्। शेषदर्शनम् एकदेशदृष्टस्यति शेष:। सन्धिविग्रहयो: सन्धि: श्रेयानिति शेषोपलब्धि:। एतच्चतुष्टयरूपं मन्त्रिसाध्यमिति तेषां शृणुयात्।।30।।

To know what is unknown, to decide and resolve upon what is already known, to dispel the doubts about any doubtful subject and to know the rest of a thing when only a part of it is known,—these should be the duties of ministers.

विदुषां शासने तिष्ठन् नावमन्येत [1]कंचन।
सर्वस्यैवोपशृणुयात् सुभाषितजिघृक्षया।31।।

यदाह - विदुषामिति। शासनम् उपदेश:। सर्वस्य अशास्त्रज्ञानस्यापि। सुभाषितजिघृक्षया अर्थवद् वाक्यं ग्रहीतुमिच्छया।।31।।

Abiding by the rules laid down by wise politicians, a person should never condemn or despise anybody. He should hear every body's words for culling salutary counsels out of them.

---

1. कर्हिचित् ख० ग० पाठ:

मदोद्वृत्तः क्रियामूढो योऽतिक्रामति मन्त्रिणम्[1] ।।
अचिरात् तं वृथामन्त्रमतिक्रामन्ति विद्विषः।।32।।

अवमानने दोषमाह—**मदोद्वृत्त** इति। अहमेव ज्ञानवानिति मदावलिप्तः। क्रियामूढ़: प्रयोगानभिज्ञः। वृथामन्त्रं निष्फलमन्त्रम्।32।।

The king, who is arrogant and foolish in his acts, disrespects his own ministers; soon he will be subjugated by his enemies, his counsels being totally useless.

संरक्षेन्मन्त्रबीजं हि तद्बीजं हि महीभृताम्।
तस्मिन् भिन्ने ध्रुवो भेदो गुप्ते गुप्तिरनुत्तमा।।33।।

रक्षितो मन्त्रः फलवानित्याह संरक्षेदिति। निर्णयकालात् प्रभृति यावत्कर्मारम्भकालम्। मन्त्र एव बीजं, ततो राज्यफलप्रसवात्। यदाह—तद्बीजमिति। भेदो विनाशः। अनुत्तमा श्रेयसी।।33।।

Confidentiality of the essence of policy resolutions must be carefully preserved like the seed which later grows as a big tree if the seed is destroyed its prospectus are surely destroyed while its preservation brings excellent results.

सिंहच्चेष्टमानस्य काले कर्म विपश्चितः।
क्रियमाणं स्वकुल्यास्तु विद्युरस्य[2] परे कृतम्।।34।।

कदा तर्हि मन्त्रः प्रकटीभवतीत्याह-सिंहवदित्यादि। सर्वकृतप्रतिविधानत्वात् सिंहस्येव निश्शङ्कं चेष्टमानस्य। काले प्रगवधारिते। क्रियमाणं स्वकुल्या विद्युः, नतु चिकीर्पितम्। परे कृतं समाप्तं विद्युः। अनेन क्रियानुमेयतां मन्त्रस्य दर्शयति।।34।।

A king should take action at the appropriate moment like a lion, after due consideration but keeping his plan of action absolutely secret even from the members of his family who may come to know it only when the act is in progress. Others may know it only when it is accomplished.

---

1. त ख. ग० पाठ
2. स्याप ग० पाठः

अपश्चात्तापकृत् सम्यगनुबन्धिफलप्रदः।
अदीर्घकालोऽभीष्टश्च प्रशस्तो मन्त्र इष्यते।।35।।

प्रशस्ते च मन्त्रे यत्रः कार्य इति दर्शयितुमाह—अपश्चात्तापेत्यादि। अदीर्घकालः चिरेण कालेन यो न निष्पद्यते। अभीष्टः ईप्सितार्थसाधनत्वात्।।35।।

The counsel which does not cause regret in future which is followed by sufficient benefits and does not cause in long delay in achieving the desired result, is admirable by the wise.

सहायाः साधनोपाया विभागो देशकालयोः।
विपत्तेश्च प्रतीकारः। [1]सिद्धिः पञ्चाङ्ग [2]इष्यते।।36।।

प्रशस्तः स्वाङ्गसाफल्याद् भवतीति तान्यङ्गान्याह—सहाया इत्यादि। अत्र दुर्गकर्मणि सहाया मुख्याः क्षुद्राश्च पुरुषाः। साधनोपायाः दुर्गस्यारम्भं प्रत्युपायाः [3]कुद्दालकुठारकरपत्रादयः। विभागो देशकालयोरिति। तत्र जनपदान्ते जनपदमध्ये चेति देशविशेषः। वर्षासु काठादिकर्म, ग्रीष्मे हेमन्ते चेष्टकादिकर्मेति कालविभागः। वित्तेश्चेति आरब्धे दुर्गकर्मणि दैव्या मानुष्याश्चोत्प (र्याय? न्नाया) विपदः अथर्वभिरुपायैः सामादिभिश्च प्रतीकारः। सिद्धिरितिकार्यस्येति शेषः। (तत्र मन्त्रविषयान्ते निष्पन्नदुर्गमविषह्यमाश्रितः परकर्माण्यपहनिष्यामि जनपदमध्ये च समुदायस्थानं भवतीत्यादिः) पञ्चाङ्ग इत्ष्यते मन्त्र इत्येव। उक्तञ्च कर्मणामारभ्योपायः पुरुषद्रव्यसम्पद् देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति पञ्चाङ्गो मन्त्र'' (कौटि० अर्थ० 1.15.11) इति।।36।।

In under taking any state matter counsel should be of five in number ie Pancanga Viz states own equipment ways and means suitability of particular place and time provision against unforeseen dangers and prospect for successful completion.

---

1. मन्त्रः प मूलकोशेषु पाठः
2. उच्यते मूलकोशेषु पाठः,
3. न्दा च० पाठः

अनुतिष्ठेत् समारब्धमनारब्धं प्रयोजयेत्।
अनुतिष्ठंश्च संवत्तय[1] विशेषेणोपपादयेत्।।37।।

मन्त्रव्यापारं दर्शयितुमाह—अनुतिष्ठेत् समापयेत्। प्रयोजयेद् आरम्मयेत्। संवृत्येति इदमनेन विशिष्टं भवतीति कुशलैः। सं (पा?वा)द्य।।37।।

Counsels should be aimed at completion of the work under taken, of new projects not taken up, and confirming excellence of skilled work.

प्रचारयेन्मन्त्रविदः कार्यद्वारेषु[2] नैकधा।
यत्र तच्चेतसां साम्यं [3]तेषु साधु समुत्पतेत्।।38।।

मन्त्रोत्पत्तिक्रममाह— **प्रचारयेन्मन्त्रविद** इति। इदं कार्यमुपस्थितं, तत्र किमाहुर्भवन्त इति कार्योपायेषु प्रवर्तयेत्। मन्त्रशुद्धिमाह— यत्रेति मन्त्रे। तच्चेतसां साम्यं मन्त्रिणामेकाभिप्रायता। तेषु समुत्पतेत् तेषु कार्योषु प्रवर्तेत।।38।।

Whenever any state matter which may be of several kinds needs analysis the wise ruler should inform his counselors about it and on their arriving at an settled verdict take it up in the right force.

यत्र मन्त्रिमनस्साम्यं यत्र चेतो न शङ्कते।
यत्र[4] सन्तो न निन्दन्ति तत् परीयाच्चिकीर्षितम्।।39।।

यथा मतिसाम्यं शुद्धिप्रवृत्त्योर्निबन्धनं (तथा) शङ्कानिन्दा (भ्युपगमाः भ्याम)शुद्धिर्निवृत्तिश्चेत्याह—यत्रेत्यादि। चिकीर्षितमिति कार्यद्वारेण मन्त्रशुद्धिरुक्ता।।39।।

Such activities should be under taken about which counselors are agreed about which there is no doubt and which are not objectionable to the virtuous.

---

1. 'त्या' ख, ग० पाठः
2. 'ष्वनेकशः' क पाठः
3. 'तत्र सा' मूलकोशपाठः
4. 'त् तु स' ख, ग, पाठः

धृतेऽपि मन्त्रेमन्त्रज्ञैः स्वयं भूयो विचारयेत्।
तथा वर्त्तेत [1]मन्त्रज्ञो यथा स्वार्थं न पीडयेत्।।40।।

इदमपरं शुद्धिकारणं, यत्[2] स्वयमेव पुनर्विमर्शनमित्याह—**धृतेऽपित्यादि।** इदमेव कर्तव्यमित्यवधारितेऽपि तथा बर्तेत, स्वार्थतात्पर्या(प्य?ह्य)-न्यथाप्युपदिशेयुरिति॥40॥

Even when any counsel is taken by counselors the ruler should himself carefully consider it, ruler conversant with state policies in accepting a counsel must be sure that it would not be eventually detrimental to his own state welfares.

मन्त्रिणः स्वार्थतात्पर्याद् दीर्घमिच्छन्ति विग्रहम्।
तेषां च भोग्यतामेति दीर्घकार्याकुलो नृपः।।41।।

यदाह—**मन्त्रिण** इत्यादि। दीर्घकार्याकुल: दीर्घविग्रहादिकार्यव्याकुरु:॥41॥

Ministers out of their self-interest want a continuation of wars and a king who adopts continuation of his actions is played in to their hands.

मनःप्रसादः श्रद्धा च तथा करणपाटवम्।
सहायोत्थानसम्पच्च कर्मणां सिद्धिलक्षणम्।।42।।

मन्त्रसिद्धिमूलान्याह—**मन;प्रसाद** इत्यादि। संशयाभावान्मनसो वैमल्यम्। श्रद्धा साध्येषु। करणपाटवं बुद्धिकर्मेन्द्रियाणां स्वविषयव्यारसामर्थ्यम्। सहायसम्पत् सत्त्वप्रतिज्ञादियोगो बाहुल्यं च। उत्थानसम्पल्लघूत्थायिता। कर्मणामारभ्यमाणानाम्। तत्कर्मसिद्धिरेव मन्त्रसिद्धिरिति मन्त्राणामिति नोक्तम्॥42॥

Mental satisfaction devotion and physical and intellectual ability to perform the anticipated work availability of support of friends one's own energetic attitude and plenty of resources are signs of sure victory.

लघूत्थानान्यविघ्नानि सम्भवत्साधनानि च।
कथयन्ति पुनः सिद्धिं करणान्येव कर्मणाम्।।43।।

---

[1] 'नीतिज्ञ:' क० पाठ:

[2] 'तू पुनः स्व' क० ख० पाठ

लघूत्थानानि करणानीति सम्बन्धः। साध्यस्य यान्युपादानसाधनानि तेषु विजिगीषोर्लघू(न्यु)त्थानानीति सप्तम्यर्थे बहुव्रीहिः। सम्भवत्साधनानि सम्भवत्सहकारिकारणानि ॥43॥

Punctuality in undertaking a work free from weaknesses and aided by necessary ways and means for its search is also said to be a clear indication of achievement.

आवर्तयेन्मुहुर्मन्त्रं धारयेच्च प्रयत्नतः।
अप्रयत्नधृतो मन्त्रः प्रचलन्नग्निवद् दहेत्।।44।

धृतस्य मन्त्रस्याप्रयोगकालमावर्तनं धारणं च कुर्यादित्याह—आवर्तयेदिति। अविस्मरणार्थं धारयेद् यथाधिष्ठानान्तरं न (चा?या) ति। प्रचलन्नधिष्ठानन्तरं गच्छन्॥44॥

Mantra or policy decision should be reviewed again and again and has to be cautiously preserved. Because a Mantra for its careless preservation or if it is early revealed burns everything like a moving fire .Meaning taking benefit of the revelation of secret plans and strategies of enemies indulge in imposing severe indemnities.

आप्ताप्तसन्ततेर्मन्त्रं संरक्षेत् तत्परस्तु सन्।
अरक्ष्यमाणं मन्त्रं हि भिनत्त्याप्तपरम्परा।।45।।

संरक्षेन्मन्त्रबीजमित्युक्तं, तत् कुतो रक्षेदित्याह— **आप्ताप्तसन्ततेरिति।** कथमिदमेवं स्यादिति निर्णयाय विजिगीषुराप्तं मन्त्रिणं पृच्छति, सोपि वृ (द्यन्तमु?द्धं तदु) पजीविप्वन्यं, सोऽप्यन्यमित्याप्तपरम्परा भिनत्ति। ततः संरक्षेन्मन्त्रबीजमित्युक्तम्॥45॥

Even when mantra is not repeated again and again stern concealment should be observed about it even while conversing with the reliable ministers in case it may pass on to their brethren and relatives and so on and eventually reach the enemies. Unless the mantra is well protected it may be revealed by friends to friends and their friends.

मदः प्रमादः कामश्च सुप्तप्रलपितानि च।
भिन्दन्ति मन्त्रं प्रच्छन्नाः कामिन्योऽवभतास्तथा।।46।।

तथान्येऽपि मन्त्रभिद इतयाह—मद इत्यादि। सुरापानादिजनितो मदः। प्रमादः कार्यान्तरप्रसङ्गात्।[1] कामः स्त्रीषु विश्वासहेतुः। सुप्तप्रलपितानि स्वप्नावस्थायाम्। प्रच्छन्नाः स्तम्भादितिरस्कृताः। कामिन्यः पार्श्ववर्तिन्यः। अवताः (दिच्छा?)मूकसमानाः।।46।।

Mantras revealed often unwillingly under the influence of intoxication, carelessness, addiction to sensual pleasures, and the habit of talking in sleep. It may also be revealed by secret agents , beloved wife who is confessed upon and by beings whose reproductive and monotonous abilities are depreciated i.e parrots etc.

निस्तम्भे निर्गवाक्षे च नि[2]ष्कुड्यान्तरसंश्रये।
सप्रसादाग्रे ह्यरण्ये वा मन्त्रयेदविभावितः।।47।।

मन्त्रप्रदेशमाह—**निस्तम्भ** इत्यादि। निष्कुड्यान्तरसंश्रय इति। मध्ये कुड्यमवस्थाप्य यदवस्थानं क्रियते तत् कुड्यान्तरसंश्रयम्। भित्त्यन्तरेति वा पाठः। तेन रहिते। अविभावितः अनुपलक्षितः। प्रज्ञा हि दूरादेवौष्ठपतनादिभिरभिप्रायं विन्दन्ति।।47।।

For the purpose of secret discussion the ruler should select either a chamber without pillars which do not echo and windows –which let out voices as well as corners and gaps where secret agents may hide themselves or on the top of the palace or in the solitude of the forest and that too unnoticed by others. A ruler should be cautious on secret state matters in a isolated and well-guarded chamber having no hidden passages and where discussions may be directed confidently which is not visited by many, and which there are no pillars, nor affected by strong breeze.

---

1. अवमता न किमपि जानन्तीत्यवज्ञाताः शुकशरिकावालव्याधिप्रपीडितादयः' इति राजेन्द्रलालमित्रसंशोधितायाम् उपाध्यायनिरपक्षासारिण्या-ख्यटीकायां व्याख्यातम्।
2. 'निर्भित्त्यन्तर' इति मूलकोशेषु पाठः

द्वादशेति मनुःप्राह षेडशेति बृहस्पतिः।
उशना विंशतिरिति मन्त्रिणां मन्त्रिमण्डलम्।।48।।

यतो मन्त्रज्ञानं, तद् मन्त्रिमण्डलम्। तत्र वृत्तं चतुर्भिः श्लोकैराह—द्वादशेत्यादि। उत्तरमन्त्रिव्यतिरेकेणेयं चिन्ता। तत्रोत्तरमन्त्रिणस्त्रयश्चत्वारो वा कर्तव्याः। तद्यतिरेकेणान्ये द्वादशराजकेतिकर्तव्यतापरिज्ञानाय द्वादश मन्त्रिणः स्युः। षोडशेति। एते चान्ये चारिविजिगीषुमध्यमोदासीनेषु चतुर्षु मण्डलेषु द्रव्यप्रकृतिपञ्चकस्वरूपविदश्चत्वार इति। विंशतिरिति। दशराजके तत्स्वरूपविदो[1] दश, [2]द्रव्यप्रकृतिविशेषविदश्च दशेति।।48।।

The council of ministers should be composed of twelve ministers according to Manu, Sixteen according to Brhaspathi and twenty according to Usanas or Sukra.

यथासम्भवमित्यन्ये[3] तत् प्रविश्य यथाविधि।
मन्त्रयेताहितमनाः कार्यं बुद्धिविवृद्धये।।49।।

यथासम्भवमिति। अन्ये कौटिलीयाः। यस्य यावन्तो गुरुलघुकार्यापेक्षया सम्भवन्ति तस्य तावन्तः स्युः।[4] तस्यैव कार्यसामर्थ्याद्धि पुरुषसामर्थ्यं प्रकल्प्यते। तत्र वृत्तमाह—तदित्यादिना। मन्त्रिमण्डलं प्रविश्य यथाविधि आहितमना एकापग्रचित्तः, अनुद्धतवेषो भूत्वेत्यर्थः। बुद्धिविवृद्धये मन्त्रप्रयोगार्थं तूत्तरमन्त्रिभिरेव सह मन्त्रयेतेत्याचार्येणोक्तम् एतत् त्रिभिश्चतुर्भिवा मन्त्रयेते' (कौटि० अर्थ० 1.15.11)ति।।49।।

While others hold that discussions should be held with as many ministers as considered necessary. They should be admitted or appointed officially according to rules for meeting with whole hearted attention so that intellect is amplified or focused.

---

[1] 'दः तद्द्र' क० ख० ग० घ० पाठः

[2] 'तिविद ङ० च० पाठः'

[3] 'त्येके त' ख-गं० पाठ

[4] 'स्रयुः का' ङ० च० पाठः

एकैकेनापि कार्याणि प्रविचार्य पुनः पुनः।
प्रविशेत् स्वहितान्वेषी मतमेषां पृथक् पृथक्।।50।।

एकैकेनामात्येन सह सम्भूय मतं प्रविशेत्, कस्य किंसमुत्थोऽभिप्राय इति विद्यात्।।50।।

Considering on a particular issue severally with ministers the ruler for his own interest or in the interest of the state should himself judge the virtue of each of the opinions presented.

महापक्षो यथाशास्त्रं दृष्टकर्मा हितः सुधीः।
यद्यद् ब्रूयान्मतारूढस्तत्तत् साधु समाचरेत्।।51।।

तत्रैषां यो महापक्षादिगुणयुक्तो यद् ब्रयात्, तदाचरेदित्याह—**महापक्ष** इत्यादि। बहुभिर्मन्त्रिभिरनुगम्यमानत्वान्महापक्षः। यथाशास्त्रं कुर्यादिति सम्बन्धः। दृष्टकर्मा अन्यत्र दृष्टमन्त्रप्रयोगः। हितः स्वामिने। मतारूढः निश्चयमतारूढः।।51।।

The opinion of a wise and proficient counselor having the majority support offered in conformity with the sastra in the interest of the ruler, should be obeyed to it resolutely.

नातीयात् कार्यकालं हि कृत्वा मन्त्रविनिश्चयम्।
अतिक्रान्तं[1] तुं भूयो यथायोगं प्रकल्पयेत्।।52।।

तत्रोत्तरमन्त्रिभिः परिषदा वा मन्त्रं विनिश्चित्य कार्यकालं न हापयेदिति श्लोकत्रयेण दर्शयति—**नातीयादित्यादिना**। यथायोगमिति। यो यस्य साध्यस्य कालेन योगस्तं तेन पुनः प्रकल्पयेदिति।।52।।

After deciding upon a mantra –policy for action, the proper time for it as decided should not be allowed to lapse. If at all the right time for action lapses for some reason or other discussion should have to be changed with essential procedures.

न कार्यकालं मतिमानतिक्रामेत् कदाचन।
कथञ्चिदेव भवति कार्ययोगः सुदुर्लभः।।53।।

---

[1] 'न्येऽपि त' ख-ग० पाठ

कालस्य कार्ययोगो न सुलभ इति मन्यमान आह—**न कार्यकालमित्यादि।**।53।।

An gifted ruler should never allow the right moment for action to slip by as a suitable opportunity for action is certainly hardly obtainable.

सतां मार्गेण मतिमान् काले कर्म समाचरेत्।
काले समाचरन् साधु रस[1]वत् फलमश्नुते।।54।।

तस्मात् तत्रैव काले कर्म समाचरेदित्याह — **सतां मार्गेणेति।** मन्त्रिणामुपदेशेन स्वादु साधु फलमश्नुते रसवत्त्वात्। अन्यथा कालातिपत्तिः प्रत्यग्रं कार्यरसं विहन्ति।।54।।

An intelligent ruler always acts in proper time following the path of advice of the wise councilors and thereby he enjoys the fruits as delightful as sweet juice.

इति चेति च सम्पश्यन् काले देशे सहायवान्।
विशुद्धपार्श्वसंसिद्धः समाक्रामेन्न चापलात्।।55।।

तत्रापि मन्त्राङ्गसव्यपेक्ष एव कार्यमारभेत, न चापलादिति श्लोकत्रयेण दर्शयति-इतीत्यादिना। अयमस्य [2]साधनोपाय इत्यादा(तुं यःतव्य)स्य देशे काले [3]प्रविभक्ते। क्षुद्रैर्मुख्यैश्च सहायैरुपेतः। विशुद्धपार्श्वः कृतविपत्प्रर्ताकारत्वात्। तदिति सद्यः सिद्धिकरम्। न चापलादिति। चपलो मन्त्रिभिः स्वयं वा अविमृश्यकारी।।55।।

Ensuing the course indicated above the king should undertake an action in right earnest and out of uncertainty or carelessness after due valuation of the advantages of time and place as well as availabity of support from the friends and arrangement for remedy for unexpected problems.

---

1. 'सम्पत्फलमुपाश्नु' ख० ग० पाठः
2. 'सन्धानो' ख० ग० पाठ
3. 'प्राग्वि' ङ, च० पाठः

अहिते हितबुद्धिरल्पधीरवमन्येत भतानि मन्त्रिणाम्।
चपलः सहसैव सम्पतन्नरिखङ्गाभिहतः प्रबुध्यते।।56।।

तदुभयमप्याह—अहितइत्यादि। दुखहेतौ सुखहेतुरित्येवं बुद्धिरल्पबुद्धित्वात्। मतानि कृतपञ्चाङ्गविनिर्णयानुपदेशान् योऽवमन्यते। रहसा सम्पतन् मन्त्रिभिरविमृश्य वर्तमानः शत्रुभिश्छिद्रेषु प्रहृतश्चेतयते।।56।।

Out of irrationality or the lack of intelligence when a capricious minded or rash ruler who takes evil for good ignoring the comprehensive advice of the ministers unexpectedly falls upon the enemy soon suffers severe losses at the latter's hands. He is indeed a vayasani-addict. This is the view of the prudent.

अविचार्य बलाबलं द्विषामहमित्येव समुद्धतोऽनयात्।
चपलः [1]स्वमतेन सम्पतन्ननिपत्याल्पमना न बुध्यते।।57।।

अविचार्य स्वयं बलादहमिति जातदर्पो हि न स्वयं विमृशति। स्वमतेन विचारशून्येन। अनिपत्य न बुध्यते स्वपदात् परिभ्रष्ट एव वेदयते। अल्पमनाः अल्पबुद्धिः।57।।

Deprived of the valuation of own forces as well as that of the enemy and haughtily discerning himself to be the most powerful the fickle minded ruler who relying on his own decision ie disregarding the council of ministers falls upon his enemy meets with total ruin as a result of his imprudence.

इति मन्त्रबलान्महीपतिर्महतो दुष्टभुजङ्गमानिव।
विनयेन्नयमार्गमास्थितो वशमुद्योगसमन्वितो रिपून्।।58।।

प्रकरणनुष्ठानफलमाह—इतीत्यादि। महतो रिपूनिति सम्बन्धः। दुष्टभुजङ्गमानिव। तेऽपि मन्त्रबलादेव वशीक्रियन्ते। विनयेद् वशमिति सम्बन्धः। नयमार्गं षाड्गुण्यविधिम्। उद्योगसमन्वित इति उद्योगः [1]सर्वत्र प्रधानमिति मन्यते।।58।।

---

1. 'यभेव सम्पतन् निपतत्यात्ममना न तिष्ठति' इति मूलकोशेषु पाठः

It is only by virtue of having mantrabala power generating from comprehensive counsel that a ruler following the track of anya (different path) becomes capable of conquering the powerful enemies of the nature of venomous serpents.

(इति मन्त्रविकल्पो नाम सप्तदशं प्रकरणम्)

इति कामन्दकीये नीतिसारे मन्त्रविकल्पो नाम द्वादशः सर्गः।।

---

1. 'र्वप्र' ङपाठ

अथ त्रयोदशः सर्गः (Canto – 13)

अष्टादशं प्रकरणम्

दूतप्रचारप्रकरणम्

(Ambassdors and envoys)

कृतमन्त्रः सुमन्त्रज्ञो मन्त्रिणं मन्त्रिसम्मतम्।
यातव्याय प्रहिणुयाद् दूतं दूत्याभिमानिनम्।।1।।

अस्मिन् सर्गे प्रकरणद्वयं दूतप्रचार[1]श्चारविकल्पश्च। सन्धिविग्रहाद्यर्थो मन्त्रः। स च [2]स्वपरमतसम्पादनाधीनः। तच्च प्रस्तावज्ञाद् दूतात् चाराच्च[3] भवति। अतो मन्त्रविकल्पानन्तरमुभयविधिः[4] षाड्गुण्यशेषभूत[5] उच्यते। तत्र प्राधान्याद् [6]दूतविधिमाह—**कृतमन्त्र** इत्यादि। कृतमन्त्रः उद्धृतमन्त्रः। दूत्याभिमानिनमिति। यो मन्त्री दूतकर्मणि जाताभिमानो मन्त्रिसम्मतश्च, तं दूत्येन यातव्याय शत्रवे प्रयेषयेत्। तस्य कार्यसाधनयोग्यत्वात्।

Having earlier held the counsel a king should assign to the king against whom he intends to march should send an ambassador assured of his special abilities, whose selection is sanctioned by the counsel.

प्रगल्भः स्मृतिमान् वाग्मी शस्त्रे शास्त्रे च निष्ठितः।
अभ्यस्तकर्मा नृपतेर्दूतो भवितुमर्हति।।2।।

---

1. 'च' ङ् च० पाठ
2. 'स्वमतपरमतसाधना' ङ० पाठः
3. 'द्वा' क० ख० पाठः
4. 'घषा' क-ख-ग-घ पाठः
5. 'तस्तद्भेद उ' क० ख० ग० घ० पाठः
6. 'तमधिकृत्याह' ढ. च० पाठ

दूतगुणानाह—**प्रगल्भ** इत्यादि। अमात्यस्वरूपो दूतः। तस्य प्रकृतिसम्पदि गुणा उक्ता एव। पुनरिह कतिपयगुणोपादानं प्राधान्यार्थम्। निष्ठितः प्रकृष्टः। अभ्यस्तकर्मा बहुधा कृतदूत्यः।।2।।

A person, determined, accurate in memory, articulate, accomplished in arms and in the Shastras, and well experienced in all sorts of works, such a person only deserves to be a king's ambassador.

निसृष्टार्थो मितार्थश्च यथा शासनहारकः।
सामर्थ्यात् पादतो हीनो दूतस्तु त्रिविधः स्मृतः।।3।।

निसृष्टार्थः यथाकामेन निसृष्टः सन्ध्यादिरर्थो यस्मिन्। परिमितार्थः त्वयैतावद् वाच्यमिति। शासनहारकः लेखनहारकः। सामर्थ्यात् पादतो हीन इति अमात्यगुणांश्चतुर्धा विभज्य योजनीयम्। तत्र गुणसाकल्यं सामर्थ्यमस्य, तदुपेतो निसृष्टार्थो वेदितव्यः। तस्य पादतो हीनः पादत्रययुक्तः परिमितार्थः। तस्यापि पादतो हीनः पादद्वययुक्तः शासनहारकः। तेन भेद्यापेक्षया पादतो हीन इति द्विरावर्त्तनीयम्। उक्तञ्च "अमात्यसम्पदोपेतो निसृष्टार्थः, पादगुणहीनः परिमितार्थः, अर्धगुणहीनः शासनहारकः" (कौटि० अर्थ० 1.16.12) इति।।3।।

Ambassadors are said to be of three kinds, viz., those endowed with full powers, those with restricted powers and those merely carrying the errands of their masters. In respect of rank, the latter are inferior to the former respectively, in consequence of the lesser powers vested in them.

स भर्तुः शासनाद् गच्छेद् गन्तव्यं ह्युत्तरोत्तरम्।
स्ववाक्यपरवाक्यानामिति चेति च चिन्तयन्।।4।।

इदानीमेकविंशत्या श्लोकैस्तत्प्रचारमाह—**स भुर्रित्यादि**। स इति निसृष्टार्थः। शासनाद् आज्ञया। गन्तव्यं यातव्यं शत्रुम्। इति चेति शासनमेवं [1]वाच्यं, पर एवं वक्ष्यति, एवं तस्येदं प्रतिवाच्यम्, एवमतिसन्धातव्यमित्युत्तरोत्तरं चिन्तयन्।।4।।

---

[1] 'च्यः परः, स प्रवक्ष्यत्येवं, तस्यैवं, प्रतिवाच्यमेवम्, इति सन्धा' च० पाठः

In accordance with the commands of his masters, an ambassador, after complete deliberation as to the effect of his anticipated measures upon the dominions of his king, and on those of his enemies, should go to visit the latter, one after another.

अन्तपालांश्च कुर्वीत मित्राण्याटविकांस्तथा।
जलस्थानानि मार्गांश्च विद्यात् स्वबलसिद्धये॥5॥

अन्तपालान् जनपदान्तरक्षाधिकृतान् मित्राणि कुर्यादुपजापार्थं स्वबलद्धिये॥5॥

He should befriend the frontier as well as the forest tribes, and should find out the inland and navigable communications and easy routes, all for facilitating the unimpeded progress and march of his master's army.

नाविज्ञातः [1]पुरं शत्रोः प्रविशेन्न च संस[2]दम्।
कालमीक्षेत कार्यार्थमनुज्ञातश्च निषपतेत्॥6॥

अभियोगकाले **नाविज्ञातः प्रविशेत्** शङ्कानिवृत्तये। पुरं दुर्गम्। संसदं सभाम्। कालमीक्षेत कार्यार्थम् इदं कार्यमस्मिन् काले सिध्यतीति। अनुज्ञातः शत्रुणा विसर्जितः॥6॥

He should not enter the enemies' city or the court without knowing its positions. He should, for completing his purpose, wait for opportunities, and when permitted, enter the enemy's territory.

सारवत्तां च राष्ट्रस्य दुर्गं तद्गुप्तिमेव च।
छिद्रं च शत्रोर्जानीयात् कोशमित्रबलानि च॥7॥

सारवत्तां स्फीतताम्। दुर्गं जीनीयात् कियता बलेनाधिष्ठीयते विलुप्यते चेति। तद्गुप्तिं विषमस्थानम्। छिद्रम् अन्तःकोपादि॥7॥

He should inform himself about the stability of the

---

1. 'पदं श' ख० ग० पाठः
2. 'दि' ख० ग० पाठः

enemy's kingdom, about his forts and castles and their defenses and defects, and also his army, allies and treasures.

उद्यतेष्वपि शस्त्रेषु यथोक्तं शासनं वदेत्।
रागापरागौ जानीयाद् दृष्टिवक्रविचेष्टितैः।।8।।

उद्यतेष्वपीति प्राणबाधार्थमुत्खातेष्वपि, किमुत विभीषिकादौ। शासनं स्वामिसन्देशम्। रागापरागौ जानीयात् सन्देशमाचिख्यासुराख्याय वा। दृष्टिवक्रविचेष्टतैरिति। तत्रोर्ध्वाधस्तिर्यक्प्रसारितत्वं नैर्मल्यमुत्फुल्लता चेति दृष्टेर्विचेष्टितानि,[1] पुलकिता विकासश्चेति वक्रस्य। तै रागं लक्षयेद्, विपरीतैरपरागम्।।8।।

He should deliver the orders of his master, word per word, even if weapons be raised to strike him down. He should also apprise himself of the loyalty or disloyalty of the enemy's subjects by watching their movements of the face and hands etc.

रागापरागौ जानीयात् प्रकृतीनां च भर्तरि।
कृत्यपक्षोपजापं च [2]कुर्यादनभिलक्षितः।।10।।

प्रकृतीनां भर्तरति। शत्रुप्रकृतीनां स्वभर्तरि। कृत्यपक्षोपजापं कुर्यात् क्रुद्धलुब्धभीतावमानितान्[3] भिन्द्यादित्यर्थः। अनभिलक्षितः शत्रोः।।10।।

Apprising himself of the feelings auspicious or hostile of the subjects of the enemy to their lord the ambassador should create alienation among them himself remaining unnoticed

पृच्छमानोऽपि न ब्रूयात् स्वस्वामिप्रकृतिच्युतिम्।
ब्रूयात् प्रश्रितया वाचा सर्वं वेद भवानिति।।11।।

स्वस्वामिप्रकृतिच्युतिमिति। स्वभर्तुः प्रकृतीनामसारतामल्पतां च न ब्रूयात्, किन्तु [4]व्याजेनापसरेत्। यदाह– ब्रूयादिति। प्रश्रितया अनुकूलया। सर्वं वेद

---

[1] 'भावं स्वं रक्षेद् वि' क पाठः
[2] 'नि, नैर्मल्यं पु' च पाठः
[3] 'नो भि' च पाठः
[4] 'न प्रेरयेत्' क ख ग घ पाठः

भवानिति किमिहाविदितं युष्माकं चारचक्षुषां, वयं त्वात्मव्यापारमात्रविद एवेति॥11॥

Even when questioned on the subject, by the unfriendly king, he should not speak anything about the estrangement or weakness of the Prakritis of his own lord, but should in flattering language say— "Your majesty knows everything well."

कुलेन नाम्ना द्रव्येण कर्मणा च गरीयसा।
कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि।।12।।

कुलेन उदितोदितेन। नाम्ना दिगन्तरव्यापिना। द्रव्येण स्वपरोपकारिणा। कर्मणा सतामनिन्द्येन। उभयोरपि भर्तुः शत्रोश्च॥12॥

He should eulogise the enemy in four ways—by comparing him with the Vijigishu, the ambassador's masters in respect of his high lineage, his fame, his substantiality, and his commendable deeds.

विद्याशिल्पापदेशेन संश्लिष्योभयवेतनैः।
कृत्पक्षं विजानीयात् तद्भर्तुश्च विचेष्टितम्।।13।।

अपदेशेन व्याजेन शङ्कापरिहारार्थम्। उभयवेतनैः, ते हि पूर्वप्रणिहिताः कथयितारः। कृत्यपक्षम् उपजापार्थं, तद्भर्तुश्च विचेष्टितं प्रतिविधानार्थं विजानीयात्॥13॥

Coming into contact with the disloyal element of the enemy's state under the deception of instructing them in the four branches of learning and the five arts, he should with their help know the former's movements as also which party could be easily dissuaded over.

तीर्थाश्रमसुरस्थाने शास्त्रविज्ञानहेतुना।
तपस्विव्यञ्जनोपेतैः स्वचारैः सह सम्पतेत्।।14।।

तीर्थस्थान पुण्यनदीसमुद्देशः[1], आश्रमस्थानम् ऋषीणां निवासः, सुरस्थानं देवायतनम्। तत्र सम्पतेदति सम्बन्धः। तेषु तपस्विव्यञ्जनस्य सन्निधानात्।

---

[1] 'मुद्रादिनिर्देशः' क-ख-ग-घ पाठः

शास्त्रविज्ञानहेतुनेति सम्प्रधारणोपायः। तपस्विव्यञ्जनोपेतैरिति। तापसव्यञ्जनाः साध्वाचारा यत्र, तत्र परस्परं चाराणां सम्पातो भवति, तद्युक्तैः स्वचारैः सह सम्पतेत्, शत्रुप्रचारज्ञानार्थम्।।14।।

He should keep up communications with his own secret agents remaining disguised as ascetics in pursuit of knowledge in Tirthas, Asramas, and Surathanas.

प्रतापं कुलमैश्वर्यं त्यागमुत्थानसौष्ठवम्।
[1]अक्षुद्रतां दक्षतां च भर्तुर्भेद्येषु कीर्तयेत्।।15।।

उत्थानसौष्ठवम् उत्साहसम्पदम्। अक्षुद्रतां सत्सङ्ग्रहशीलताम्। दक्षताम् अनालस्यम्। भेद्येषु कृत्यपक्षेषु। तत्र क्रुद्धेषु प्रतापमुत्थानसौष्ठवं दाक्ष्यं (च) दर्शयेत्। त्रितयमप्यक्षुद्रतायुक्तं [2]भीतेषु। तदेव चतुष्टयं कुलसहितं मानिषु। लुब्धेषु त्यागैश्वर्ये।।15।।

He should point out to the alienable party in the enemy's country - his own master's manliness, high lineage, affluence, restraint, abundant energy, generosity and politeness.

भावमन्तर्गतं व्यक्त सुप्तो मत्तश्च भाषते।
तस्मादेकः स्वपेन्नित्यं [3]स्त्रियः पानं च वर्चयेत्।।16।।

सुप्तो मत्तश्चेति। तयोः स्वापमदाभ्यां परवशत्वात्। तस्मादेकः शयीत, नान्यैः।।16।।

He should put up with insulting language and avoid the influence of anger or lust on all circumstances. He should not lie down to sleep with others; and women he should keep his own purposes strictly secret, but know those of others.

काले व्रजति मेधावी न खिद्येतार्थसिद्धये।
क्षिप्यमाणं च बुध्येत कालं नानाविलोभनैः।।17।।

---

1. भद्रतां दक्षतां चापि भ ख-ग पाठः 'अक्षुद्रतां भद्रतां' क पाठः
2. 'हीनेषु' क-ख-ग-घ पाठः
3. 'द्यूतं पा' ख ग पाठः

एतेष्वहस्सु गच्छत्सु तत्र नः पृथिवीपतेः।
पश्यति व्यसनं किञ्चित् स्वयं वा कर्तुमीहते।।18।।
स्वान्तःप्रकोपमथवा विनेतुं नीतिवित्तमः।
सस्यादेः सङ्ग्रहं कर्तुं दुर्गे वा दुर्गसत्क्रियाम्।।19।।

न खिद्येत इहागतस्य मम बहवो दिवसा वर्तन्त इति। अर्थसिद्धये यथोपन्यस्तसन्धिविग्रहादिसिद्धये। क्षिप्यमाणं परेण स्वार्थं पश्यता। बुध्येत वक्ष्यमाणप्रकारेण। नानाविलोभनैः स्थीयतां ताव[1]दभिमतं ते करिष्यामीति।।17।।

नः पृथिवीपतेः अस्माकं राज्ञः। व्यसनं दैवं मानुषं वा पश्यति। तत्र सन्दध्यात्। स्वयं वा सामन्ताटविकादीनुत्थाप्य व्यसनं कर्तुमीहते अभियोक्ष्यामीति।।18।।

स्वान्तःप्रकोपमिति। स्वयं वा मन्त्र्यादिप्रकोपमपनेतुमीहते यथेष्टं सन्धास्य इति। सस्यादेः सङ्ग्रहं कर्तुमीहते परिक्षीणपुराणभक्त। अगृहीतनवभक्तं परमभियोक्ष्यामीति। दुर्गसत्क्रियां[2] भिन्नस्फुटितप्राकारादिसंस्कारं कर्तुमीहते दुर्गमविषह्यमाश्रित्य परकर्माण्युपहनिष्यामीति।।19।।

An intelligent ambassador should not be depressed and hopeless regarding the accomplishment of his projects, although he would have to wait a considerable length of time. But by various tempting offers and baits to the subjects and officers of the enemy, he should study the passing times.

If during these days that pass away unprofitably, he does not find any defect in the administration of the ruler of the earth -the enemy, the ambassador—if he is a sound politician and earnestly desirous of the advancement of his own party - king—should wait patiently for advantages of time and place", during a period when the enemy offended with his own idleness would himself intend to undertake something, such as, the provocation of his own Parsnigraha, the appeasement of the disaffected section of his subjects, the storing of his

---

1. 'वद् इदमभिहितमिदं ते' क-ख-ग-घ पाठः
2. 'यां प्राकारादिभिर्विषयसं' क-ख पाठः

forts with stocks of food grains and their repairs. He should console his mind with the thought that the enemy would, of his own accord, march against the ambassador's master, and he should struggle accordingly.

स्वपक्षाभ्युदयाकाङ्क्षी देशकालावुदीक्षते।
उत यात्रां स्वयं दातुं येनास्मान्न समीहते।।20।।

स्वपक्षो मित्रं, यद् विजिगीषुमभियुञ्जानस्य साहाय्यं दास्यति, तस्य वा वृद्धाकाङ्क्षी तदनुगुणौ देशकालावुदीक्षते। स्वयं वा यात्रां दातुं स्वसैन्यव्यायामयोग्यौ देशकालावुदीक्षते, येनास्मान्न समीहते न प्रेषयति, प्रेषिते हि विजिगीषुः प्रतिविधास्यति।।20।।

When day after day the time for action is delayed, an intelligent ambassador should consider, whether or not the enemy is delaying, only to let the opportunity for ambassador's master to attack the enemy while slip away.

यात्राकालक्रियार्थी वा तत्र चायं विलम्बते।
काले विक्षिप्यमाणे तु तर्कयेदिति पण्डितः।।21।।

यात्राकालक्रियार्थी वेति। यात्राकाले यत् परबलापेक्षया बलसमुत्थानकर्म ततोऽपेक्षी (नार्थी?) वा। तत्र च कर्मण्ययं प्रबिलम्बमानो न प्रेषयति।।21।।

When it will be evident that the time for action has arrived, he should go back directly to the kingdom of his lord; or remaining there -in the enemy's territory, he should communicate to his master all the important points of his information.

कार्यकालव्यपेतं च व्यक्तं ज्ञात्वा विनिष्पतेत्।
तिष्ठन् वार्ताविशेषार्थी भर्त्रे सर्वं निवेदयेत्।।22।।
रिपोः [1]शत्रुपरिच्छेदः सुहृद्बन्धुविभेदनम्।
दुर्गकोशबलज्ञानं कृत्यपक्षोपसङ्ग्रहः।।23।।

---

1. 'क्ति' क पाठः

कार्यकालव्यपेतं[1] कार्यकालयोरतिक्रमणम्। वार्त्ताविशेषार्थीति। अस्माननादृत्यान्यत्रानेन सन्धिविग्रहादिकं प्रस्तुतं, तत्रास्य किं स्थितमिति[3] निश्चयार्थी चेत्, तदा तत्रैव तिष्ठन् सर्वं यथोक्तं भर्त्रे निवेदयेत् प्रतिविधानार्थम्।।22।।

सङ्क्षेपेण दूतव्यापारमाह– रिपोरित्यादि। शत्रुपरिच्छेद एतावन्तोस्य शत्रव इति। बलं सैन्यम्।।23।।

To find out the enemies of the enemy, to alienate his friends and relatives from him, to know exactly the state of his forts, finances and army, to determine the course of action to be taken, to dissuade over to his ambassador's side the governors of the provinces of the enemy's territory, and to know all the particulars of the route country through which march against the enemy is intended,—these are said to be the duties of a Duta.

राष्ट्राटव्यन्तपालानामात्मसात्करणं तथा।
युद्धापसारभूज्ञानं दूतकर्मेति कीर्तितम्।।24।।

अटवी तात्स्थ्यादाटविका:। [3]युद्धापसारभूज्ञानमिति हस्त्यश्वरथपदातीनामेता युद्धयोग्या भूमय:, एषा च बलवताभियुक्तस्य कलत्रस्थानमिति।।24।।

A ruler of earth should harass his enemy by means of his own Dutas on his own part, he should be perfectly aware of the movements of the enemy's Dutas.

दूतेनैव नरेन्द्रस्तु [4]कुर्यादरिविमर्शनम्।
स्वपक्षे च विजानीयात् परदूतविचेष्टितम्।।25।।

यथा दूतामात्येन यथोक्तं विमर्शनं कुर्यात्, तथा किमन्येनाप्यमात्येनेत्याह– दूतेनैवेति, अन्यस्य परमण्डलगमनासम्भवात्। (वि)जानीयात् परदूतविचेष्टितं, यस्मात् परो विजिगीषुपदे च सञ्चारिणं दूतं प्रेषयति।।25।।

---

1. 'व्यवायं का' ङ पाठ:
2. 'ति तन्नि' क ख ग घ पाठ:
3. 'वसर' च पाठ:
4. 'जानीयादरिचेष्टितम्' ख ग पाठ:,

A person skilled in the elucidation of internal opinions by inference and by external gestures, accurate of memory, polite and soft in speech, swift in movements, capable of bearing up with all sorts of privations and difficulties, ready-witted and expert in everything,—such a person is fit to become a ambassador.

एकोनविंशं प्रकरणम्

दूतचरविकल्पप्रकरणम्

(Varities of spies)

तर्केङ्गितज्ञः स्मृतिमान् मृ[1]दुर्लघुपरिक्रमः।
क्लेशायाससहो दक्षश्चारः स्यात् प्रतिपत्तिमान्।।26।।

यथा दूतादरिविमर्शनं तथा चरादपीति चरविकल्प उच्यते पञ्चविंशत्या श्लोकैः। तत्र चरः किंगुणः स्यादित्याह– तर्केङ्गितज्ञ इत्यादि। तर्क ऊहः, गूढव[2]स्तूत्प्रेक्षणमिति यावत्। इङ्गितम् अन्यथावृत्तिः। मृदुरनु[3]द्भटः। स ह्यनुपलक्षितो भवति। लघुपरिक्रमः शीघ्रगमनक्षमः। प्रतिपत्तिमान् भयस्खलितेष्वाशु प्रतिविधाता।।26।।

Shrewd spies in the mask of mendicants, artisans and merchants should move about in the kingdom and outside collecting the views of all classes of men.

तपस्विलिङ्गिनो धूर्ताः शिल्पपण्योपजीविनः।
चराश्चरेयः परितः पिबन्तो जगतां मतम्।।27।।

तस्य व्यापारमाह– तपस्वीत्यादि। तापसलिङ्गित्वं शिल्पपण्योपजीवित्यं च सञ्चरणोपायः। धूर्ताः परातिसन्धानचतुराः। परितः पिबन्तः विदन्तः विशेयुर्नृपतेः सकाशमिति सम्बन्धः।।27।।

Shrewd spies disguised as ascetics, traders or artisans should go about in all directions imparting themselves of the opinion of the world i.e., the subjects or the public at large.

---

1. 'लघुर्मृदुप' ख-ग पाठः
2. 'प्रस्तुतोत्प्रे' च पाठः
3. 'त्क' क-ख-ग-घ पाठः

निर्गच्छेयुर्विशेयुश्च सर्ववार्ताविदोऽन्वहम्।
चराः सकाशं नृपतेश्चक्षुर्दूरचरं हि ते।।28।।

निर्गच्छेयुः तस्यैव सकाशादित्यर्थः। अन्वहं प्रतिदिनम्। चक्षुर्दूरचरं हि ते, इतरत् तु चक्षुरर्वाकचरम्।।28।।

Spies well-informed in everything -important topic or question of the times, should every day come to and go away from i.e. communicate with the ruler of earth, for they are the eyes of the king, that enable him to look at distant things.

सूक्ष्मसूत्रप्रचारेण पश्येद् वैरिविचेष्टितम्।
स्वपन्नपि हि जागर्ति चारचक्षुर्महीपतिः।।29।।

सूक्ष्मसूत्रप्रचारेणेति। चारेणेति शेषः। पटे ह्यूयमानं सूत्रं सञ्चरत् सूक्ष्मत्वान्नोपलभ्यते, तस्येव प्रचारोऽस्येति विग्रहः।।29।।

In order to penetrate into and reveal the secret of secrets of the enemy, a spy should cautiously and stealthily watch his enemy's movements. A ruler of earth, having the spies for his eyes, is awake even when he is asleep.

(इति दूतप्रचारो नामाष्टादशं प्रकरणम्)

विवस्वानिव तेजोभिर्नभस्वानिव चेष्टितैः।
राजा चारैर्जगत् कृत्स्नं व्याप्नुयाल्लोकसम्मतैः।।30।।

नभस्वान्। वायुः। चेष्टितैः गतिभिः। जगत् कृत्स्नं व्याप्नुयात् तन्मत[1]परिच्छित्तये। लोकसम्मतैरिति। यस्य यद्देशभाषादिष्वभिरतिरस्ति तस्य तदीयदेशादितया सम्मतैः।।30।।

A king should have all his and his enemy's dominions encompassed with spies who resemble the sun in energy and the wind in their movements, and whose selection is approved of by the public.

---

1. 'न्त्र' क-ख-ग-घ पाठः

चारचक्षुर्नरेन्द्रस्तु सम्पतेत् तेन भूयसा।
अनेनासम्पतन् मार्गात् पतत्यन्धः समेऽपि हि।।31।।

तेन भूयसा चरसंज्ञकेन चक्षुषा प्रभूततरेण। तेनासम्पतन्, किन्तु मांसचक्षुषैव प्रवर्तते। स च कृत्स्नलोकतत्त्वापरिज्ञानान्मूढोऽन्धोऽध[1] पतति न[2] पश्यति। समेऽपि स्थले। (वाय?) विषममार्गे (सतां?) किम्पुनरित्यर्थाद्।।31।।

Spies are the eyes of the ruler of earth; he should always look through their medium, he that does not look through their medium, stumbles down, out of ignorance, even on level grounds; for he is said to be blind.

सर्वसम्पत्समुदयं सर्वावस्थाविचेष्टितम्।
चारेण द्विषतां विद्यात् तद्देशप्रार्थनादि च।।32।।

वैरिविचेष्टितमिति सामान्येनोक्तं विशेषेणाह– सर्वसम्पत्समुदयमिति। सर्वेषाममात्यादीनां सम्पदं समुदयं च कोशम्। सर्वावस्थाविचेष्टितं सर्वासु व्ययमानव्यवस्थासु विचेष्टितम्। तद्देशप्रार्थनादि चेति। [3]आदिशब्दादर्थकोशप्रार्थनम्।।32।।

Through the medium of his spies, a king should know the growth and advancement of his rivals prosperity, their movements in all circumstances, and the purposes and intentions of their subjects of those who inhabit their territories.

प्रकाशश्चाप्रकाशश्च चरस्त द्विविधः स्मृतः।
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूत उच्यते।।33।।

यथा चरेण विद्यात् तथा दूतेनापि, तस्यापि[4] चरत्वादित्याह– प्रकाश इति। अयम् अनन्तरोक्तोऽप्रकाशः। प्रकाशो दूतो यः प्रागुक्तः, सोऽपि चरः परचर्यासु चरतीति कृत्वा।।33।।

---

1. 'ढोऽधः' क-ख-ग-घ पाठः
2. 'विनश्य' क-ख-ग-घ च पाठः
3. 'द् दण्डको' ङ पाठः
4. 'पि तत्स्वरू (पाद्? पत्वाद्) इत्या' ङ पाठः, 'तत्स्वरूपाचारत्वादि (?)' क-ख पाठः

Envoys are said to be of two kinds—viz, secret and public. Secret emissaries have been particularized above; a public envoy is called a Duta or an ambassador.

चरेण प्रचरेत् प्राज्ञः सूत्रेणर्त्विगिवाध्वरे।
दूते सन्धानमायत्तं चरे चर्या प्रतिष्ठिता।।34।।

सूत्रेणेति कात्यायनीयादियज्ञसूत्रेण। दूते सन्धानमायत्तं, प्राधान्येन तस्य सन्धिविग्रहनियुक्तत्वात्। इतरदानुषिङ्गिकं कर्म वेदितव्यम्। चरे चर्या प्रतिष्ठिता अप्रकाशे चरे परप्रचारज्ञानं [1]निश्चितम्।।34।।

Guided by his spies, a king should proceed to do any work, like Ritvijas in a sacrifice being guided by the Sutras the spy-service is said to be well-established when the ambassador is kept well-informed by the spies.

संस्थानवत्यः संस्थाश्च [2]कार्याः कार्यसमृद्धये।
तिष्ठेयुर्यासु सञ्चाराः परचर्योपवेदिनः।।35।।

अप्रकाशाश्चराः संस्थानामानश्च सन्तीत्याह– संस्थानवत्य इत्यादि। संस्थानं वेषश्चरितं च, तदुपेताः संस्थाश्चराः कार्याः। सञ्चाराः वक्ष्यमाणाः।।35।।

तीक्ष्णः प्रव्रजिता चैव [3]सत्री रसद एव च।
एते प्रधानं सञ्चाराः सर्वे नान्योन्यवेदिनः।।

A Tikshana, a religious mendicant, a sacrificer or a person of purest character—these are the disguises -under which spies roam through a king's mandala; when they the spies are thus disguised, they do not recognise one another.

For the successful termination of their missions, a site for the habitation of the spies should be selected, where there is a constant gathering of people. There the spies should stay being duly served and looked after.

---

[1] 'स्थितम्' ङ पाठः

[2] 'कुर्यात् कार्यप्रसिद्ध' क पाठः

[3] 'शस्त्री' मूलकोशपाठः

वणिक् कृषीवलो लिङ्गी भिक्षुकोऽध्यापकस्तथा।
संस्थाः स्युश्चारसंस्थित्यै दत्तदायाः सुखाशयाः।।36।।

किंसंस्थानाः संस्थाः स्युरित्याह– वणिगित्यादि। वणिग् वैदेहक इति द्वितीयनामा। कृषीवलो गृहपतिरिति द्वितीयनामा। लिङ्गी मुण्डो जटिलो वा तापसः। भिक्षुक इति कुत्सायां कन्, तस्य प्रव्रज्याप्रत्यवसितत्वात्। तस्योदास्थित इति द्वितीयं नाम। अध्यापकः छात्रवृत्त्या स्थितः। तस्य कापटिक इत्यपरं नाम। तथाचोक्तं 'गूढपुरुषानुत्पादयेत् कापटिकोदास्थितगृहपतिकवैदेहकतापसव्यञ्जनान् सत्रितीक्ष्णरसदभिक्षुकीश्चे (कौटि॰ अर्थ॰ 1.11.7)'ति। एषु पञ्चसु सञ्चाराः सन्तिष्ठन्त इति संस्थाः। यदाह– चारसंस्थित्यै इति। सञ्चाराणां हि वैदेहकादिभिर्ग्रासाच्छादनादिसम्पादनात् तैरपि तत्र प्रचारार्पणाद्। [1]दत्तदायाः[2] कल्पितवृत्तयः। सुखाशया इति। आशयशब्दोऽत्रावस्थाने वर्त्तते। सुखावस्थाना इत्यर्थः। तथा ह्याशयाशो वह्निरुच्यते। अन्ये सुखाश्रया इति स्पष्टमेव पठन्ति।।36।।

In the residence of the spies there should stay persons disguised as traders, small merchants, husbandmen, and religious mendicants, teachers of religion, pure-hearted ascetics and soldiers.

स्वपक्षे परपक्षे च यावान् कश्चिद् विवक्षितः।
सर्वस्मिंस्तत्र सञ्चारास्तिष्ठेयुश्चित्तवेदिनः।।37।।

स्वपक्षे परपक्षे च स्वविषये परविषये च। यावान् कश्चिद् विवक्षितः कार्ययोगितया। तत्र कार्ययोगीन्यष्टादश तीर्थानि सम्भवन्ति। तद्यथा 'मन्त्रिपुरोहितसेनापतियुवराजदौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसन्निधातृप्रदेष्टनायकपौरव्यावहारिकपरिषदध्यक्षदण्डदुर्गान्तपालाटविकाः'। तत्र सर्वस्मिंस्तिष्ठेयुः।।37।।

Spies skilled in studying the hearts of men should be

---

1. 'त' ङ च पाठः
2. 'यात् क' ङ पाठः
1. 'द्य ते' ङ पाठः

posted in the territory of all kings who are within the mandala of the Vijigisu or within that of his enemy.

स्वपक्षे परपक्षे वा यो न वेद[1] चिकीर्षितम्।
जाग्रत्स्वरिषु सुप्तोऽसौ न भूयः प्रतिबुध्यते।।39।।

यो न वेद चिकीर्षितं तीर्थप्रमिहितैः सञ्चारैः। जाग्रस्तु विजिगीषोश्छिद्रान्वेषणतत्परेषु। सुप्तो निश्चिन्तः। न प्रतिबुध्यते न पुनश्चेष्टते, विनाशाघ्रातत्वात्।।39।।

The king who does not know the movements of the kings of his own mandala or of those of his enemy's mandala, is said to be asleep, although he is wide awake, and he never wakes up from his sleep.

कारणाकारणक्रुद्धान् बुध्येत स्वपरिग्रहे।
पापानकारणकुद्धान् [2]तूष्णींदण्डेन साधयेत्।।40।।

तत्र स्वपक्षे विजिगीषोश्चरैः सह व्यापारमाह– कारणाकारणक्रुद्धानिति। विजिगीषोर्देषेण वा क्रुद्धान् बुध्येत। सत्रिभिरिति शेषः। स्वपरिग्रहे स्वपक्षे। अपापांस्तु कारणक्रुद्धान् कारणनिवृत्त्या परिक्लेशार्थहरणाभ्यां यथायोगं हन्यात्। अपापांस्तु कारणक्रुद्धान् कारणनिवृत्त्या परिक्लेशार्थहरणाभ्यां यथायोगं साधयेदित्यर्थोक्तम्।।40।।

Through his spies a king should know those enemies who have reason to be infuriated with him and also those who are so without any reason, he should by secret measures of punishment do away with those among his own household, who are seditious and angry with him without any cause whatever.

ये तु कारणतः कुद्धास्तान् वशीकृत्य संविशेत्।
शमयेद् दानमानाभ्यां छिद्रमणवप्यरेर्मुखम्।।41।।

तान् वशीकृत्य वक्ष्यमाणप्रकारेण संविशेत् सुप्यात्, निश्चिन्तः स्यादित्यर्थः। छिद्रं प्रकृतिदोषाः क्रोधलोभभयमानाख्याः। तच्चारेर्मुखं द्वारं, तेन तस्य प्रवेशात्।

---

[1] 'वेत्ति चि' मूलकोशपाठः
[2] 'तीक्ष्णद' ख. ग. पाठः

तदल्पमप्युपेक्षितमनर्थाय भवति। तत्र कुद्धं मानिनं च दानमानाभ्यां द्वियोगेन शमयेत्। शेषयोः शमनं वक्ष्यति॥41॥

Those who have reason to the exasperated with the king, should be conciliated by gifts and the bestowal of honors and then the king should live together with them, having thus subjugated them won them over to his side and in this way he should amend his own faults-which might have given his enemy a control.

कण्टकान् मुखभङ्गेन राज्यस्य प्रशमं नयेत्।
उद्युक्तः सामदानाभ्यां [1]छिद्रं च परिपूरयेत्॥42॥

कण्टकान् [2]राज्यस्येति सम्बन्धः। मुखभङ्गेन प्रधानवधेन, हते मुख्ये शेषाणां प्रशमनात्। छिद्रं च परिपूरयेदिति। भीतं लुब्धं च सामदानाभ्यां द्वियोगेन परितोषयेत्॥42॥

He should preserve the peace of his kingdom by giving the wicked and; the seditious the rebuff they deserve. With all his endeavors, he should mend his weakness by conciliation, gift or bribery.

अणुनापि प्रविश्यारिश्छिद्रेण बलवत्तरम्[3]।
निःशेषं मार्जयेद् राज्यं यानपात्रमिवोदकम्॥43॥

बलवत्तरं ज्यायांसम्। मार्जयेत् नाशयेत्॥43॥

Taking 'advantage of the slightest weakness of even the most powerful enemy, a king should cause his enemy's kingdom to sink completely in the sea of distress and destructions , even as water causes a drinking cup to sink down in it by entering it through the smallest hole.

जडमूकान्धबधिरच्छद्मानः पण्डकास्तथा।
किरातवामनाः कुब्जास्तद्विधा ये च कारवः॥44॥

---

[1] 'द्राणि प' मूलकोशपाठः
[2] 'आश्रित्येति' ङ. पाठः
[3] 'रः' ख. ग. पाठः

परपक्षे प्रणिहितानां व्यापारमाह– जडेत्यादि। जडादिच्छद्मान: पाषण्डकादयश्चान्तः पुरप्रवेशानर्हा अविश्वास्याश्च भवन्ति। तद्विधा ये च कारवो वामनकुब्जादिरूपा वर्धक्यादय:।।44।।

Persons simulating to be idiot, or deaf, or blind or dumb or eunuchs, and Kiratas and dwarfs, and hunchbacks and such other agents.

[1]भिक्षुक्यश्चारणा दास्यो मालाकाराः कलाविदः।
अन्तः पुरगतां [2]वार्तां निर्हरेयुरलक्षिताः।।45।।

चारणा नटनर्त्तकादय:। कलाविदश्चित्रादिकुशला:, ये छत्रादिधारणेनान्तः पुरप्रवेशार्हा:।।45।।

Disguised religious mendicants and Charanas and maid-servants and men versed in all arts and acts,' should gather undetected, the information regarding a king's house hold.

छत्रव्यजनभृङ्गारयानवाहनधारिणः।
महामात्रा बहिर्वार्तां विद्युरन्ये च तद्विधाः।।46।।
अन्नव्यञ्जनकर्तारः कल्पकाः स्नापकास्तथा।
प्रसाधका भोजकाश्च गात्रसंवाहका अपि।।47।।

महामात्राः हस्तिशिक्षानियुक्ता:। अन्ये च तद्विधाः रथारोहाश्वारोहादयः महाश्वपतिकादय:।।46।।

अन्नव्यञ्जनकर्त्तार:[3] भक्तसूपकादिरन्धका:। कल्पकाः नापिता:। गात्रसंवाहकाः मर्दका:।।47।।

Persons disguised as bearers of the royal Umbrella, yak-tails or fans, pitchers, and palanquins, and horse-boys and grooms and other such servants, should keep information about the doings of the high state officials.

The cooks, the bed-room servants, the vigakas-chamberlain, the attendants at the table, the shampooers.

---

1. 'का' क पाठः
2. 'र्तामाहरेयुश्च ल' क पाठः
3. 'रः सूदा भक्तरन्धकाः' क-ख-ग-घ पाठः

जलताम्बूलकुसुमगन्धभूषणदायकाः।
कर्तव्या रसदा ह्येते ये चान्येऽभ्याशवर्तिनः।।48।।

दायकशब्दो जलादिभिः प्रत्येकं योज्यः। अभ्याशवर्त्तिनः समीपवर्त्तिनः।।48।।

The orderlies entrusted with serving up water, betels, flowers, perfumes and ornaments, these and others like them that always keep near the king, should be made instrumental in administering poison to him.

संज्ञाभिर्म्लेच्छितैर्लेख्यैराकारैरिङ्गितैरपि।
सञ्चारयेयुरव्यग्राश्चाराश्चर्यां परस्परम्।।49।।

अन्तःपुरगतानां बहिरनिष्कासे प्रसारसञ्चारणोपायमाह– संज्ञाभिरिति। पूर्वसङ्केतितवीणादिवाद्यसंज्ञाभिः। म्लेच्छितैः अव्यक्तवचनैः। लेख्यैर्गूढैः। आकारैः मुखनयनादिविकारैः। इङ्गितैश्चेष्टितैः। सञ्चारयेयुः परस्परमिति सम्बन्धः। अव्यग्राः सावधानाः।।49।।

Cool-headed spies should study the conduct of all the high state officials through signs, gestures, bodily appearances, the secret tokens they use and the letters they write.

समापिबन्तो जगतां मतानि जलानि भूमेरिव सूर्यपादाः।
अनेकशिल्पाध्ययनप्रवीणाश्चाराश्चरेयुर्बहुलिङ्गिरूपाः[1]।।50।।

सङ्क्षेपेण च व्यवहारमाह– अनेकशिल्पाध्ययनप्रवीणाः विश्वासार्थं बहुविधलिङ्गिरूपाः।।50।।

Spies versed in all acts and in all arts, assuming various disguises, should roam in every part of a mandala, imbibing public opinion like the solar rays imbibing moisture from the earth.

येन प्रकारेण परानुपेयात् परावरज्ञः स्वसमृद्धिहेतोः।
तमात्मनि स्वस्थमतिश्च तज्ज्ञैः प्रयुज्यमानं च परेण विद्यात्।।51।।

मुण्डजटिलादिरूपेण यथा विजिगीषुः सञ्चारान् प्रणिधत्ते, तथा परोऽपीति तत्प्रतिविधानं श्लोकेनाह– येन प्रकारेणेति। तापसव्यञ्जनादिप्रणिधानप्रकारेण।

---

1. ‘ङ्ग’ क ग पाठः

परावरज्ञः परात्मवित्। तत्प्रकारेण स्वस्थमतिः सावधानः। तज्ज्ञैः तत्प्रकारज्ञैः स्वचरैर्विद्यादिति सम्बन्धः॥51॥

An intelligent Vijigisu conversant with the Shastras and the ways of the world, should be cognizant of the fact that as he through his spies - strives to play his enemy's false, so these latter also try to pay him back in his own coin, by engaging-spies to watch over him.

(इति दूतचरविकल्पो नामैकोनविंश प्रकरणम्)

इति कामन्दकीये नीतिसारे राजोपदेशे दूतप्रचारो दूतचरविकल्पश्च त्रयोदशः सर्गः।

अथ चतुर्दशः सर्गः (Canto – 14)

विंशं प्रकरणम्

उत्साहप्रशंसाप्रकरणम्

(In Praise of Energy and Initiative)

अन्वहं चरचर्याभिर्विफले दूतचेष्टिते।
यायाद् यथोक्तयानस्तु सूक्ष्मबुद्धिपुरस्सरः।।1।।

सन्धिविग्रहार्यं प्रहितेऽपि दूते यथाभिहिततापसव्यञ्जनादिप्रणिधानप्रकारेण च यथाप्रस्तुतकार्यासिद्धौ स्वयमेव यायादित्याह– अन्वहमित्यादि। चरचर्याभिरिति चारप्रचारैः सह। विफले इदमुक्तं भवति– सन्धाने यो मन्त्रिव्यापारः, चाराणां च कृत्यपक्षोपजापादौ येऽन्वहं प्रचाराः, तेषु विफलेषु, यदि वा चरैरेव कृतोपजापत्वाद् विफलीकृते दूतचेष्टिते। यथोक्तयानः 'उत्कृष्टबलवीर्यस्य...... गुणानुरक्तप्रकृतेर्यात्रा यानम्' (स० 11 श्लो० 1) इत्यनेन शक्तिदेशकालबलान्वितो यायादित्यर्थः। सूक्ष्मबुद्धिपुरस्सरः सूक्ष्मया बुद्धा प्राङ्निरूपिताभ्युच्चयत्वात् तत्पुरस्सरः॥1॥

When a king, from the daily reports of the spies, come to know of the failure of his embassy to the enemy, he should set out with hostile intentions against him, according to the prescribed rules of march, relying on his own intellect .

सूक्ष्मा सत्त्वप्रयत्नाभ्यां दृढं बुद्धिरधिष्ठिता।
प्रसूते हि फलं श्रीमदरणीव हुताशनम्।।2।।

अभ्युच्चयश्च व्यसनिनो न सम्भवतीति तत्प्रतीकारार्थं तावत् सर्गद्वयेन षाड्गुण्यशेषभूता व्यसनचिन्ता क्रियते। तत्रास्मिन् सर्गे प्रकरणत्रयम् उत्साहप्रशंसा प्रकृतिकर्म प्रकृतिव्यसनानि च। तत्रोत्साहपूर्वकत्वाद् यानादिचिन्ताया इति तत्प्रशंसोच्यते षोडशभिः श्लोकैः। तत्र सूक्ष्मापि बुद्धिः सत्त्वानधिष्ठिता निष्प्रयत्ना

चाफलेत्याह– सूक्ष्मेत्यादि। सत्त्वप्रयत्नाभ्यामिति। सत्त्वं व्यसनेऽभ्युदये चाविकारकरम् अध्यवसायकरं वा, प्रयत्नो बुद्धेर्व्यापार ऊहापाहेलक्षणः आभ्यां दृढमत्यर्थम् अधिष्ठिता सूक्ष्मा बुद्धिः फलं प्रसूते। श्रीमद् उत्कृष्टम्॥2॥

Like fuels producing fire, a keen and firm consideration, controlled over by self-control and persistence, yields many happy results.

धातोश्चामीकरमिव सर्पिर्निर्मथनादिव।
बुद्धिप्रयत्नोपगताद् व्यवसायाद् ध्रुवं फलम्॥3॥

उत्साहोऽपि बुद्धिप्रयत्नपूर्वकः क्रियमाणः फलवानित्याह– धातोरित्यादि। बुद्धिप्रयत्नोपगतादिति। यः सत्त्वाधिष्ठिताया बुद्धेर्व्यापारः तद्युक्तादित्यर्थः[1]। व्यवसायादिति। समुत्थानमुत्साहो व्यवसाय इत्येकार्थाः। तस्मात् त्रितययोगादेव फलम्॥3॥

Just as metallic ores are sure to yield the precious gold, and the churning of the curd yields butter, so, earnest endeavor supported by intelligence and perseverance is certain to be topped with accomplishments.

धीमानुत्साहसम्पन्नः [2]व्यवसायसमन्वितः।
भाजनं परमं श्रीणामपामिव महार्णवः॥4॥

तदेव स्फुटयन्नाह– धीमानुत्साहसम्पन्नो व्यव[3]सायसमन्वित इति। तत्र बुद्धेः कार्यालोचनम्, उत्साहाद् योगक्षेमसाधनं, सत्त्वात् फलाध्यवसानमिति॥4॥

An intelligent and 'energetic king possessed of the Prabhusakti, becomes the excellent receptacle for all prosperity, even as the mighty river is for all waters.

नलिनीवाम्बुसम्पत्त्या बुद्धा श्रीः परिपाल्यते।
उत्थानाध्यवसायाभ्यां विस्तारमुपनीयते॥5॥

---

1. 'र्थः। स' क-ख-ग-घ पाठः
2. 'प्रभुशक्त्या स' मूलकोशपाठः,
3. 'वहारस' ङ पाठः

तमेव व्यापारं दर्शयति– नलिनीवेत्यादिना। बुद्धा श्रीः परिपाल्यते, तया रक्षणोपायस्य चिन्त्यमानत्वात्। उत्थानाध्यवसायाभ्यां विस्तारमुपनीयते, अनुद्युक्तस्यानध्यवस्यतो भूतिविस्तारासम्भवात्।।5।।

Like wealth of waters preserving the lotus, intelligence alone that preserves the royal prosperity; and this prosperity is carried to grandeur only by energy and determination.

लक्ष्मीरुत्साहसम्पन्नाद् बुद्धिशुद्धं प्रसर्पतः।
नापैति कायाच्छायेव विस्तारं चोपगच्छति।।6।।

तथा त्रितययोगाद् विभूतेस्तद्भावभाविता प्रतीपप्रार्थना चेति श्लोकद्वयेन दर्शयति–लक्ष्मीरित्यादि। बुद्धिशुद्धमिति क्रियाविशेषणम्। प्रसर्पतः लक्ष्मीमध्यवस्यत इत्यर्थः। नापैतिच्छायेवेति तद्भावभावितां दर्शयति।।6।।

Prosperity never leaves an energetic king who follows the commands of his intelligence, even like a shadow never leaves the body; but it goes on increasing every day.

वीतव्यसनमश्रान्तं महोत्साहं महामतिम्।
प्रविशन्ति महालक्ष्म्यः सरित्पतिमिवापगाः।।7।।

वीतव्यसनं त्रितययोगादेव। अश्रान्तम् असन्तुष्टं महासत्त्वम्। महामतिं सूक्ष्मबुद्धिम्। प्रविशन्ति लक्ष्म्य इति। ता एव प्रतीपं प्रार्थयन्त इत्यर्थः।।7।।

Like rivers flowing into the ocean, prosperity ever flows down on a king, who is free from the influence of the Vyasanas and is untiring, highly energetic, and intelligent.

सत्त्वबुद्ध्युपपन्नोऽपि व्यसनग्रस्तमानसः।
श्रीभिः षण्ड इव स्त्रीभिरलसः परिभूयते।।8।।

त्रयाणामप्युत्साहः प्रधानं, तस्य साधकतमत्वादित्याह–सत्त्वबुद्धुपपन्नोऽपीत्यादि। व्यसनग्रस्तमानस उत्साहवैकल्यादेव।।8।।

An idle king whose mind is affected by the Influence of the Vyasanas is, in spite of his possessing many good qualities and a keen intelligence, cast off by the goddess of prosperity, even as eunuchs leave company of women.

उत्थानेनैधयेत् सत्त्वमिन्धनेनेव पावकम्।
श्रि[1]यो हि सततोत्थायी दुर्बलोऽपि समश्नुते।।9।।

उत्थानेनैधयेत् सत्त्वमिति [4]उत्साहस्यैव प्राधान्यं दर्शयति। सततमुत्साहेन संवर्धयेत् सत्त्वम्, अन्यथा तदागन्तुकत्वादपैत्यपि। ततश्चाध्यवसायाभावान्नासौ फलमश्नुते। सततोत्थायि[5]तायां तु नायं दोष इत्याह– श्रियो हीत्यादि। दुर्बलोऽपि कोशदण्डहीनोऽपि।।9।।

By constant activity he should add to everything, like adding fuel to the fire. Even a weak king, if he is ever robust, reaps nothing but prosperity.

भोक्तुं पुरुषकारेण दुष्टां स्त्रियमिव श्रियम्।
व्यवसायं सदैवेच्छेन्न हि क्लीबवदाचरेत्।।10।।

शौर्यममर्षः शैघ्र्यं दाक्ष्यं चेत्युत्साहगुणाश्चत्वारः। तत्र 'श्रीभिरलसः परिभूयत' इत्यनेन दाक्ष्यमुदाहृतम्। शेषानपि श्लोकपञ्चकेन दर्शयति– भोक्तु मित्यादि। पुरुषकारेण शौर्येण व्यवसायमिच्छेद्, अन्यथा कथं पुरुषकारं कुर्यात्। तस्योत्साहगुणत्वात्।।10।।

For enjoying prosperity which is like a faithless Iady, a king should ever, with all his manliness, aspiration, movements, and should not behave like impotent.

[2]वशे श्रियं सदोत्थायी सैंही वृत्तिं समाश्रितः।
कचग्रहेण कुर्वीत दुर्वृत्तमिव योषितम्।।11।।

वशे श्रियं कुर्वीतेति सम्बन्धः। सैंही वृत्तिं शौर्यलक्षणाम्।।11।।

An ever-energetic king by having recourse to the lion should bring prosperity under his own control, like a man dragging his wicked wife by holding her hair.

---

1. 'यं' क पाठः
4. 'उत्यानस्यै' ङ पाठः
5. 'यिनां तु' क-ख-ग-घ पाठः
2. 'श्रियं वश्यां स' क पाठः

किरीटमणिचित्रेषु मूर्धसु[1] त्राणधारिषु।
नाकृत्वा विद्विषां पादं पुरुषो भद्रमश्नुते।।12।।

मूर्धसु विद्विषामिति सम्बन्धः। त्राणधारिषु शिरस्त्राणप्रधानेषु। अपकारिणां शिरस्सु पदमकृत्वा न भद्रमश्नुते॥12॥

Without planting his feet on his enemy's head graced with crowns adorned with diverse kinds of gems and jewels, a king cannot reap prosperity.

प्रयत्नप्रेर्यमाणेन महता चित्तहस्तिना।
रूढवैरिद्रुमोत्खातमकृत्वेह कुतः सुखम्।।13।।

तथा रूढवैरिद्रुमोत्खातमकृत्वा कुतः सुखमिति परिभवासहिष्णुतालक्षणममर्षं दर्शयति। प्रयन्तप्रेर्यमाणेनेति। यदा चेतासि संरम्भात्मकः प्रयत्नविशेष उत्पद्यते, तदा[2] तेन प्रेर्थमाणं चित्तं हस्तिस्थानीयं रूढवैरिद्रुमानुत्खातुं प्रवर्तते॥13॥

Where can there be any happiness for a king, unless the deep-rooted enemies should eradicated like mighty elephant uprooting the deep rooted tree, his intelligence—goaded by the guidance of his intense endeavours, pays.

हेलाकृष्टस्फुरत्तीक्ष्णखड्गांशुपरिपिञ्जरैः।
श्रीमत्करिकराकारैराह्रियन्ते भुजैः श्रियः।।14।।

हेलेत्यादिना शीघ्रतां दर्शयति। हेलया क्षिप्रकारितयाकृष्टाः स्फुरन्तस्तीक्ष्णा ये खड्गाः, तेषामंशुभिः परिपिञ्जरैर्भुरिति सम्बन्धः॥14॥

Prosperity can only be brought home, caught by strong hands, resembling the graceful trunk of an elephant and glittering with the dazzling luster of an easily drawn sword.

उच्चैरुच्चैस्तरामिच्छन् पदान्यायच्छते महान्।
नीचो नीचैस्तरां याति निपातभयशङ्कया।।15।।

इदानीमुत्साहसंवर्धितस्य सत्त्वस्य माहात्म्यं दर्शयति—उच्चैरित्यादिना।

---

1. 'सूत्तालरश्मिषु' क पाठः
2. 'दानेन' ङ पाठः

उच्चैः पदान्यायच्छत इति सम्बन्धः। महान् सत्त्वाधिकः केसरीव। नीचः सत्त्वहीनः करीव।।15।।

A high-minded person desirous of ascending to a great height in the ladder of prosperity, plants his feet higher and higher, whereas a low-minded one apprehending fall and destruction, plants them lower and lower.

प्रमाणाभ्यधिकस्यापि महत् मत्तहस्तिनः।।
करोत्येव पदं मूर्ध्नि केसरी मत्तहस्तिनः।।13।।

तदेव स्फुटयन्नाह– प्रमाणाभ्यधिकस्यापीति। महत् सत्त्वमधिष्ठितः महति सत्त्वे स्थित इत्यर्थः।।16।।

Like the lion planting his paw on the head of an elephant, a king possessed of great energy may plant his foot on the head of another excelling him much in bulk.

गतभीर्भीतिजननं भोगं भोगीव दर्शयेत्।
यथाबलं च कुर्वीत रिपोर्दण्डनिपातनम् ।।17।।

गतभीरित्यादिना प्रकरणार्थमुपसंहरति। गतभीरिति सत्त्वाधिष्ठानं दर्शयति। भोगं शौयाद्याभोगम्। यथाबलमिति बुद्धिव्यापारं सूचयति। दण्डनिपातनं शस्त्रव्यापारणम्।।17।।

Fearless like a serpent, a king should make such display of his magnificence as to strike terror into the hearts of his foes. According to the measure of his strength, should undertake the caution of his enemies.

(इत्युत्साहप्रशंसा नाम विशं प्रकरणम्)

एकविंशं प्रकरणम्

प्रकृतिकर्मप्रकरणम्

(Functions of the constituent element of state)

प्रकृतिव्यसनं यत् स्यात् तत् प्रशाम्य समुत्पतेत्।
अनयापनयाभ्यां तज्जायते दैवतोऽपि च[1] ।।18।।

एवं दर्शितोत्साहेन विजिगीषुणा व्यसनी परो यातव्यः। यदा तु स्वयं प्रकृतिव्यसनापन्नः स्यात्, तदैवोत्साहमेवास्थाय तत् प्रतिकृत्य यायात्। अन्यथा प्रकृतयो व्यसनापन्ना न स्वकर्माणि कुर्युरिति प्रकृतिकर्म प्रकृतिव्यसनानि चेति प्रकरणद्वयमुच्यते। तत्र व्यसनानां कारणनिर्वचनभेदप्रतीकारान् श्लोकपञ्चकेनाह– प्रकृतिव्यसनमित्यादि। समुत्पतेद् यायात्। कुतश्चैतत् स्यादित्याह– अनयापनयाभ्यामित्यादि। दैवं मानुषं च कर्म लोकं [2]पालयति। तत्र दैवमनयो नाम, मानुषमपनयो नाम। यत् पूर्वजन्मकृतं कर्म तद् दैवम्। तस्मिन्निष्टेन फलेन योगोऽयः, अनिष्टेनानयः। यदिह क्रियते तन्मानुषम्। अस्मिन् योगक्षेमनिष्पत्तिर्नयः, विपत्तिरपनयः। तत्रानयापनयाभ्यां संयुक्ताभ्यां प्रकृतीनां व्यसनमुत्पद्यते।[3] दैवतोऽपि चेति। अपिशब्दान्मानुषतोऽपि। इदमुक्तं भवति– दैवाद् वा केवलादनयलक्षणाद्, मानुषाद् वा केवलादान्मानुषतोऽपि। इदमुक्तं भवति–दैवाद् वा केवलादनयलक्षणाद्, मानुषाद् वा केवलादपनयलक्षणादिति।।18।।

A king should fall upon his enemy first having removed the cause of disaffection of his people. These causes are bred by the absence of good and the following of offensive policies of administration, as also by adverse Fate.

---

[1] 'वा' मूलकोशेषु पाठः

[2] 'यापयति' ङ पाठः

[3] 'एकतोऽपि चेति। एकैकस्मादपि। इ' ङ पाठः

यस्मात्[2] तद् व्यस्यति श्रेयस्तस्माद् व्यसनमुच्यते।
व्यसत्यधो वा व्रजति तस्मात् तत् परिवर्जयेत्।।19।।

कथं तत उत्पन्नं व्यसनमित्युच्यत इत्याह– यस्मादित्यादि। व्यस्यति क्षिपति श्रेयः अभिमतमर्थमिति व्यसनम्। अ[5]धो वा व्रजतीति 'अस गतिदीप्त्यादानेष्वि'त्यस्य धातोः प्रयोगं दर्शयति। वि[6]शब्दोऽधःशब्दार्थे नाशे वा। अधो नाशं वा असति व्रजत्यनेनेति व्यसनम्।।19।।

Vyasana is so-called for it retards the material well-being of a kingdom a king under the influence of the Vyasanas goes down and down the depths of deprivation; and therefore the Vyasanas should be avoided as much as possible.

हुताशनो जलं व्याधिर्दुर्भिक्षं मरणं तथा।
इति पञ्चविधं दैवं व्यसनं मानुषं परम्।।20।।

पञ्चविधं दैवमिति। यदा पूर्वजन्मकृतमनवदातं कर्म स्वानुरूपकार्योत्पादनाभिमुखं, तदा तत्प्रेरिता हुताशनादयः पीडाहेतुत्वाद् दैवं व्यसनमित्युच्यते। मानुषं परं दैवादन्यत्। तथाह्युक्तं 'गुणप्रातिलोम्यभावः प्रदोषसम्प्रयोगः पीडा वा व्यसनम्' (कौटि० अर्थ० 8.19.128) इति। तत्र पीडा दैवी मानुषी च। दैवी हुताशनादिका। मानुषी स्वपरचक्रादिका। तत्र दैवं पीडनं मुक्त्वान्यत् सर्वं मानुषम्।।20।।

" Fires, floods, famine, prevalence of diseases, and plague and pestilence—these are the five kinds of the Vyasanas - calamities that proceed from Fate; the rest come from human sources.

दैवं पुरुषकारेण शान्त्या वा प्रशमं नयेत्।
उत्थायित्वेन नीत्या वा मानुषं कार्यतत्त्ववित्।।21।।

तत् प्रशाम्य समुत्वेदित्युक्तम्। तस्य शमनोपायमाह– दैवमिति। पुरुषकारेण

---

1. 'द् व्यस्यति हि श्रेयस्तत् स्याद् व्य' ख-ग पाठः
2. 'अपथेन (?) वा' क-ख-ग-घ पाठः
3. 'विनाशं व्यसनं व्रज' क-ख-ग-घ पाठः

मानुष्या प्रतिक्रियया वह्न्यादिप्रतिपक्षोपकरणसम्पादनेनेत्यर्थः। शान्त्या दैव्या अथर्ववेदविहितया। उत्थायित्वेन दुर्गादिकर्मसु चेष्टया। नीत्या सन्ध्यादीनां सामादीनां च यथोद्देशप्रयोगेण। कार्यतत्त्वविदिति यथोपेयमुपायप्रयोगं दर्शयति॥21॥

The evils proceeding; from Fate should be averted by means of humanly efforts and the celebration of propitiatory rites ; and a king knowing what should be done, should remove the evils coming from human sources by his energy and adoption of wise procedures of policy.

स्वाम्यादिमित्रपर्यन्तं प्राकृतं मण्डलं हि यत्।
तस्य कर्म प्रवक्ष्यामि व्यसनं च यथाक्रमम्॥22॥

इदानीं प्रकृतिकर्म तद्व्यसनान्यभिधित्सुराह– स्वाम्यादीत्यादि। प्राकृतं मण्डलं सप्तप्रकृतिकं राज्यं, यदुक्तं प्राक् स्वाम्यादिप्रकृतिमण्डलम्॥22॥

From the king to the friends—all these constituents form the Prakriti Mandala, shall now in due order, enumerate their functions and their instabilities.

मन्त्रो मन्त्रफलावाप्तिः कार्यानुष्ठानमायतिः।
आयव्ययौ दण्डनीतिरमित्रप्रतिवेधनम्॥23॥

तत्र षट्त्रिंशता श्लोकैः प्रकृतिकर्माह– मन्त्र इत्यादि। बहुत्वात् स्वामिकर्म प्रकृतिकर्मणः पश्चाद् वक्ष्यति। मन्त्रः कार्यनिश्चयो मन्त्र्यायत्तः। मन्त्रफलावाप्तिः दूरादेवामित्रानुत्सार्य या साध्यस्य फलस्य प्राप्तिर्दूतायत्ता। कार्यानुष्ठानं दुर्गादिकर्मप्रवर्तनमध्यक्षाधीनम्। आयतिः प्रभावोऽमात्यैः क्रियते। आयव्ययौ अक्षपटलिकाधीनौ। दण्डनीतिः वधादीनां दण्डसाध्येषु यथार्हं नयनं धर्मस्थायत्तम्। अमित्रप्रतिषेधनं मित्राधीनम्॥23॥

To hold counsels to secure the results of counsel, to direct others in the enactment of actions, to ascertain beforehand the effects of good or evil of future events and happenings, to look after the income and expenses of the kingdom, to administer justice, to vanquish enemies,

व्यसनस्य प्रतीकारो राजराज्याभिरक्षणम्।
इत्यमात्यस्य कर्मेदं हन्ति तद्व्यसनान्वितः।।24।।

व्यसनस्य प्रकृतीनां प्रतीकारो मन्त्रिपुरोहिताधीनः। तथा राजराज्याभिरक्षणं मन्त्रिपुरोहिताधीनमेव।।24।।

To prevent evils and calamities, and to protect the kingdom, these are the functions of a minister. But a minister when he is under the influence of theVyaasanas- vicious inclinations miscarries all these functions.

अमात्यैर्व्यसनोपेतैर्ह्रियमाणो हि भूपतिः।
अशक्त एवोत्पतितुं छिन्नपक्ष इवा[1]ण्डजः।।25।।

ह्रियमाणः श्रेयसः सकाशात्। छिन्नपक्ष इव पक्षस्थानीयत्वाद प्रात्यादीनाम्।।25।।

A king whose minister possessed by the Vyasanas is prevented over by the enemy becomes incapable of resisting the enemy by the application of the measures of policy, like a bird incapable of flying when its wings are cut off.

(कोशो दण्डश्च कुप्यं च पिष्टवाहनमेव च)
हिरण्यवस्त्रधान्यादि वाहनाहि तथैव च।
तथान्ये द्रव्यनिचयाः प्रजातः सम्भवन्ति हि।।26।।

हिरण्यं सुवर्णरजतादि। वस्त्रं त्वक्फलकृमिरोमभेदाच्चतुर्विधम्। तदुभयं कोशप्रवेश्यम्। धान्यं (पूर्वमध्यापकवाचकं?) कोष्ठागारप्रवेश्यम्। वाहनं गजाश्वादि दण्डौपयिकम्। द्रव्यनिचयाः सारदार्वादयो दुर्गौपयिकाः। प्रजातो जनपदात्।।26।।

A spy or secret agent should be skilled in interpreting one's feelings expressed through speech or gestures possessing sharp memory soft in speech and prompt action painstaking and hard working as well as clever in the discharge of duties.

---

[1] 'व द्विजः' क पाठः

वार्तां प्रजा साधयति वार्ता वै लोकसंश्रया।
प्रजायां व्यसनस्थायां न किञ्चिदपि सिध्यति।।27।।

साधयति सम्पादयति। वार्ता लोकसंश्रया तत्प्रतिबद्धत्वाल्लोकस्थितेः।।27।।

People promote the trade, commerce, cultivation and other such means that conduce to the prosperity of a kingdom. These totally depend on the people. Therefore, when the people are in danger or under the influence of evil propensities no success can be achieved.

प्रजानामापदि त्राणं रक्षणं कोशदण्डयोः।
पौराश्चैवोपकुर्वन्ति संश्रयायेह दुर्गिणाम्।।28।।

आपदि पराभियोगे जनपदस्य त्राणं रक्षणं कोशदण्डयोः, अन्यथा दुर्गाभावे कोशदण्डौ परेषामेव स्यातामित्याह– पौराः तन्निवासिनः। उपकुर्वन्ति कोशादिना। दुर्गिणां राज्ञाम्।।28।।

Castles are the places of refuge for the people in times of danger; they are protections for the troops and the treasures; with a view to take refuge into them, the citizens seek to oblige their rulers by gifts, offerings.

तूष्णीयुद्धं [1]जनत्राणं मित्रामित्रपरिग्रहः।
सामन्ताटविकाबाधानिरोधो दुर्गसंश्रयात्[2]।।29।।

तूष्णींयुद्धं योगगूढोपजापादिना। जनत्राणं दुष्टनिग्रहेण। मित्रामित्रपरिग्रहः प्रोत्साहेन। मध्यमोदासीनलिप्सायां हि दुर्गसंश्रयात् तदेव मित्रामित्रानुत्साहयेत्। आबाधा पीडा तस्या (धिरोह? निरोधः) दुर्गसंश्रयाद् दुर्गे सर्वमेवैतत् कर्मोच्यते।।29।।

That which is a means for carrying on Tushni warfare, that which affords protection to the people (in troublous times), that which can occur in friends and foes alike and that which is a check against the attacks of the neighboring forest tribes—is called a Durga -fort.

---

[1] 'बलत्रा' मूलकोशेषु पाठः

[2] 'उच्यते।।' मूलकोशेषु पाठः

स्वपक्षैः परपक्षैश्च दुर्गस्थः पूज्यते नृपः।
एतद्धि दुर्गव्यसनात् सर्वमेव विपद्यते[1] ।।30।।

स्वपक्षैः पूज्यते कालेऽस्माकं मताश्रय इति। अशक्योच्छेदोऽमिति परपक्षैः स्तूयते।।30।।

A king safe within the respites of his fort or a king possessing numerous forts is respected both by his own and his enemy's followers. But when in a Durga-vysanas exists none of these exists.

भृत्यानां भरणं दानं भूषणं वाहनक्रियाः[2] ।
स्थैर्यं परोपजापश्च दुर्गसंस्कार एव च।।31।।

भरणं पोषणम्। दानं भृत्येभ्य एव तुष्टिकाले। स्थैर्यं कोशात्, सर्वापत्प्रतरणहेतुत्वात् (परोपजापत्वात् तत्रा?) लब्धप्रकृतिभेदः।।31।।

The act of maintaining dependents, acts of generosity-personal and other, adornments, purchasing of transports horses and elephants, permanence of the kingdom, facility for sowing dissension among the enemy and his friends, repairing of forts,

सेतुबन्धो वणिक्कर्म प्रजामित्रपरिग्रहः।
धर्मकामार्थसिद्धिश्च कोशादेतत् प्रवर्तते।।32।।

सेतुबन्धः सस्यार्थं जलाधारबन्धः। वणिक्कर्म वाणिज्यम्। प्रजापरिग्रहः शून्यनिवेशकाले। मित्रपरिग्रहः पराभियोगकाले। धर्मसिद्धिः पात्रेभ्यः प्रदानात्। कामसिद्धिः शरीरपरिभोगकरणात्। अर्थसिद्धिः "अर्थैरर्था निबध्यन्त" इति न्यायात्।।32।।

Construction of bridges and cause-ways, trade and commerce, the acquisition of friends and friends and the love of the people, and lastly, the accomplishment of righteous and desirable acts—all proceed from the treasure -i. e. all these depend entirely on a solvent financial condition.

---

[1] 'न विद्य' क पाठः

[2] 'नं क्रयः' क पाठः

कोशमूलो हि राजेति प्रवादः सार्वलौकिकः।
एतत्[1] सर्वं जहात्याशु कोशव्यसनवान् नृपः।।33।।

कोशमूल इति। अन्यथा हि कोशविकल: कथं स्वामीत्युच्यते ऐश्वर्याभावात्।।33।।

'The foundations of royalty are laid in the treasures"—this is a popular saying well-known in all regions. A ruler of men whose treasury is in danger of being insolvent loses all prospects of success in the above-mentioned acts.

क्षीणं बलं वर्धयति [2]स्वतो गृह्णाति च प्रजाः।
कोशवान् पृथिवीपालः परैरप्युपजीव्यते।।34।।

क्षीणं बलं वर्धयति। स्वतो वित्ताद्, अन्यथा कोशाभावे दण्ड: परं गच्छति। स्वतो गृह्णाति प्रजा: क्षीणा:। परैरपि शत्रुभि:।।34।।

A king with a solvent treasury increases his reduced forces -in consequence of wars, and he naturally wins the good-will of his people. He is even respected and served by his enemies.

मित्रामित्रहिरण्यानां भूमीनां च प्रसाधनम्।
दूरकार्याशुकारित्वं लब्धस्य [3]परिपालनम्।।35।।

मित्रामित्राणाम् अपचिकीर्षतां, हिरण्यानां दुस्साधानां च। भूमीनां सामन्ताटविकादिभिराक्रान्तानाम्। प्रसाधनं दण्डेनात्मसात्करणम्। दूरकार्याशुकारित्वं देशान्तरितस्य द्रुतसम्पादनशीलता। लब्धस्य कोशादे:।।35।।

To add to the number of friends and enemies, and to the amount of gold -i. e. wealth and the territorial possessions of a kingdom, to accomplish with eagerness, acts delayed to an indefinite future, to protect what is acquired or gained,

---

1. 'क: सर्वं जहातीह को' क पाठ:
2. 'स्वत: पुष्णाति च' क पाठ:, 'यतो' ख-ग पाठ:
3. 'प्रतिपा' क पाठ:

परचक्रविघातश्च स्वदण्डस्य परिग्रहः।
दण्डादेतत् प्रभवति याति तद्यसने क्षयम्।।36।।

परचक्रविधातः परबलस्याभियुञ्जानस्य व्याघातः। स्वदण्डस्य परिग्रहः [1]स्वस्य दण्डैकदेशस्य [2]पराभवशङ्कायां परिरक्षणेन परिग्रहः।।36।।

To destroy the army of the enemy, and to save the forces of his own side, all these acts proceed from the army.' So when the army is under the influence of the Vyasanas i e. when it is defective, above-named acts run to ruin -i.e. are never accomplished with any degree of success.

अरयोऽपि हि मित्रत्वं यान्ति दण्डवतो ध्रुवम्।
दण्डप्रायो हि नृपतिर्भुनक्त्याक्रम्य मेदिनीम्।।37।।

अरयोऽपि मित्रत्वं यान्ति दण्डवतः। दण्डप्रायो दण्डबहुलः।।37।।

The enemies even of a king possessing an efficient army are turned into his friends. A king possessing a large army, rules the earth after having properly conquered it.

संस्तम्भयति मित्राणि शत्रूनुत्सादयत्यपि।
भूकोशदण्डैर्व्रजति प्राणैश्चाप्युपकारिताम्।।38।।

मित्रकर्माह– संस्तम्भयति मित्राणि विजिगीषोर्यानि [3]बलाधिकान्य रिमित्रा(णि) भवन्ति, विजिगीषुभयाद् वामित्रानाश्रयन्ति। प्राणैः पराभियोगकाले।।38।।

A faithful ally restrains others throwing off their faithfulness, and destroys the enemy. He serves the king to whom he is related by risking his own dominions, treasures, troops and even his life.

तत्तत् करोति च बहिर्मित्रं स्नेहनिबन्धनम्।
तस्मिन् व्यसनमापन्ने मित्रकर्म न विद्यते।।39।।

---

[1] 'स्वद' ङ च पाठः

[2] 'राबाधशङ्कया प' ङ च पाठः

[3] 'लानि तान्य' क-ख-ग-घ पाठः

तत्तत् करोति यद्यद् विजिगीषोरनुकूलम्। स्नेहनिबन्धनं [1]तद्ध्युपकारनिरपेक्षं भवति।।39।।

By ties of mutual affection, he succeeds in securing numerous other friends and friends. When therefore the friend is under the influence of the Vyasanas, his function is no longer duly discharged.

उपकारादृतेऽप्याशु मित्रं श्रेयसि तिष्ठति।
मित्रवान् साधयत्यर्थान् दुस्साधानप्यनादरात्।।40।।

तदेव स्फुटयन्नाह– उपकाराहृत इति। श्रेयसि विजिगीषुहिते।।40।।

A true friend promotes the welfare of his associated king, without expecting to his remuneration in return. A king having faithful friends succeeds with the greatest ease, even in most difficult undertakings.

अन्वीक्षणं च विद्यानां सद्वर्णाश्रमरक्षणम्।
ग्रहणं शस्त्रशास्त्राणां युद्धमार्गोपशिक्षणम्।।41।।

स्वामिकर्माह– अन्वीक्षणम् आलोचनम्। सद्वर्णाश्रमरक्षणमिति। स्वकर्मसु ये स्थिता वर्णाश्रमाः, ते सन्त उच्यन्ते। ग्रहणं शस्त्रशास्त्राणाम् अध्ययनं धनुर्वेदानाम्। युद्धमार्गोपशिक्षणमिति शास्त्रज्ञानेऽपि योद्धुं न जानातीति तद्विन्यासशिक्षणम्।।41।।

Pursuit of knowledge, protection of the Varnas and Asramas of his own kingdom, ability of using pure unpoisoned weapons, accomplishment in all the modes of warfare,

व्यायामः शास्त्रविज्ञानं [2]वर्मणां लक्षणानि च।
गजाश्वरथपृष्ठेषु यथावत् सम्प्रवर्तनम्।।42।।

व्यायामः प्लवनलङ्घनादिः। वर्मणां लक्षणानि तद्द्रव्याणां परिज्ञानानि। गजाश्वरथपृष्ठेषु यथावत् सम्प्रवर्तनं गजादिवाहिकाकौशलमित्यर्थः।।।42।।

---

1. 'तदुप' क-ख-ग-घ पाठः
2. 'क' क पाठः

Habits of hardiness, knowledge of the implements of war offensive and defensive and of the characteristics of deeds- such as, testing the strength of armours etc., ability for riding properly on horses, elephants and chariots,

नियुद्धकौशलं माया परचित्तप्रवेदनम्।
धूर्तता शाठ्ययुक्तेषु सत्सु सद्वृत्तदर्शनम्।।43।।

नियुद्धकौशलं मल्लयुद्धशिक्षणम्। माया तत्प्रवर्तनमिति; मायामुपायविकल्पे वक्ष्यति। परचित्तप्रवेदनम् इङ्गिताकारैः। धूर्तता शाठ्यम्। सत्सु सज्जनेषु।।43।।

Skillfulness in wrestling, the art of clearly seeing through the purposes of others entering into other's heart, crookedness with the crooked, and honesty with the honest,

मन्त्रोद्योगोऽनुमन्त्रत्वं तद्रक्षा तात्स्थ्यमेव च।
उपेक्षा साम दानं च भेदो दण्डश्च[1] साधनम्।।44।।

[2]मन्त्रोद्योगोऽनुमन्त्रत्वमिति। मन्त्रार्थं ज्ञानवृद्धसंयोगः[3]। मन्त्रिभिः सह सम्मन्त्र्य पश्चात् स्वयमेकैकस्य मन्त्रणम् अनुमन्त्रत्वम्। तद्रक्षा मन्त्ररक्षा। तात्स्थ्यं मन्त्रतात्पर्यम्। उपेक्षा उपायविकल्पे वक्ष्यमाणा। साधनमिति उपेक्षादिपञ्चकस्य कर्मण उपायसाधनत्वात्।।44।।

Consultations and re- consultations -with the counsel, regarding a certain project, preservation of the secrecy of counsels, healthiness of the mind, disregard of such modes of policy as conciliation, gift or bribery, and application to such modes as sowing conflicts and imposing punishments.

[4]प्रशास्तृसूतसेनानीमन्त्र्यमात्यपुरोधसाम्।
सम्यक् प्रचारविज्ञानं दुष्टानां चावरोपणम्।।45।।

प्रशास्ता बलाध्यक्षः, सूतः [5]सारथ्यकर्मनियुक्तः, सेनानीश्चतुरङ्गस्य नेता,

---

1. 'ण्डप्रसा' मूलकोशेषु पाठः
2. 'गो ज्ञा' क-ख-ग-घ पाठः
3. 'संग्रहः म' ङ च पाठः
4. 'स्रध्यक्षसे' मूलकोशेषु पाठः
5. 'थ्यसूनादिक' ङ च पाठः

मन्त्री बुद्धिसचिवः, अमात्वः सन्निधातृसमाहर्त्रादिः, पुरोधाः पुरोहितः। प्रचारविज्ञानं स्वकर्म किं केनानुष्ठितमिति। दुष्टानामवरोपणं तेषां कर्मसु विकुर्वाणानां पदात् प्रच्यावनम्।।45।।

Knowledge of the movements and intents of the commanders and other officers of his troops, and of the counselors, ministers and priests, imprisonment of the wicked of the above-named officers,

गतागतपरिज्ञानं दूतसम्प्रेषणानि च।
प्रकृतिव्यसनापोहः क्रुद्धप्रशमनानि च।।46।।

गतागतपरिज्ञानमिति। किमयं कारणादकारणाद् वा गत आगतश्चेति। क्रुद्धप्रशमनानि कारणादकारणाद् वा कुद्धानां सामादिभिः प्रशमनानि।।46।।

Observation of those who come to and go away from him as ambassadors, the removal of the calamities that threaten the people, and the appeasing of the angry or disaffected element of the kingdom,

गुरुणामनुवृत्तिश्च [1]पूज्यानामनुपूजनम्।
धर्मासनप्रतिष्ठानं राज्यकण्टकशोधनम्।।47।।

गुरुणां [2]सगन्धानामगन्धानां च। पूज्यानां विद्यावृद्धानाम्। धर्मासनप्रतिष्ठानं धर्माधिकरणप्रवर्तनं धर्मस्थैः। राज्यकण्टकशोधनं प्रदेष्टृभिः।।47।।

Obedience to the preceptors, bestowal of honors and respects on those worthy of them, administration of justice, suppression of the disturbing factor of the kingdom: the taking out of the thorns of the kingdom, such as the thieves, robbers, killers, etc.

भृताभृतपरिज्ञानं कृताकृतपरीक्षणम्।
तुष्टातुष्टविचारश्च सर्वेषामनुजीविनाम्।।48।।

---

1. 'नां चापि पू' ख-ग पाठः
2. 'सहजानां सगन्धानां च' क-ख पाठः

भृताभृतपरिज्ञानं भृत्यभरणीये (न?षु)। कृताकृतापरीक्षणं कर्मसु नियुक्तेन किं केन कृतमिति। (तुष्टातुष्टविचारः) भृत्यस्य तुष्टिरतुष्टिर्वेति विचारः।।48।।

Knowledge of what exists and what does not, examination of what is done and what is left off undone, investigation as to who is satisfied and who dissatisfied among his dependents,

मध्योदासीनचरितज्ञानं तत्सिद्धिपालनम्[1]।
[2]प्रतिग्रहश्च मित्राणाममित्राणां च निग्रहः।।49।।

तत्सिद्धिपालनमिति। मध्यमोदासीनयोः [3]साधनं रक्षणं च। प्रतिग्रहः स्वीकरणम्।।49।।

Complete 'acquaintance with the movements, and character of the Madhyama and the Udasina and the act of turning this acquaintance to means for establishing firmly his own rule, (or to means for the success of his undertakings), acquisition of allies and the chastisement of the enemies.

पुत्रदारादिगुप्तिश्च बन्धुवर्गपरिग्रहः।
खनिद्वीपवनादीनां स्ववृत्तीनां प्रवर्तनम्।।50।।

पुत्रदारादिगुप्तिः पुत्राणां कर्कटकसधर्मत्वाद्, दाराणां चासन्नवृत्तित्वात्। खनिद्वीपवनादीनामिति। आदिशब्दाद् दुर्गसेतुवणिक्पथशून्यनिवेशद्रव्यवनपरिग्रहः। ता एव राज्ञो वृत्तयः।।50।।

The protection of his sons and wives and his own self, entertaining amicable feelings towards his relatives and friends, the promotion of such measures of revenue on which his own material progress depends,

असतां च परिक्षेपः सतां च परिगूहनम्।
अहिंसा सर्वभूतानामधर्माणां च वर्जनम्।।51।।

---

1. 'त्सन्धिपा' मूलकोशपाठः
2. 'परिग्र' क पाठः
3. 'सन्धिसाधनं वा रक्षणं वा प्र' ङ-च पाठः

असतामिति। प्रज्ञाशौचशौर्यादियुक्ताः सन्तः, तद्विपर्ययेणासन्तः, तेषां परिक्षेपो दानमानव्यपरोपणम्। परिगूहनं पूजया स्वीकरणम्। अभूतहिंसा अप्रवर्तितपूर्वा [1]शास्त्रविगर्हिता अधर्म्या यज्ञादन्यत्र या हिंसा।।51।।

Infliction of hardships on the wicked, and to afford facilities for the advancement of the honest, abstinence from doing injury to any being, and the circumvention of sin or unrighteousness,

अकार्यप्रतिषेधश्च [2]कार्याणां च प्रवर्तनम्।
प्रदानं च [3]प्रदेयानामदेयानामसङ्ग्रहः।।52।।

कार्यं करणार्हम् इन्द्रमहादि। प्रदेया दानार्हाः [4]क्षेत्रादयः। अदेयाः अदानार्हा[5] अश्रोत्रियादीनामर्थाः, [6]तेषाम् असङ्ग्रहः असाधनम्।।52।।

Prohibition of evil deeds and the promotion of good ones, the giving away of things fit to be given, and the accumulation of those that should not be parted with,

अदण्डनमदण्ड्यानां दण्ड्यानां चापि दण्डनम्।
अग्राह्याग्रहणं चैव ग्राह्याणां ग्रहणं तथा।।53।।

अदण्ड्याः [7]फल्गुक्रीडादिष्वपि शिष्टाचाराः। दण्ड्याश्चोरादयः। अग्राह्याः पूर्वविरोधिताः प्रकृतिविद्विष्टा वा। ग्राह्याः प्रज्ञादियुक्ताः स्निग्धा वा।।53।।

Withholding of punishment from those who do not deserve them, and the infliction of them on those who rightly merit them, acceptance of things acceptable and the rejection of those unacceptable.

---

1. 'स्त्रा विहिता' ग घ पाठः
2. 'र्ये चैवानुव' ख-ग पाठः
3. 'मनर्हाणामस' ख-ग पाठः
4. 'ब्रह्मदेयादयः' ङ च पाठः
5. 'र्हाः श्रो' क-ख-ग-घ पाठः
6. 'षां संग्रह आदानम्' ङ च पाठः
7. 'षु शि' च पाठः

अर्थयुक्तस्य करणमनर्थस्य च वर्जनम्।
न्यायतश्च करादानं स्वयं च प्रतिमोक्षणम्।।54।।

अर्थ (प्र?) युक्तं हीनविग्रहादि। अनर्थो बलवद्विग्रहादिः। न्यायतः पूर्वप्रसिद्धा। स्वयं प्रतिमोक्षणं धनानामनतिलोभेन।।54।।

Performance of fruitful deeds, and the rejection of fruitless ones, just levying of taxes and their remission in bad seasons,

समर्थनं प्रधानानां निरस्यानां निराकृतिः।
[1]वैषम्याणां प्रशमनं भृत्यानां [2]चाविरोधनम्।।55।।

समर्थनं गुणाध्यारोपणम्। प्रधानाः मुख्याः। निरस्याः दूष्याः। वैषम्या[3] (णां प्रशमनम्) असमानां समीकरणम्। विरोधनं परस्परदोषाख्यानेन।।55।।

The preferment of high officials of state, and the removal of those who deserve dismissal, pacification of calamities such as famine, pestilence, etc. and the establishment of friendliness among his servants,

अविज्ञातस्य विज्ञानं विज्ञातस्य च निश्चयः।
आरम्भः कर्मणः शश्वदारब्धस्यान्तदर्शनम्।।56।।

आरम्भः कर्मणः अनारब्धस्येत्यर्थात्। अन्तदर्शनं समापनेन।।56।।

To know what is unknown, and to be assured of what is known, to undertake good acts, and to see to their ends acts undertaken,

अलब्धलिप्सा न्यायेन लब्धस्य च विवर्धनम्।
परिवृद्धस्य विधिवत् पात्रे सम्प्रतिपादनम्।।57।।

लिप्सा आर्जनम्। सम्प्रतिपादनं यदि प्राक् परिरक्षितं भवति। तस्मादरक्षितस्य रक्षणं चेत्यर्थाद् बोद्धव्यम्।।57।।

---

[1] 'राणां च प्र' मूलकोशेषु पाठः
[2] 'चानुरो' ख-ग पाठः
[3] 'म्यं समास' च पाठः

Desire for acquiring what remains unacquired and facilitating the advancement of what is acquired, and the proper consignment of a thriving object to the care of a deserving person.

अधर्मप्रतिषेधश्च न्यायमार्गेण वर्तनम्।
उपकार्योपकारित्वमितिवृत्तं महीपते:।।58।।

न्यायमार्ग: धर्मशास्त्रविहित:। उपकार्योपकारित्वम् उपकर्तव्येषूपकारिता।।58।।

Suppression of wrong and the following of the paths of righteousness, and lastly the doing of good to one who does good to him,—these are the functions of a ruler of earth.

एतत् सर्वममात्यादि राजा नयपुरस्सर:।
नयत्युन्नतिमुद्युक्तो व्यसनी क्षयमेव तु।।59।।

सप्तानामपि स्वामिप्रकृति: प्रधानमिति दर्शयन्नाह– एतदित्यादि। नयत्युन्नतिम् अतिवृद्धिम्। कूटस्थस्थानीयो हि स्वामी, तदायत्तत्वादमात्यादीनाम्।।59।।

An energetic king following the paths of true policy leads to eminence these and his government and ministers; but influenced by evil propensities, he leads them to destruction.

तस्मिन् धर्मार्थयोर्व्यग्रे तथैवास्वस्थचेतसि।
सर्वमेतद्[1] विशेषेण मन्त्री सन्नेतुमर्हति।।60।।

अस्यापवादमाह– तस्मिन्निति। राज्ञि धर्मार्थयोर्व्यग्रे, [2]व्यसनप्रवृत्ते तु मन्त्र्यपि तद् विद्वान्न शक्नोति सन्नेतुमुन्नतिम्। स यच्छीलस्तच्छीला हि प्रकृतयो भवन्तीति। अस्वस्थचेतसि पर (वश) शरीरे।।60।।

But when a king becomes busy in the performance of religious deeds and in acquiring wealth, or when he is uncontrolled, all these functions ought to be discharged by his ministers.

(इति प्रकृतिकर्म नामैकविंश प्रकरणम्)

---

[1] 'दशे' ख-ग पाठ:

[2] 'ग्रसनप्रवृत्ते तु मन्त्र्यपि तद्विधिना शक्नोति सन्नेतुमुन्नतिम्। संयतलीलस्तल्लीला हि प्रकृतयो भवन्तीति। स्वस्थचेतसि शरीरे' च पाठ:

द्वाविंशं प्रकरणम्

प्रकृतिव्यसनप्रकरणम्

(Vices of state elements)

वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च।
पानं स्त्री मृगया द्यूतं व्यसनानि महीपतेः।।61।।

येषु व्यसनेषु प्रकृतिकर्म न विद्यते, तानि व्यसनान्येकत्रिंशता श्लोकैराह–वागित्यादि। एतानि सप्त[1] महाव्यसनानि कोपकामजानि विस्तरतो द्वितीये सर्गे वक्ष्यति।।61।।

Excessive harshness in the spoken words and in the punishments meted out, defect in the administration of finance, inebriation, excessive love for the company of women, and for hunting, and gambling at the dice,—these are the Vyasanas of a king.

आलस्यं स्तब्धता दर्पः प्रमादो वैरकारिता।
इति पूर्वोपदिष्टं च [2]सचिवव्यसनं स्मृतम्।।62।।

स्तब्धता मानः। दर्पो मदः। प्रमादोऽनवधानता। पूर्वोपदिष्टं वाक्पारुष्यादि।।62।।

Adjournment, lethargy, arrogance, negligence, cultivation of other's ill-will,—these and those enumerated above viz., the vyasanas of the king, are the vyasanas of the ministers.

[3]अतिवृष्टिरनावृष्टिर्मूषिकाः शलभादयः।
असत्करश्च दण्डश्च परचक्राणि तस्कराः।।63।।

---

1. 'प्तव्य' क-ख-ग-घ पाठः
2. 'साचिव्यं व्य' ख-ग पाठः
3. 'अवृष्टिरतिवृष्टिश्च मू' क पाठः

मूषिकाः शलभादय इति। आदिशब्दादग्निदुर्भिक्षोपग्रहः। असत्करः अशोभनः करः अतिमहत्त्वात्। परबलं पीडाहेतुत्वात्।।63।।

Excessive rain, famine, locusts, rats, mice and parrots and other such corn-destroying agents unjust taxation, confiscation of the properties of the people, foreign invasion and depredation, and thieves, and robbers.

राजानीकप्रियोत्सर्गो मारकव्याधिपीडनम्।
पशूनां व्यसनं रोगो राष्ट्रव्यसनमुच्यते।।64।।

राजानीकप्रियोत्सर्ग इति। राज्ञो यत् सैन्यं, ये च वल्लभाः, तेषामनियमनमुत्सर्गः। मारकव्याधिपीडनं मनुष्याणाम्।।64।।

Abandonment of the king by his forces and his favorites, anguish brought about by the prevalence of diseases, and the death of cattle, and the ravages of the murrain (epidemic of animals),—these are the vyasanas of the kingdom.

विशीर्णयन्त्रप्राकारपरिखात्वमशास्त्रता।
क्षीणघासेन्धनान्नत्वाद् दुर्गव्यसनमुच्यते।।65।।

यन्त्रं सर्वतोभद्रादि। परिखा खातकम्।।65।।

Disorder and decay of the implements of war and of the fortifications and waterways, want of weapons in the store, and failure of the stock of food and fuels,—these are the vyasanas of the castle.

व्ययीकृतः परिक्षिप्तो भक्षितोऽसञ्चितस्तथा।
मुषितो दूरसंस्थश्च कोशव्यसनमुच्यते।।66।।

व्ययीकृतः असद्व्ययेन। परिक्षिप्तः [1]मण्डलस्थानेषु खण्डखण्डेनावस्थितः। भक्षितः कृमिभिः। असञ्चितः दुर्न्यस्तः। मुषितः सामन्ताटविकादिभिः। दूरसंस्थो विजिगीषुप्रदेशात्।।66।।

Extravagance, outlay in different projects, misappropriation by the officials and servants, want of accumulation, robbery, and remoteness of the flowing in of money, these are said to be the vyasanas of the treasury.

---

[1] 'स्थानस्थानेषु खण्डे' ङ च पाठः

उपरुद्धं परिक्षिप्तं विमानितममानितम्।
अभृतं व्याधितं श्रान्तं दूरायातं नवागतम्।।67।।
परिक्षीणं प्रतिहतं प्रहताग्रजवं तथा।
[1]आशानिर्वेद्यभूमिष्ठमनृतप्राप्तमेव च।।68।।
[2]कलत्रगर्भ्यतिक्षिप्तमन्तःशल्यं तथैव च।
भिन्नगर्भं [3]ह्यपसृतमवमुक्तं तथैव च।।69।।
[4]क्रुब्धमौलारिमित्रं च [5]निविष्टं चापि विद्विषा[6]।
दूष्ययुक्तं [7]स्वविक्षिप्तं मित्रविक्षिप्तमेव च।।70।।
विच्छिन्नवीवधासारं [8]शून्यमूलं तथैव च।
[9]अस्वामिसङ्गतं चैव भिन्नकूटं तथैव च।।71।।

दण्डव्यसनमाह– उपरुद्धमित्यादि।। 67, 68, 69, 70, 71।।

To be besieged by the enemy, to be surrounded on all sides by hostile forces, to the disgraced, to be deprived of a being duly honored, to be disaffected or badly paid, to be diseased, to be fatigued or over-worked, to be returned from distant lands, to be newly recruited, to be reduced in number,

---

[1] 'दभूयिष्ठं' मूलकोशेषु पाठः
[2] 'धि' ख-ग पाठः
[3] 'तं परिमृष्टं त' क पाठः
[4] 'लं विमिश्रं च' ख-ग पाठः, 'लाविमिश्रं च' क पाठः
[5] 'विं' ख-ग पाठः
[6] 'षिं' क पाठः
[7] 'च' क पाठः
[8] 'छिन्नमू' क पाठः
[9] 'संहतं चापि भि' क पाठः

to be deprived of its leaders, to have its brave warriors killed, to be excited with hopes and disappointments, to become faithless, eg. to have women with it, to be scattered over different countries, to have thorns -spies set by the foe ,in its ranks, to be torn by conflicts, to be sent to fight in foreign Mandalas, to be undisciplined, to have its senior officers enraged, to be commanded by men differing in opinion, to have foes in its own ranks, to be united with the enemy, to be careless of its own interests and those of the allies of its monarch, to be cut off from the supplies of food and the support of related troops, to be deprived of shelter where in to secure the families and properties of its so Killers, to hazard battles without the consent of its master, to put forward different excuses for misbehaviors.

दुष्पार्ष्णिग्राहमन्धं[9] च बलव्यसनमुच्यते।
अत्र किञ्चिदसाध्यं तु किञ्चित् साध्यं तदुच्यते।।72।।

अत्र किञ्चिदिति त्रयस्त्रिंशद्बलव्यसनेषु। तदुच्यते यत् साध्यमसाध्यं च।।72।।

To have bad Parshnigrahas, and to be ignorant of the country—these are said to be the vysanas of the army. Of these some are irremediable and some remediable; of this, I am speaking presently.

उपरुद्धं तु युध्येत निर्गत्यान्यत ऊर्जितम्।
परिक्षिप्तं न निर्मार्गं सर्वतः परिवेष्टितम्।।73।।

अन्यत इति अनुपरुद्धेन मार्गेण निर्गत्य। सर्वत: परिवेष्टितं निर्गमा भावात् कथं युध्येत्।।73।।

When relieved or set free, a besieged force, becoming highly efficient may fight; and an army surrounded on all sides and without any outlet, must also fight.

अमानितं हि युध्येत कृतमानार्थसङ्ग्रहम्।
न विमानितमत्यर्थं प्रदीप्तक्रोधपावकम्।।74।।

---

1. 'हसम्बद्धं ब' क पाठ:

कृतमानार्थसङ्ग्रहं[1] कृतो मानार्थाभ्यां स्वीकारो यस्येति विग्रहः। विमानितं[2] वाक्पारुष्यादिना। क्रोधपावकः क्रोध एव पावकः॥74॥

An unhonored army when duly honored, will fight ;but a dishonored army, with its burning fire of indignation, will never do so.

युध्येताभृतमत्यर्थं तदात्वकृतवेतनम्।
न व्याधितमकर्मण्यं व्याधितं परिभूयते॥75॥

तदात्वकृतवेतनं समुत्पन्नकार्यकाले[3] दत्तवेतनम्। अकर्मण्यं व्याधिपीडितत्वाद् युद्धादिकर्मासमर्थं परिभूयते च॥75॥

An army badly paid will fight, when it is duly paid up to date; but a diseased and disordered one will not do so; for then, it will be defeated.

परिश्रान्तं हि युध्येत विश्रान्तं [4]सुविधानतः।
दूरायातं हतप्राणं न शस्त्रग्रहणे क्षमम्॥76॥

विश्रान्तं सुविधानतः स्नानभोजनस्वप्नादिभिः। हतप्राणं दूराध्वपरिपीडितत्वात्॥76॥

After enjoying proper rest, an overworked and fatigued army will again face the campaign; but an army returned from distant lands with its energy drooping, becomes incapable of using weapons.

नवागतं हि युध्येत तद्देश्यैर्मिश्रितं नयात्।
हतमुख्यप्रवीरं[5] तु परिक्षीणं न युध्यते॥77॥

नवागतम् अन्यदेशादागतम्। तद्देश्यैस्तत्रत्यैर्बलैः। मिश्रितं नयात्

---

1. 'हः' च पाठः
2. 'तः' च पाठः
3. 'न्नकाले' क-ख-ग-घ पाठः
4. 'हि' क पाठः
5. 'युग्यप्र' क पाठः

तद्देश्योपलब्धदेशम्। हतमुख्यप्रवीरम् अन्यत्राहवे। (परिक्षीणं) क्षीणवाहनयोधम्।।77।।

A newly recruited force will flight when united with older regiments of the territory; but an army with its brave warriors killed and reduced in number will not fight.

युध्यते हि प्रतिहतं प्रवीरैः सह सङ्गतम्।
हताग्रवेगं [1]शक्तं न प्रमाथितपुरस्सरम्।।78।।

प्रतिहतं प्रथमसम्पातभग्नम्। प्रमाथितपुरस्सरं निहताग्रवीरं शूराभावान्न तच्छक्तम्।।78।।

A army in retreat, supported by brave heroes will again face the battle; but an army, with its leaders slain and its head slaughtered, will turn away from the fight.

आशानिर्वेद्यलब्धार्थं पूर्णाशत्वात् तु सुध्यते।
अभूमिष्ठं प्रसारे न [2]निरुद्धोऽल्पतया भुवः।।79।।

आशानिर्वेदीति। प्रत्याशाया[3] निर्वेदो भङ्गोऽस्यास्तीति मत्वर्थीयः। अभूमिष्ठम् अयुद्धयोग्यभूमिप्राप्तम्। प्रसारो व्यायामः, तस्मिन् भूमेरल्पत्वान्निरुद्धे।।79।।

When its hopes are realized and its disappointments removed, a force will not fight, for then, there will be nothing encouraging it to risk a battle. When confined within a small area, an army will not fight, in consequence of the narrowness of the field.

युध्येतानृतसम्प्राप्तं यथार्हायुधवाहनम्।
कलत्रगर्भि चोन्नीतकलत्रं [4]समरक्षमम्।।80।।

यथा (शक्त्या? र्हा) युधवाहनं यथाकालैरायुधवाहनैर्युक्तम्। कलत्रगर्भिचेति। अयुद्धयोग्यः स्त्रीकर्मकरवर्गः कलत्रं, तेनान्तःप्रविष्टेन युक्तम्। समरं युद्धम्।।80।।

---

[1] 'स्त' ख-ग पाठः

[2] 'युध्येताल्प' मूलकोशपाठः

[3] 'श' च पाठः

[4] 'सङ्गर' क पाठः

An army at first besieged and then set free, will fight when equipped with the implements of war horses, conveyances and weapons and an army having women with it becomes capable of fighting when the women are removed.

अनेकराज्यान्तरितमतिक्षिप्तं[1] न युध्यते।
अन्तर्गतामित्रशल्यमन्तःशल्यं हि[2] न क्षमम्।।81।।

अनेकराज्यान्तरितं शत्रुमित्रादिराज्यातिक्रान्तम्[3]। अमित्र एव शल्यम्।।81।।

An army scattered over different kingdoms, and away from home, will not fight whole heartedly, and one with the thorns set by the enemy within it, becomes incapacitated for active service.

अन्योन्यस्माद्[4] विनिर्भिन्नं[5] भिन्नगर्भं न युध्यते।
तथैवापसृतं शक्तं नैकराज्यान्तरीकृतम्।।82।।

अन्योन्यस्माद् विनिर्भिन्नं परस्परभयान्न युध्येत। नैकराज्यान्तरीकृतमिति शत्रुराज्येनैकान्तरितं न युध्यते। एतच्चातिक्षिप्ताल्लघु व्यसनम्।।82।।

An army torn by dissensions, with its soldiers opposing one another, does not fight or unfit for battle, so also an army despatched to a foreign mandala or realm -does not fight.

[6]अवमुक्तमपक्रान्तमुख्यं तन्न क्षमं युधि।
पितृपैतामहं मौलं तत् क्रुद्धं सान्त्वितं क्षमम्[7]।।83।।

अपक्रान्तमुख्यमिति। शौर्यादियुक्ता मुख्याः, [8]तेऽपसृता यस्मात् तद्

---

[1] 'क्षीणं न' ख-ग पाठः
[2] 'च तत्सम' ख-ग पाठः
[3] 'ज्यान्तरितम्' ङ च पाठः
[4] 'कोपनि' क पाठः
[5] 'तु' ख-ग पाठः
[6] 'परिमृष्टमविका' क पाठः
[7] 'बलम्' क पाठः
[8] 'ते प्रसृ' ग-घ पाठः

बलमपक्रान्तमुख्यम्। तत्र क्षमं युधि। मुख्येषु हि युद्धं, न क्षुद्रेषु[1]। सान्त्वितं क्षममिति। यत्र मौलं कुपितं, तत् सान्त्वितं[2] युधि क्षममिति योज्यम्।।83।।

An army that had not travelled to foreign lands, and one that has fled away, cannot fight. An army that has served the forefathers of a king will not fight, when it is enraged; but when satisfied, it will fight most happily.

मित्रं शत्रुभिरेकस्थं तदाक्रान्ततयाक्षमम्।
शत्रोरुपनिविष्टं तत्सामर्थ्यान्न क्षमं युधि।।84।।

एकस्थमिति शत्रुभिः सह यात्रायामेकस्थानस्थितम्। तदरिमित्रं बलम्। तदाक्रान्ततयेति अरिमित्रापगृहीतत्वादक्षमम्। [3]उपनिविष्टं शत्रोः समीपे निविष्टं। पृथग्यानावस्थितं[4] प्राधान्यानवस्थानादाक्रान्तं भवति। ततश्चासामर्थ्यान्न क्षमं युधि।।84।।

An army edged in on all sides by the enemy and confined in one place, cannot fight; and troops whose camp is assailed by the enemy also become incapable of fighting well.

दूष्ययुक्तं [5]तदुद्धाराद् युध्येतोद्धृतकण्टकम्।
प्रधानयोधसंगुप्तं दूष्ययुक्तं समुत्पतेत्।।85।।

तदुद्धारादिति। शल्योद्धारादुद्धृतकण्टकं भवति। अनुद्धरे वा[6] गत्यन्तरमाह– प्रधानयोधसंगुप्तमिति। आप्तयोधाधिष्ठितं हि दूष्ययुक्तं समुत्पतेद् युध्येत्।।85।।

An army with the enemy within its ranks will not fight but when these thorns -the enemies are removed, it will fight; an army though corrupted by the enemy, will fight, if led by courageous warriors.

---

[1] 'षु तत् क्षतम्। सा' क-ख-ग-घ पाठः

[2] 'तं बलं यु' क-ख-ग-घ पाठः

[3] 'पविष्टं पृ' क-ख-ग-घ पाठः

[4] 'तं तदा' ङ-च पाठः

[5] 'न युध्येत यु' मूलकोशेषु पाठः

[6] 'चापि विध्यन्त' ङ पाठः

स्वविक्षिप्तं स्वविषये क्षिप्तमापद्युदाहृतम्।
प्रकृष्टदेशकालत्वान्मित्रक्षिप्तमयौगिकम्।।86।।

स्वविक्षिप्तम् आपद्युदाहृतम्। कौटिलीये तथाह्युक्तं "स्वविक्षिप्तं स्वभूमौ विक्षिप्तं सैन्यमापदि शक्यमावाहयितुं, न मित्रविक्षिप्तं प्रकृष्टदेशत्वाद्" (कौ० अर्थ० 8.5.133, 134) इति। मित्रविक्षिप्तम् असाध्यसाधनार्थं मित्रेषु दत्तम्।।86।।

An army is said to be neglectful of its own interest's when in times of danger it remains inactive. An army engaged in serving an friend in consequence of its excellent advantages regarding time and position, cannot be properly used .

धान्यादेर्विवधः प्राप्तिरासारस्तु सुहृद्बलम्।
विच्छिन्नवीवधासारं बलं युद्धाय नेष्यते।।87।।

धान्यादेरिति। आदिशब्दात् स्नेहक्षारलवणभैषज्यादिपरिग्रहः। स्वदेशात् तेषां पृष्ठतः प्राप्तिर्विवधः[1]। मित्रबलमासारः। तदुभयं विच्छिन्नं यस्य तदाहारादिवैकल्यान्न युद्धाय।।87।।

The supply of food and clothing is called Vivadha and Asara which are means for the troops of the friends. An army cut of from the supply of food and clothing and from the support of the troops of the friends cannot fight.

कृतजानपदारक्षं शून्यमूलं युधि क्षमम्।
पितृपैतामहं मौलं तेन शून्यं हि[2] न क्षमम्।।88।।

शून्यमूलमिति। शून्यं स्थानीयं यस्य तद् जानपदैः कृतमूलरक्षणं सर्वसन्दोहेन युध्येत।।88।।

The troops that have no shelter to secure the families and properties) will fight when shelter is provided by the people. An army that acts without the orders of its master, is not attached to him is faithless), and will not fight.

---

[1] 'वीं' च पाठः

[2] 'तदक्ष' ख-ग पाठः

युध्यते शून्यमूलं हि यत्नान्मौलेन पालितम्।
अस्वामिसङ्गतं नैव स्वामिना यद् विनाकृतम्।।89।।

स्वामिना यद् विनाकृतमिति। यन्नापद्यधिष्ठितं तदस्वामिसङ्गतं नैव युधि क्षमम्।।89।।

An army becomes leaderless when everyone in it, is his own master, and no one is accepted as leader; such an army is incompetent to fight ; so also, a disabled army and one with a bad Parshnigraha, are incapable of fighting.

न युध्यते भिन्नकूटं भिन्नकूटमनायकम्।
पश्चात् कोपातिसन्तप्तं दुष्पार्ष्णिग्राहमक्षमम्।।90।।

भिन्नकूटमनायकं विनष्टा (रिमी? त्मी) यस्वामिपदम्। तद् भर्तृवधामर्षितं भर्तृपिण्डेन निर्वेशार्थं युध्येत। दुष्पार्ष्णिग्राहमिति। दुष्टः पार्ष्णिग्राहो यस्य तत्, किमयं करिष्यतीति पृष्ठाभिघातत्रस्तं, न तत् क्षमम्।।90।।

An army ignorant of the state of affairs about it is said to be blind, and for this reason, it is incompetent for fighting. These are the Vyasanas of the army, carefully observing them, king should undertake a war.

अदेशिकं स्मृतं ह्यन्धं तन्मूढत्वात् क्रियाक्षमम्।
बलव्यसनमित्यादि तत् समीक्ष्य समुत्पतेत्।।91।।

अदेशिकमिति। देशिक उपदेष्टा। स्वयं तावद् बलमदेशकुशलं, तस्योपदेष्टापि नास्तीत्यदेशिकम्। [1]मूढत्वादन्धत्वादस्य सर्पवत् प्रवर्तनं क्रियास्वक्षमम्। बलव्यसनमित्यादि। आदिशब्दात् कामकोपजव्यसनोपग्रहः। तत् समीक्ष्य साध्यासाध्यतया।।91।।

An friend is said to be the under the influence of the vyasanas when he is suffering from the afflictions of Fate, or is assailed on all sides by the forces of the foe, or is possessed of the defects arising out of lust and anger, which have been enumerated above.

---

[1] 'त्वादस्य' ङ-च पाठः

[1]दैवोपपीडितं ग्रस्तं[2] मित्रं शत्रुबलेन च।
कामक्रोधसमुत्थैश्च दोषैः संपरिकीर्तितैः।।92।।

मित्रव्यसनमाह– दैवोपपीडितमिति। दैवव्यसनाभिभूतम्। कामक्रोधसमुत्थितैर्मृगयादिभिर्वाक्पारुष्यादिभिश्च स्वदोषैर्ग्रस्तम्।।92।।

Beginning with the king, of the seven constituents of a government that have been described above, the vyasanas of each preceding constituent is serious than the one following it.

नरेन्द्राद्याः प्रकृतयः सप्त याः परिकीर्तिताः।
पूर्वंपूर्वं गुरुतरं तासां व्यसनमुच्यते।।93।।

नरेन्द्राद्या इत्यादि। पूर्वंपूर्वं गुरुतरमिति। तत्र मित्रव्यसनाद् दण्ड-अरिविजिगीष्वोः प्रकृतिव्यसनयौगपद्ये सौकर्यतो यातव्यं[3] चेति दर्शयितुमाहव्यसनं गरीयः। दण्डेन मित्रामित्राणां साधनात्। दण्डवतो मित्रा (णाम?णि) मित्रभावे तिष्ठन्ति, अमित्राश्च मित्रभावे। ततोऽपि कोशव्यसनं गरीयः। कोशेन हि क्षीणं बलं वर्धते। कोशाभावे च दण्डः परं गच्छति। ततोऽपि दुर्गव्यसनम्। तत्र हि कोशदण्डयोः संश्रयात्। तदभावे च कोशः परेषामेव स्यात्। ततोऽपि जनपदव्यसनम्।[4] तन्मूलत्वाद् दुर्गकोशदण्डमित्राणाम्। तस्मादप्यमात्यव्यसनं गरीयः। जनपदे[5] हि सर्वारम्भाणाममात्यपूर्वकत्वात् सर्वकर्मसिद्धीनां तद्व्यसनप्रतीकारस्य च। ततोऽपि स्वामिव्यसनम्। स्वामिना हि शेषप्रकृतीनामसम्पन्नानां सम्पादनात् सम्पन्नानां चाभिवर्धनात्।।93।।

A king should be acquainted of all these vyasanas of the members of his kingdom; and he, without letting the right opportunity slip away, should exert himself in removing them to the best of his powers, intelligence and endeavours.

---

1. 'वेन पी' ख-ग पाठः
2. 'ण्डे नि' च पाठः
3. 'व्यं रक्षितं चे' क-ख-च पाठः
4. 'दस्य व्य' क-ख-ग-घ पाठः
5. 'देऽपि हिं' ङ पाठः

इत्यादि सर्वं प्रकृतेर्यथावद् बुध्येत राजा व्यसनं प्रयत्नात्।
बुद्धा च शक्तया व्यसनस्य कुर्यादकालहीनं व्यवरोपणं स[1]:।।94।।

व्यसनप्रदर्शनफलमाह– इत्यादीति। अकालहीनं व्यवरोपणं, कालातिक्रमे हि तदप्रतीकार्यमपि स्यात्।।94।।

A monarch desirous of the welfare and prosperity of his kingdom should not overlook, out of mistake or overconfidence, the vyasanas that may overtake the Prakritis. He that neglects the vyasanas of his Prakritis is, defeated by his enemies.

प्रकृतिव्यसनादि भूतिकामः स्वमुपेक्षेत न हि प्रमाददर्पात्।
प्रकृतिव्यसनान्युपेक्षते यो नचिरात् तं रिपवः पराजयन्ते।।95।।

यदाह– प्रवृ्फतिव्यसनानीत्यादि। प्रमादाद् दर्पात् कामासङ्गात् शौर्यावलेपाच्च।।95।।

Weighing gravely what should be done, a king should apply himself to the performance of his duties. Undertaking his best, he should see the end of all his actions. A ruler of earth, the '.constituents of, whose kingdom are purged of all their defects and drawbacks through his wise policy, enjoys for a long time, the three objects of life.

इदमिदमिति सम्यक् कर्मणा योजनीयं
नियतमिति विचिन्त्य प्रापयेदीहमानः।
[2]सुनयपिहितरन्ध्रः प्राकृतो यस्य वर्गः
क्षितिपतिरुपभुङ्क्ते स त्रिवर्गं चिराय।।96।।

इदमिति वस्तुमात्राभिधानान्नपुंसकलिङ्गता। इतिशब्दस्तस्मादर्थे। प्रकृतिव्यसने यस्मादयं दोषस्तस्मादियं प्रकृतिरनेन कर्मणा योजनीया, तेन चेयमिति सम्यग् विचिन्त्य पश्चाच्चेष्टमानस्तद् नियतं कर्म प्रापयेत् प्रकृतिम्। ततः किं स्यादित्याह–

---

[1] 'यत्' ख-ग पाठः

[2] 'निहितमन्त्रः प्रा' क पाठः

सुनयपिहितरन्ध्र इति, कर्मप्रापणलक्षणेन[1] सुनयेन प्रच्छादितव्यसनः। प्राकृतः सप्तप्रकृतिको वर्गः।।96।।

In this way the ruler who always after due discussions employs his prakritis to their respective functions sees the end of them. By remedying the ill effects of vyasanas-addictions affecting the prakritis by his sensible plan the ruler enjoys the fruit of trivarga relentlessly.

(इति प्रकृतिव्यसनानि नाम द्वाविंशं प्रकरणम्)

इति कामन्दकीये नीतिसारे उत्साहप्रशंसा-प्रकृतिकर्म-प्रकृतिव्यसनानि नाम चतुर्दशः सर्गः।

---

[1] 'निपुणेन' क-ख-ग-घ पाठः

अथ पञ्चदशः सर्गः (Canto – 15)

त्रयोविंशं प्रकरणम्

सप्तव्यसनवर्गप्रकरणम्

(Seven Varities of lapses of state)

अमात्याद्याः प्रकृतयो मित्रान्ता राज्यमुच्यते।
[1]अशेषराज्यव्यसनात् पार्थिवव्यसनं गुरु।।1।।

प्रकृतिव्यसनेषु सप्तवर्गस्य महाव्यसनत्वात् तद्दोषदर्शनार्थमस्मिन् सर्गे सप्तव्यसनवर्ग[2] उच्यते। तत्रेदं विचिन्त्यते 'पूर्वपूर्वं गुरुतरम्' (सर्ग० 14. श्लो० 93) इत्युक्तम्। तत्र राज्ञो राज्यस्य चोभयोर्व्यसने कतरद् गुर्वित्याह– अमात्याद्या इति। अशेषराज्यव्यसनात् पार्थिवव्यसनं गुर्विति सप्तप्रकृतिकं राज्यमिति[3] नेह द्रष्टव्यमिति। अशेषराज्यव्यसनादिति। अमात्यानां बहुत्वात् तद्व्यसनमेव गुर्विति पूर्वपक्षवादिनोऽभिप्रायः।।1।।

Prakriti's, beginning with the minister and ending with the friend, are said to be the constituents of an administration. Of all the weaknesses of the government, the gravest is the weakness of the ruler of earth.

राजा त्वव्यसनी राज्यव्यसनापोहनक्षमः।
न राजव्यसनापोहे समर्थं राज्यमूर्जितम्।।2।।

राज्यव्यसनापोहनक्षमः स्व[4]यमव्यसनित्वाद् राज्यव्यसनित्वाद् राज्यव्यसनापोहनसमर्थः। राज्यमूर्जितमपि। स यच्छीलस्तच्छीलास्तस्य प्रकृतयो भवन्ति, उत्थाने प्रमादे च तदायत्तत्वात्। कूटस्थानीयो हि स्वामीति।।2।।

---

[1] 'अनेकरा' क-ग पाठः

[2] 'नान्युच्यन्ते' क-ख-ग-घ पाठः

[3] 'ज्यं ने' ङ-च पाठः

[4] यं व्यसनित्वान्न रा ङ च पाठः

A monarch free from all flaws is capable of redeeming the faults of the government; but a prosperous government cannot rescue its head -the king from his weaknesses.

आत्मामात्यप्रजादुर्गकोशानां दण्डमित्रयोः।
व्यसनेभ्यः समुन्नेता राजा यः स त्रिवर्गभाक्।।3।।

तस्मादात्मीयव्यसनापोहे स एव (प? द) क्ष इत्याह– आत्मेत्यादि। तत्र द्विधा राजा चक्षुष्मान् (अचक्षुष्मांश्च)। चक्षुष्मानपि द्विविधः सुगृहीतशास्त्रोऽगृहीतशास्त्रश्च। तत्र यः सुगृहीतशास्त्रश्चक्षुष्मान् स व्यसनेभ्यः समुन्नेता समुत्थापयिता।।3।।

A king who can rescue himself his ministers subjects forts treasury armed forces and allies from the grip of vyasanas becomes entitled to the enjoyment of the fruits of trivarga.

अशास्त्रचक्षुर्नृपतिरन्ध इत्यभिधीयते।
वरमन्धो न चक्षुष्मान् मदादाक्षिप्तसत्पथः।।4।।

अशास्त्रचक्षुरिति। शास्त्रमेव चक्षुस्तदस्य नास्तीति कृत्वान्ध उच्यते। वरमन्धो न चक्षुष्मानिति। चलितशास्त्रस्त्वचक्षुष्मान्। स हि शास्त्रादन्यथा निविष्टबुद्धिर्ज्ञानमदाक्षिप्तसन्मार्गो भवति।।4।।

A king who does not possess the eye of political knowledge is said to be blind; it is better to have such a blind king than one, who possessed of eyes, contravenes the path of righteousness out of pride or negligence.

मन्त्रिभिर्मन्त्रकुशलैरन्धः पथि निवेश्यते।
चक्षुष्मांस्तु मदान्धः सन्नात्मानं हन्त्यशेषतः।।5।।

तदेव स्फुटयन्नाह– मन्त्रिभिरिति। 'अन्धः सञ्चार्यते धर्मादि' त्याचार्यरविगुप्तपादैः। अशेषतः सह राज्येन हन्तीत्यर्थः।।5।।

Such a blind monarch may be rescued from ruin by his ministers skilled in giving advice. But when a king, though possessed of the eye of political knowledge blinded by pride, he completely ruins himself.

शास्त्रचक्षुर्नृपस्तस्मान्महामात्रमते स्थितः।
धर्मार्थप्रतिघातीनि व्यसनानि परित्यजेत्।।6।।

[1]यस्मादन्धेऽपि (न) दोष:, तस्मात् सुगृहीतशास्त्रचक्षुषा भवितव्यं, तस्यैव व्यसनापोहनसामर्थ्यात्। यदाह– शास्त्रचक्षुरिति। महामात्रमते स्थित: नृपामात्ययोर्हि परस्परानुकूलयो: सर्वसम्पत्सम्भवात्। धर्मार्थप्रतिघातीनोति। धर्मार्थयो: प्रधानत्वात् तदुपघातीनि त्यजेत्।।6।।

For these reasons, a king possessed of the eye of polity, following the advices of his prime minister, should avoid the weaknesses that deface virtue and wealth.

वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च।
स्मृतं व्यसनतत्त्वज्ञैः क्रोधजं व्यसनत्रयम्।।7।।

तानि व्यसनान्याह– वागित्यादि। क्रोधजं व्यसनत्रयं, वाक्पारुष्यादीनां कोपसमुत्थत्वात्।।7।।

Callousness in speech and in the punishments meted out, and unjust seizure of property and withholding of what is due,—these are said to be the weaknesses, these three weaknesses arise out of anger.

कामजं मृगया द्यूतं स्त्रियः पानं तथैव च।
व्यसनं व्यसनार्थज्ञैश्चतुर्विधमुदाहृतम्।।8।।

कामजं व्यसनं चतुर्वर्ग, मृगयादीनामिच्छाप्रभवत्वात्।।8।।

Excessive indulgence in hunting, gambling), women's company and drinking—these are the four kinds of weaknesses produced by lust.

वाक्पारुष्यं परं लोक उद्वेजनमनर्थकम्।
न कुर्याद् विप्रियां वाचं प्रकुर्याज्जनमात्मसात्।।9।।

तत्रैकादशभि: श्लोकै: कोपजस्य दोषानाह– वाक्पारुष्यमित्यादि। अपवाद:,

---

1. 'दन्येऽपीत्येष दो' ङ च पाठ:

कुत्सनम्, अभिभर्त्सनं चेति वाक्पारुष्यम्। तदनर्थकं न कुर्यात्। कार्यापेक्षया क्रियमाणं न व्यसनमिति।।9।।

Among men, harshness in speech causes excessive trouble and is creates harm; it should therefore not to be practiced. On the other hand, a king should win the good-will of the public by his sweet and melodious speech.

अकस्मादेव यः कोपात् [1]परुषं बहु भाषते।
तस्मादुद्विजते लोकः सस्फुलिङ्गादिवानलात्।।10।।

कथं तदुद्वेजनमित्याह– अकस्मादित्यादि। बहुभाषणं दुरुक्तमित्यर्थात्। तस्मादुद्विजते लोको दुर्वचनदण्डत्वात्।।10।।

King that by fits and starts, often speaks too much in anger causes thereby much anxiety to his subjects, like firing brings abundant sparks.

[2]हृदये वागसिस्तीक्ष्णो मर्मच्छिन्निपतन् मुहुः।
तेजस्विनं दीपयति स दीप्तो याति वैरिताम्।।11।।

दोषान्तरमाह– हृदय इत्यादि।।11।।

Sharp dagger like words penetrating into the core of the heart and cutting quickly, excites a powerful person and thus excited, turns him to be an enemy.

नोद्वेजयेद् जगद् वाचा रूक्षया प्रियवाग् भवेत्।
प्रायेण [3]प्रियवाक्कर्मा कृपणोऽपि हि सेव्यते।।12।।

नोद्वेजयेद् जगद् यथोक्तदोषपरिहारार्थम्। प्रियवाक्कर्मा प्रियाभिधायी। कृपणः अदाता।।12।।

A monarch should not excite the public by harsh words; he should be sweet in his speech; even an evil monarch, acting in a kind and friendly manner, is faithfully served by the people.

---

1. 'तीक्ष्णं सुब' ख-ग पाठः
2. 'निपतन् वागसिस्तीक्ष्णो हृदये मर्महा मुहुः' क पाठः
3. 'वाग् लोके कृ' क पाठः

असिद्धसाधनं सद्भिः शासनं दण्ड उच्यते।
तं युक्तयैव नयेद् दण्डं युक्तदण्डः प्रशस्यते।।13।।

दण्डपारुष्यमाह– असिद्धसाधनमिति। अर्थहरणं ताडनं वधश्चैतत् त्रितयमसिद्धार्थसाधनादनुशासनं दण्डः। तं युक्त्यैव नयेद् अनुशास्ये यथार्हमेव प्रवर्तयेत्। युक्तदण्डस्य राज्ञः प्रशस्यत्वात्। तेनैवंविधो न व्यसनमिति।।13।।

The subjugation of the unsubjugated people and their discipline is called Danda by the wise. One should deal out Danda according to the rules of polity; for infliction of punishments on those deserving them is commendable.

उद्वेजयति भूतानि दण्डपारुष्यवान् नृपः।
भूतान्युद्वेज्यमानानि द्विषतां यान्ति संश्रयम्।।14।।

अयुक्तो दण्ड्ये चादण्ड्ये च प्रवर्तमानो दोषावहत्वाद् व्यसनमित्याह– उद्वेजयतीत्यादि।।14।।

A cruel king, in the infliction of punishments stimulates fear in the heart of the people ; thus troubled, they seek the protection of the enemy.

आश्रिताश्चैव लोकेन [1]समृद्धिं यान्ति विद्विषः।
[2]समृद्धाश्च विनाशाय तस्मान्नोद्वेजयेत् प्रजाः।।15।।

आश्रिता विद्विष इति सम्बन्धः। लोकेनोद्वेजितेन। विनाशाय विजिगीषोः।।15।।

In this way affording shelter to the people, the enemy rises to power; and a powerful enemy cause's destruction. For these reasons, a monarch should not stimulate the anxiety of his subjects.

लोकानुग्रहकर्तारः प्रवर्धन्ते[3] महीभुजः।
लोकवृद्धा नरेन्द्राणां वृद्धिस्तत्संक्षये क्षयः।।16।।

---

[1] 'विवृद्धि' क पाठः

[2] 'विवृद्धा' क पाठः

[3] 'र्तं' ख-ग पाठः

लोकानुग्रहकर्तार इति। धान्यपशुहिरण्योपसङ्ग्रहैर्लोकमनुगृह्णन्तो[1] वर्धन्ते[2]। दण्डवाक्पारुष्याच्च निगृह्णन्तः क्षीयन्ते। यदाह– लोकवृद्धेति। अनुगृहीते लोके जनवृद्धा राज्ञां वृद्धिः। निगृहीते तु तत्संक्षयात् क्षयः॥16॥

Rulers of the earth doing good to the people grow in prosperity; their growth depends on the growth of the people, and their ruin is the king's ruin.

महत्स्वप्यपराधेषु दण्डं प्राणान्तिकं त्यजेत्।
ऋते राज्यापहारात् तु तत्र दण्डः प्रशस्यते।।17।।

दण्डेष्वपि वधाख्यं दण्डं लोकजिघृक्षार्थं त्यजेदित्याह– महत्स्वपीति। बन्धताडने त्वनुशासनार्थं प्रवर्तयेदेव। ऋते राज्यापहारादिति। राज्यापहारे त्वपराधे वधाख्य एव दण्डः प्रशस्यते, तदर्थत्वात् प्रयासस्य॥17॥

Except in the case of the plundering of the kingdom, a king should avoid the infliction of the capital punishment, even in the gravest of offences. In the aforesaid instance only, such punishment is commendable.

दूष्यस्य दूषणार्थं हि परित्यागो महीयसः।
अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते।।18।।

अर्थदूषणमाह– दूष्यस्येत्यादि। अर्थदूषणम् अर्थस्योपघातः। तथाह्युक्तम् 'अदानमादानं विनाशः परित्यागश्चार्थस्येत्यर्थदूषणम्' (कौटि० अर्थ० 8.3.129) तत्र पूर्वप्रवृत्तस्यार्थस्योच्छेदाददानम्। तस्य पण्यागारादिनाकर्षणम् आदानम्। स्वयमार्जितस्याग्न्यादिना विध्वंसनं विनाशः। कुतश्चिल्लभ्यमानस्य विघातनेन परित्यजनं परित्यागः। तदिदं क्रोधोत्कर्षसन्दर्शनार्थं परित्यागादर्थ-दूषणमुक्तम्। दूषणार्थम् अपकारार्थं, यद् [3]दूष्योऽन्यस्तस्मान्महीयांसमर्थं प्राप्स्यति। तस्यार्थस्य विघातनेन परित्यजनमर्थदूषणम्॥18॥

The expenditure of a considerable amount of money in

---

1. 'पग्र' घ पाठः
2. 'र्तं' क-ख-ग-घ पाठः
3. 'ध्योस्मा' ङ पाठः

order to release a culprit , is said to be Arthadusana by those conversant with the essentials of polity.

तदकस्मात् समाविष्टः कोपेनातिबलीयसा।
नित्यमात्महिताकाङ्क्षी न कुर्यादर्थदूषणम्।।19।।

तच्च दूष्ये क्रियमाण(म) व्यसनम्। अन्यत्र तु व्यसनमेवेत्याह– तदकस्मादिति। कार्यं विनेत्यर्थः। कोपेनातिबलीयसेति महतः कोपात् परित्यागाख्यमर्थदूषणमुत्पद्यत इति दर्शयति, यस्मादन्यस्मादपि लभ्यमानमर्थं घातयति॥19॥

The knocking of the conveyances, their destruction ;the sufferings caused by hunger, thirst, fatigue, exertion, cold, heat and the wind.

यानक्षोभो यानपातो यानाभिहरणं तथा।
[1]क्षुत्पिपासाश्रमायासशीतवातोष्णपीडनम्।।20।।

इदानीं सप्तचत्वारिंशता श्लोकैः कामजस्य दोषा उच्यन्ते। तत्र मृगयामधिकृत्याह– यानेत्यादि। यानक्षोभः यानकृतोऽङ्गसंक्षोभः। यानात् प्रधावतः पातः। यानेन प्रजविना अभिहरणम् अनभिमतदेशप्रापणम्। पीडनशब्दः क्षुदादिभिः प्रत्येकं योज्यः। आयासः पण्यादीनां व्यापारक्लेशः॥20॥

The infliction of much distress arising out of Yana-vyasana on the army; heated, sandy and thorny soils ;

अभियानस्य सम्पत्त्या यानव्यसनजं महत्।
दुःखं प्रतप्तसिकताकुशकण्टकभूमयः।।21।।

अभियानस्य सम्पत्त्येति। अभिमुखीभूतस्यान्यदीयाश्वस्य सम्पातेनात्मीयाश्वयानस्याघातः पातो वा व्यसनं, तस्माज्जातं महद् दुःखं भवति, अश्ववरानाक्रम्य तस्य सम्पतनात्। प्रतप्तसिकतादिभिः कुशकण्टकैश्च चितभूमयो दुःखहेतवः॥21॥

Injuries done by collision with trees, scratches from thorns and plants; difficulties caused by rocks, creepers,trunks of trees and earthen mounds.

वृक्षसङ्कटजा देशा लताकण्टकपातनम्।
शैलपातशिलाजालस्थाणुवल्मीकपीडनम्।।22।।

---

1. 'सा: शी' ख. ग. पाठ:

वृक्षसङ्कटजा देशाः तत्र हि प्रविष्टस्य दुःखेन निर्गमनम्। तत्र कम्भारीकण्टकारिकादिलताकण्टकैः पातनम्। तथा शैलात् पातो मृगमनुसरतः शिलाजालादिभिः पीडनम्।।22।।

Such expeditions cause much misery while travelling through regions excessively hot, sandy or full of thorns or dense forests infested with thorny creepers and shrubs or hill tracts with likely dangers from fall of boulders or from unevenness of track due to stones earthen mounds and ant hills.

प्रच्छन्नोपहितैः शैलसरिद्विपिनकुक्षिषु।
वधबन्धपरिक्लेश[1] आसन्नाटविकादिभिः।।23।।

प्रच्छन्नोपहितैरिति। अवस्कन्दादिदानार्थं शैलादिकुहरेषु प्रच्छन्नलीनैः। आसन्नाटविकादिभिरिति। आदिशब्दात् स्तेनावरुद्धाद्युपग्रहः।।23।।

Capture or death by the hands of foresters and enemies hidden behind rocks, or in the beds of rivers or inside underwood's and woods.

स्वसैन्यैश्च स्वकुल्यैश्च परभिन्नैश्च मारणम्।
ऋक्षाजगरमातङ्गसिंहव्याघ्रभयादि[2] च।।24।।

स्वकुल्यैः पराभिन्नैरिति। राज्यार्हा यूयं, [3]कथं विजिगीषुणैकेनाक्रामता[4] भुज्यमानमुपेक्षन्ते भवन्तः, वयं च सहाया इति परेण भिन्नैर्विजिगीषुसैन्यैश्च मृगयां गतस्य प्रमापणमाघातः। साक्षादृक्षादिभ्यः प्राणोपघातिभ्यो भयादीति।।24।।

Assassination by his own troops prevented over by the enemy; danger of falling a prey to bears, serpents, elephants,lions, and tigers.

दवाग्निधूमसंरोधो दिङ्मोहभ्रमणानि च।
इत्यादि पृथिवीन्द्राणां मृगयाव्यसनं स्मृतम्।।25।।

---

1. 'शःसामन्ताट' क पाठः
2. 'नि' क पाठः
3. 'थं तु वि' ङ पाठः
4. 'न भज्य' क-ख-ग-घ पाठः
5. 'भ्रमणादरिवि' ङ पाठः

अरण्यमध्यवर्तिनो वनाग्निधूमाभ्यां प्राणोपघाती संरोधः। दिङ्मोहभ्रमेण[5] रिपुविषयगमनमपि स्यादित्यादिदोषजातं मृगयाव्यसने स्मृतम्। आदिशब्दाद् दशरथादिवच्छापादेरपि भयं द्रष्टव्यम्।।25।।

Choking of the breath by the smoke of the forest fire; and mistaking the way or direction and the consequent wandering—these are said to be the Mrigya-vyasana

जितश्रमत्वं व्यायाम आममेदःकफक्षयः।
चलस्थिरेषु लक्षेषु बाणसिद्धिरनुत्तमा।।26।।

राज्ञो गुणानावहति मृगयेत्यन्ये, यदाह– जितश्रमत्वमिति। चलस्थिरेष्विति। धावत्सु तिष्ठत्सु च बाणसिद्धिः लक्ष्यसाधनात्।।26।।

Indefatigability, physical exercise, the cure of phlegm, fat and indigestion, and excellent sureness in shooting arrows at moving or steady aims,

मृगयायां गुणानेतानन्ये प्राहुर्न तत् क्षमम्।
दोषाः प्राणहराः[1] प्रायस्तस्मात् तत् [2]परिवर्जयेत्।।27।।

न तत् क्षममिति। न तद् मृगयाव्यसनं युक्तम्।।27।।

These are spoken of by others to be the goods proceeding from hunting; but this view cannot be accepted. The evils of hunting are almost all of a fatal nature. So, hunting is a great Vyasana.

आमादयो हि[3] जीर्यन्ति योग्ययैव दिवानिशम्।
चलेषु यन्त्रलक्षेषु बाणसिद्धिश्च[4] जायते।।28।।

कुतस्तर्हि तद्गुणा इत्याह– आमादय इति। योग्यता आयुधवाहनशिक्षया। यन्त्रलक्षेषु यन्त्रघटितेषु मृगादिलक्षेषु।।28।।

Indigestion and other such physical complaints may also be cured by constant healthy exercise on horseback; and sureness in shooting arrows at moving aims, can also be mastered in other ways.

---

[1] 'स्प्रायास्त' ख-ग पाठः

[2] 'व्यसनं महत्' क पाठः

[3] 'पि' क पाठः

[4] 'स्तु' ख-ग पाठः

अथ चेन्मृगयाक्रीडावाञ्छा तन्नगरान्तिके।
कारयेन्मृगयारण्यं क्रीडाहेतोर्मनोहरम्।।29।।

तन्नगरान्तिके राजनगरसमीपे। मृगयारण्यं मृगयावनम्।।29।।

But if a king is ardently desirous of enjoying the pleasures of the hunt, let a beautiful park be constructed at the precincts of the town, for his sports.

परिक्षिप्तं परिखया [1]दुर्गया मृगगम्यया।
आयामपरिणाहाभ्यामर्धयोजनसम्मितम्।।30।।

परिक्षिप्तं परिवेष्टितम्। दुर्गया मनुष्यागम्यया। मृगगम्ययेति [2]आगतमृगवधार्थम्। आयामो दैर्ध्यम्। परिणाहो विस्तारः।।30।।

The park should be surrounded on all sides by ditches and walls incapable of being crossed or leapt over by the game. In length and breadth it should extend to half a Yojana or about eight miles.

गिरेरुपान्ते नद्या वा पर्याप्तजलशाद्वलम्।
अकण्टकलतागुल्मं विषपादपवर्जितम्।।31।।

गिरेर्नद्या वेति [3]उभयोर्मृगाश्रयत्वात्।।31।।

It should be situated near the foot of a mountain or the bed of a river, and should abound in water and soft green grass. It should not contain thorny plants and groves, and should be free from poisonous trees or plants.

पादपैः पुष्पफलदैः प्रज्ञातैश्चित्तहारिभिः।
स्निग्धनीलघनच्छायैर्विरलैरुपशोभितम्।।32।।

प्रज्ञातैः लोकप्रतीतैः। विरलैः यानवाहनानुपरोधकैः।।32।।

---

1. 'मृगाणामप्यगम्यया' क पाठः
2. 'न्तुकमृगलिप्सार्थम्' ङ पाठः
3. 'गयाश्र' क-ख-ग-घ पाठः

It should be decorated with beautiful and well-known trees loaded with flowers and fruits and spreading cool, pleasing thick shades.

पांसुपूरितानिश्छिद्रश्वभ्रप्रदरकन्दरम्।
दलितस्थाणुवल्मीकपाषाणसमभूतलम्।।33।।

पांसुभिः पूरितत्वान्निश्छिद्राः अश्वादिसञ्चरणार्थं श्वभ्रा यत्रेति विग्रहः। प्रदरो भूमेः स्फुटितम्। दलितस्थाण्वादित्वात् समभूतलम्।।33।।

The burrows, pits, and cavities should be filled up with dust and gravel, leaving no chasm or declivity in the soil; and it should be leveled by the removal of trunks of trees, earthen mounds, and rocks, etc.

शोधितग्राहसलिलमगभीरजलाशयम्।
नानापुष्पसमाकीर्णं नानाविहगसेवितम्।।34।।

ग्राहो नक्रादिः। [1]तदपनयनात् परिभोग्यं जलं भवति। अगम्भीरतवाच्च तदवगाहनयोग्यो जलाधारः।।34।।

The lakes and other expanses of water inside the park should be-freed from sharks, crocodiles, etc., and they should be deep, and adorned with diverse aquatic flowers and birds.

सुपात्यमृगसम्पूर्णं हस्तिनीकलभान्वितम्।
भग्नदंष्ट्रनखव्यालं छिन्नशृङ्गविषाणि च।।35।।

सुपात्यः सुखव्यापाद्यः। कलभः पोतः। व्यालाः व्याघ्राः। विषाणिनो गण्डकादयः। ते तु भग्ननखदंष्ट्रत्वात् कलितमृगत्वाच्च नाभिभवन्ति।।35।।

The park should thrive in such game, as she-elephants and elephant cubs, tigers with their teeth broken and claws pared off, and horned beasts with their horns cut off.

सुखसंसेव्यलतया [2]पुष्पपर्णावनद्धया।
वनराज्या परिक्षितं परिखातटजातया।।36।।

---

[1] 'यात्' क-ख-ग-घ पाठः

[2] 'नानावल्लिपिन' क पाठः

सुखसंसेव्यलतयेति। अकण्टकिनी निर्विषा च लता सुखसंसेव्या भवति। वनराज्या परिक्षिप्तं मोहार्थं विश्रमार्थं च॥36॥

It should be beautified with creepers crested with flowers and blooms within easy reach, and should be adorned with nice little plants growing on the sides of the ditches.

बहिर्दूरान्तराभोगनिर्वृक्षस्तम्भभूतलम्।
अगम्यं रिपुसैन्यानां मनः प्रीतिविवर्धनम्।।37।।

बहिः परिखाया इत्यर्थात्। दूरे क्रोशमात्रान्तरे यो वनाभोगो (सन? वन) वैस्तार्यं समन्तात्, तत्र समन्ताद् निर्वृक्षं निस्तम्भं च भूतलं यस्य। एवञ्च निराश्रयत्वात् तदगम्यं रिपुसैन्यानाम्॥37॥

Outside the park, the fields stretching to a great distance, should be leveled and cleared of trees. The park itself should be inaccessible to the forces of the enemy, and thus give a feeling of safety and security to the mind.

[1]तद्वनेचरचित्तज्ञैः क्लेशायाससहैर्दृढैः।
रक्षितं रक्षिभिः स्वाप्तैर्भूभुजामभिवृद्धये।।38।।

तद्वनेचरचित्तज्ञैरिति। तस्मिन् वने मृगाणां दुष्टादुष्टपरिज्ञानार्थं ये शबरपुलिन्दादयो निवासिकाः, तदनुकूलै[2] रक्षिभिरिति सम्बन्धः। दृढैः स्थिरैः। स्वाप्तैः परस्याभेद्यैः॥38॥

Such a park when guarded by hardy and resolute guards, faithful in commitment and capable of evaluating the hearts of spies, becomes the source of immense pleasure to the king.

तत्कर्माप्तो नरेन्द्रस्य जनो जितपरिश्रमः।
क्रीडनायात्र विविधा मृगजातीः प्रवेशयेत्।।39।।

तत्कर्माप्तः मृगप्रवेशनकर्मकुशलः। जनो नरेन्द्रस्य नरेन्द्रानुरक्त इत्यर्थः, दुष्टमृगप्रवेशनिषेधार्थम्॥39॥

---

1. 'पर' क पाठः
2. 'ब' ङ पाठः

Strong men well-versed in the art of hunting should introduce various kinds of game in the park, for the sport of the king.

[1]अन्यकार्याविरोधेन प्रातश्चङ्क्रमणक्षमः।
क्रीडनाय विशेद् राजा तदाप्तैः सहितो मितैः।।40।।

अन्यकार्याविरोधेन, अन्यकार्यविरोधित्वाद् व्यसनमेव स्यात्। प्रातः प्रविशेदिति सम्बन्धः। चङ्क्रमणक्षमः शरीरपाटवात्। तदाप्तैरिति। तद् मृगयारण्यम्। मितैः स्तोकैः।।40।।

A king, capable of bearing up against the fatigue of a morning walk, should enter into the park for sport accompanied by his faithful and favorite attendants and without impairment to any other function of his.

यदा च प्रविशेद् राजा क्रीडनार्थं तदा बहिः।
सन्नद्धं यत्नतस्तिष्ठेत् सैन्यं दूरान्तगोचरम्।।41।।

सन्नद्धं यत्नतस्तिष्ठेत् परावस्कन्दनपरिहारार्थम्। दूरान्तगोचरं दूरदेशवर्ति।।41।।

When the monarch enters the park for sport, then outside it, sentries, should be placed, ready and arranged for action and watching the boundaries, far and distant.

सद्भिर्यो मृगयायाने गुणः साधु प्रकीर्तितः।
[1]क्रीडाप्रीतिर्नरपतिस्तं[2] तत्र स्वयमाप्नुयात्।।42।।

यथोक्तानुष्ठानफलमाह– सद्भिरिति। गुणः जितश्रमत्वादिः।।42।।

The king pleased with the sport would then secure those good results that have been said by the wise to proceed from hunting.

---

1. 'णे क्षमम्' ख ग पाठः
2. 'धृ' ख-ग पाठः
3. 'स्तत्र सर्वमवाप्नु' क पाठः

विधिरेष समुद्दिष्टो मृगयाक्रीडने [1]वरम्।
न गच्छेदन्यथा राजा मृगयां मृगयुर्यथा।।43।।

न गच्छेदन्यथा, यथोक्तदोषसम्भवात्। मृगयुः व्याधः।।43।।

Regarding hunt, these are the rules that I point out. Transgressing these, a king should not go about hunting like a common professional hunter.

महतोऽपि क्षणान्नाशो धनस्य ह्रीविमुक्तता।
निस्सत्यता निष्ठुरता क्रोधो वाक्छस्त्रखण्डनम्।।44।।

द्यूतदोषानाह– महत इत्यादि। क्षणान्नाश एकेनैव पणेन। ह्रीविमुक्तता असभ्याचरणात्। निस्सत्यता असमपाते विषमपात इत्यभिधानात्। निष्ठुरता द्यूतापहृतस्य धनस्य कृते परस्परव्यापादनात्। क्रोध इति। द्यूतासक्तमना हि केनचित् [2]कृच्छ्रे पृष्टः कुप्यति। तथा परस्परकलहाद् वाचा खण्डनमाक्रोशनं शस्त्रखण्डनं च।।44।।

Speedy flowing out -loss of money in spite of all care to preserve it, untruthfulness, feelinglessness cruelty, anger, harshness in speech,

लोभो धर्मक्रियालोपः कर्मणामप्रवर्तनम्।
सत्समागमविच्छित्तिरसद्भिः सह वर्तनम्।।45।।

लोभः परद्रव्येषु द्यूतहृतेषु। कर्मणां सदा क्रियमाणानाम्। सत्समागमविच्छित्तिः, [3]तत्प्रसंयुक्तस्य हि विद्यावृद्धानामनुपयोगात्। असद्भिः द्यूतकारिभिः।। 45।।

Covetousness, neglect of righteous ceremonies, discontinuance of public works, separation from the company of the good and union with the wicked,

अर्थनाशक्रियावश्यं नित्यं वैरानुबन्धिता।
सत्यप्यर्थे निराशत्वमसत्यपि च साशता।।46।।

---

[1] 'परः' क पाठः

[2] 'च्छ्रेण प्रकृष्टं कु' क-ख-ङ पाठः

[3] 'त्संयुक्त' क-ख-ग पाठः

अर्थनाशक्रिया केनचिन्निक्षिप्तस्याप्यर्थस्याहृतमिति नाशकारणम्। वैरानुबन्धिता अहमनेन [1]संरुद्धो बद्ध इति। निराशत्वं निराशता पुनरपि[2] जेष्यतीति। साशता सप्रत्याशता जेष्यामीति।।46।।

Certain draining of the treasury, endless hostility, feeling of deprivation when still there is money enough to meet the requirements of the game), and a sense of affluence when indeed there is no money in the fund.

प्रतिक्षणं [3]क्रोधहर्षौ सन्तापश्च प्रतिक्षणम्।
प्रतिक्षणं च संक्लेशः साक्षिप्रश्नः प्रतिक्षणम्।।47।।

क्रोधो जीयमानस्य। हर्षो जयतः। सन्तापो हृतार्थस्य। संक्लेशः संरोधादिः। साक्षिप्रश्नो विवादे साक्षिपृच्छा।।47।।

Anger and joy at every moment, remorse at each step, distress at each moment, and questioning of the witness at every doubtful cast of the dice,

स्नानादिगात्रसंस्कारपरिभोगेष्वनादरः।
अव्यायामोऽङ्गदौर्बल्यं शास्त्रार्थप्रत्युपेक्षणम्।।48।।

स्नानादीति। आदिशब्दादभ्यङ्गमर्दनाद्युपसंग्रहः। अङ्गदौर्बल्यं भोजनवेलातिक्रमात्। यत् पूर्वमधीतं शास्त्रं, तस्यार्थानिरूपणम्।।48।।

Disregard of such deeds as bathing, cleansing of the body, and of sexual enjoyment, want of physical exercise, weakness of the limbs and the body, overlooking of the teachings of the Shastras.

[4]गूहनं मूत्रशकृतोः क्षुत्पिपासोपपीडनम्।
इत्यादींस्तन्त्रकुशला द्यूतदोषान् प्रचक्षते।।49।।

---

1. संकटस्थो ब क ख-ङ पाठः
2. 'रयं जे' ङ पाठः
3. 'क्षोभह' ख-ग पाठ
4. 'व' ख-ग पाठः

गूहनं मूत्रशकृतोः वेगप्राप्तयोरनिस्सारणाद् विधारणम्। इत्यादीनि (ति)। आदिशब्दात् स्तेयापवादाद्युपसङ्ग्रहः॥49॥

Retention of the discharge of urine, sufferings from hunger and thirst,—these are said to be the évils of gambling by persons versed in polity.

पाण्डवो धर्मराजस्तु लोकपाल इवापरः।
द्यूतेन ह्यसता दीव्यन् कलत्राद्यपहारितः॥50॥

धर्मराजो युधिष्ठिरः। द्यूतेनासता [1]कपटद्यूतेनेत्यर्थः। तथाहि तस्य प्राप्तराज्यस्य दुर्योधनो महीयसीं विभूतिं दृष्ट्वा तदतिसन्धानोपायं चिन्तयन् मातुलेन शकुनिनाक्षहृदयविदा द्यूतं [2]कारितस्तद्देशं च यदृच्छया युधिष्ठिरमागच्छन्तं देवनायाहूतवान्। सोऽपि 'आहूतेन क्षत्रियेण द्यूताद् रणाच्च न निवर्तितव्यमि'ति विधानं मत्वानेन सह देवितुमारेभे। तयोश्चेदमध्यवसितं[3] "यदि दुर्योधनेन जितं, तदा युधिष्ठिरेण राज्यं [4]त्यक्त्वा द्वादश वर्षाणि वने स्थातव्यं, त्रयोदशे वर्षे अज्ञातचर्यया। अथ चेत् परिज्ञातं स्यात्, पुनर्द्वादश वर्षाणि वने स्थातव्यम्" इति। ततोऽसौ शकुनिप्रयुक्तेन कपटद्यूतेन दुर्योधनेन जित इति॥50॥

Even Pandu's son Yudhisthira that very virtuous and learned monarch resembling a second Lokapala, lost his lawful wife in wicked gambling.

नलश्च राजा द्यूतेन हृते राज्ये महोदये।
धर्मदारान् वने त्यक्तवा परकर्मकरोऽभवत्॥51॥

नलश्च राजा द्यूतेन हृते राज्ये भ्रात्रा जयसेनेन धर्मदारान् दमयन्तीं वने त्यक्त्वा परकर्मकरोऽभवद् ऋतुपर्णस्य राज्ञो देशमुपगम्य तत्सूपकारकर्म कृतवान्॥51॥

The very powerful monarch Nala having lost his prosperous kingdom in gambling, abandoned his lawful queen in the woods, and afterwards did the humble work.

---

1. 'कूट' ङ पाठः
2. 'ग्राहित' ङ पाठः
3. 'मव' ग-घ पाठः
4. 'मु' ङ च पाठः

तुल्यो भुवीन्द्रतुल्यस्य यस्य नास्ति धनुर्धरः।
स रुक्मी रुक्मशैलाभो द्यूतदोषाद्गतः क्षयम्।।52।।

तुल्यो यस्य नास्ति धनुर्धरः, तस्य चतुर्मार्गेऽस्त्रग्रामे किंपुरुषेणाभिविनीयानुज्ञातत्वात्।।52।।

Prince Rukmin of golden complexion, a bowman whose match was not to be found on earth, who was equal to Indra and, met with his destruction through the evils of gambling.

राजा काशिकरूशानां दन्तवक्रोऽपि मन्दधीः।
तीव्राद् द्यूतकृताद् दोषाद् दन्तभङ्गमवाप्तवान्।।53।।

राजा काशिकरूशानामिति। काशयः करूशाश्च नाम जनपदौ। तत्र राजा दन्तवक्रो नामासुरः स्वदुहितरं प्रद्युम्नमसुताय दत्तवान्। सोऽपि यदुचक्रपरिवृतस्तत्रागत्य तां परिणीतवान्। पारियात्रिकेषु कुतश्चित् प्रसङ्गाद् यथाधीतेन शिल्पेन तत्रतत्र तैः सह देवितु[1]मारेभे, बलभद्रोऽपि दन्तवक्रगृह्येण रुक्मिणा क्रथकैशिकेन राज्ञा। ततो द्यूतकलहात् प्रकुपितेन बलभद्रेण स्तम्भमुत्पाट्य हतो रुक्मी क्षयमगमत्। दन्तवक्रोऽपि मित्रार्थेनोद्गच्छंस्तेनैव चिबुके समाहतो दन्तभङ्गमवाप।।53।।

The foolish Dantavakra, the ruler of Kasikapura, had his teeth broken, in consequence of excessive indulgence in gambling.

द्यूतादनर्थसंरम्भो द्यूतात् स्नेहक्षयो महान्।
पक्षाणां चापि महतां द्यूताद्भेदः प्रवर्तते।।54।।

अनर्थसंरम्भः अस्माभिर्जितं, वयमन्यायेन जिता इत्येवंरूपः। स्नेहक्षयो जयपराजयवशात्। पक्षाणां महतां सङ्घातारीणाम्।।54।।

From gambling conflicts continue; through gambling love and affection wither away; and as a consequence of or gambling, conflict is sowed even among the strongly united parties.

---

1. 'मारब्धवान्' क-ख-ङ-च पाठः

इति केवलदोषं हि राजा द्यूतं विवर्जयेत्।
समाह्वयं च मेधावी दर्पिणां विनिवारयेत्।।55।।

दर्पिणामिति बलदृप्तानां मल्लादीनाम्। समाह्वयं प्राणिद्यूतम्। सोऽपि भिन्नपक्षद्वैधेन कोपं जनयति।।55।।

For these reasons, an intelligent king should avoid gambling which is productive of evils only. Moreover an intelligent ruler also discrerage challengers inliting him.

कालातिपातः कार्याणां धर्मार्थपरिपीडनम्।
नित्याभ्यन्तरवर्तित्वात् साधुप्रकृतिकोपनम्।।56।।

स्त्रीव्यसनदोषनाह– कालातिपात इत्यादि। तत्र कालातिपातो यथाकालमकरणात्। धर्मपीडनं धर्मस्थीयव्यवहारादर्शनाद्, अर्थपीडनम् अर्थाधिकारादर्शनम्। अभ्यन्तरमन्तर्गृहं, तत्र कामान्नित्यावस्थितस्य दर्शनाभावादार्यप्रकृतीनां प्रकोपनम्।।56।।

Delay in the discharge of duties, loss of money, and the abandonment of virtuous deeds, provocation of the Prakritis caused by the king's continued absence in the harem.

रहस्यभेदस्तत्पक्षादकार्येषु प्रवर्तनम्।
ईर्ष्यामर्षस्तथा क्रोधो निरोधः साहसानि च।।57।।

तत्पक्षात् स्त्रीपक्षात्। स्त्रीषु हि विश्वासे तत्पक्षोऽपि रहस्यविद् भवति। अकार्येषु नृत्तगीतादिषु। ईर्ष्यामर्ष ईर्ष्याकोपो दुःखहेतुः। क्रोधः स्त्रीभिः सुखासीनस्य कृच्छ्रेण[1] केनचित् स्पष्टस्य। तथा कामासक्तेन हि [2]पथ्यकारिणोऽपि दारा अवरुध्यन्ते। साहसानि परदाराभिगमने प्राकारलङ्घनादीनि।।57।।

Divulgence of the secrets, inducement to commit culpable deeds, jealousy, intolerance, anger, hostility and rashness.

इत्यादि च स्त्रीव्यसने यच्च पूर्वं प्रकीर्तितम्।
तस्मात् स्त्रीव्यसनं राजा राज्यकामः परित्यजेत्।।58।।

---

[1] 'ण दृष्ट' ङ पाठः

[2] 'बधकारिणोऽपि दारा न निरुध्यन्ते' ग-घ पाठः

इत्यादि चेति। आदिशब्दाद् अशौचलाघवप्रत्यवायाद्युपसङ्ग्रहः यच्च पूर्वं प्रकीर्तितं द्यूतव्यसने। तथाहि कामुकोऽपि महान्तमर्थमसत्पात्रेषु विनियोजयन् क्षणान्नाशयति। तथा सत्यस्य च परित्यागः। निर्धनस्य धनिकव्यापादनान्नैष्ठुर्यम्। प्रतिकामुकैः कलहाद् वाक्छस्त्रखण्डनम्। धनहीनस्य लोभः। इत्यादि यथा–सम्भवं योजनीयम्।।58।।

These and those enumerated above, are said to be the evils arising out of excessive fondness for the company of women. Seeing this, a monarch desirous of the welfare of his kingdom, should shun the company of women.

स्त्रीमुखालोकनतया व्यग्राणामल्पचेतसाम्।
ईहितानीह गच्छन्ति यौवनेन सह क्षयम्।।59।।

अल्पचेतसाम् अल्पसत्त्वानाम् ईहितानि चेष्टितानि यौवनेन सह क्षीयन्ते उत्तरकालं चेष्टासम्भवात्।।59।।

The energy of the low-minded, who are ever passionate after a look at the face of women, diminishes away with their youth.

वमनं विह्वलत्वं च संज्ञानाशो विवस्त्रता।
बह्वब्द्धप्रलापित्वमकस्माद्[1] व्यसनं मुहुः।।60।।

पानदोषानाह– वमनमित्यादि। विह्वलत्वं परवशदेहता। संज्ञानाशो निश्चेष्टता। अबद्धम् असम्बद्धम्। अकस्माद् व्यसनं मुहुः उन्मत्तस्येव गाननृत्तादिकरणम्।।60।।

Purposeless wandering, loss of self-control, irrationality, insanity, incoherence in speech, sudden illness.

प्राणग्लानिः सुहृन्नाशः प्रज्ञाश्रुतमतिभ्रमः।
सद्भिर्वियोगोऽसद्भिश्च संयोगोऽनर्थ्यसङ्गमः।।61।।

प्राणग्लानिः सुरया जर्जरीकरणात्। सुहृन्नाशः अननुरागादाचार्यमित्रत्यागः।

---

[1] 'स्माद्धस' मूलकोशेषु पाठः

ऊहापोहासामर्थ्यात् प्रज्ञाविभ्रमः, [1]पूर्वाधीतशास्त्रानभ्यसात् श्रुतविभ्रमः। भयस्खलितेषु संविधानस्य मतिविभ्रमः। असद्भिः शौण्डिकादिभिः। अनर्थ्यः पानशौण्डादिजनः॥61॥

Loss of energy, loss of friends, falsification of the understanding, intelligence and learning, separation from the good and union with the wicked, coming across misfortunes.

[2]स्खलनं वेपथुस्तन्द्री नितान्तं स्त्रीनिषेवणम्।
इत्यादि पानव्यसनमत्यन्तं [3]सद्भिर्गर्हितम्॥62॥

स्खलनं समेऽपि पथि। तन्द्री अकालेऽपि निद्रा। नितान्तमत्यर्थम्। इत्यादीति। आदिशब्दादशौचकलहप्रमादाद्युपसङ्ग्रहः॥62॥

Faltering steps, tremor of the whole body, giddiness, excessive enjoyment of women,—these are the evils of the indulgence in drinking, which have been strongly condemned by the wise.

श्रुतशीलबलोपेताः [4]पानदोषेण भूयसा।
क्षयमक्षीणनामानो जग्मुरन्धकवृष्णयः॥63॥

भूयसेति युक्त्या [5]पानमव्यसनमिति दर्शयति। अक्षीणनामानः अतिप्रतीताः। अन्धकवृष्णयो यादवाः॥63॥

The Vrishnis and the Andhakas of illustrious fame endowed with power and learning and good behavior, met with their destruction in consequence of the evils of drink.

योगीश्वरस्तु भगवान् भार्गवो भृगुतुल्यधीः।
शुक्रः पानमदात् तीव्राद् बुभुजे शिष्यमौरसम्॥64॥

भार्गवो भृगोरपत्यम्। बुभुजे शिष्यमौरसं कचाख्यम्॥64॥

The illustrious Suka the son of Bhrigu, best of an ascetic

---

[1] 'धिकशा' क ङ पाठः
[2] 'न्द्रा' मूलकोशेषु पाठः
[3] 'य' ख-ग पाठः
[4] 'भूपा दो' क पाठः
[5] 'नं व्य' ङ पाठः

who was equal to his father in intelligence, ate up through excessive intoxication, his very favorite disciple kacha.

पानाक्षिप्तो हि पुरुषो यत्रयत्र प्रवर्तते।
यात्यसंव्यवहारित्वं तत्रतत्राप्रवर्तनात्।।65।।

अप्रवर्तनात् संव्यवहारस्येत्यर्थात्, पाने कस्यचिदपि संव्यवहाराभावात्।।65।।

A person intoxicated with drink, does anything and everything or indiscriminately; and in consequence of his indiscriminate conduct, is excommunicated from society.

कामं स्त्रियो निषेवेत पानं वा साधु मात्रया।
न द्यूतमृगये विद्वानत्यन्तव्यसने[1] हि ते।।66।।

काममित्यभ्युपगमे। अत्यन्तव्यसने इति। स्त्रीपानयोः शरीरस्थित्यर्थं मात्रया युक्तं सेवनं, तयोस्तु मात्रयापि न युक्तं फलाभावात्, तद्गुणानां चान्यथापि सिद्धेः।।66।।

Beautiful women and drink, may be enjoyed within the bounds of moderation; but a learned king should never indulge in hunting and gambling, for these are full of greater dangers.

तदपनयविधिज्ञैः श्रेयसां विघ्नकारि
व्यसनमिदमुदारं सप्तधेहोपदिष्टम्।
जनयति हि निषङ्गादेकधैवाशु[2] नाशं
किमु न भवति हन्ता यौगपद्योदयेन।।67।।

उक्तार्थमुपसंहरन्नाह– तदित्यादि। तच्छब्दस्तस्मादर्थे। यस्मादेते दोषास्तस्मात्। अपनयविधिज्ञैर्व्यसनमिदमुदारमुपदिष्टमिति सम्बन्धः। सप्तव्यसनवर्गस्यापनयहेतुत्वात् तद्विधिज्ञैरित्युक्तम्। उदारं महत्। एकधा एकप्रकारः। हन्तेति वर्गशब्दाध्याहारात् पुल्लिङ्गता।।67।।

These are the seven kinds of evils retarding the material prosperity of a kingdom that have been enumerated by those who are conversant with the science of omens and prognostics. The presence of one of these in a king is enough to cause his

---

[1] 'न्तं व्य' मूलकोशेषु पाठः

[2] 'मप्याशु' क पाठः

immediate ruin, not to speak of the simultaneous presence of all!

पटयति परिभोगग्राहितामिन्द्रियाणां
श्रुतमपि विनिहन्ति श्रेष्ठतां प्रष्ठतां च।
चलयति हि विभूतिं भूयसीमप्यनीचै
रपिविबुधमतीनां सप्तकोऽयं दुरन्तः।।68।।

पटयति पटुं करोति। परिभुज्यत इति परिभोगो विषयः। श्रेष्ठतां प्रशस्यताम्। प्रष्ठतां नेतृत्वम्। अनीचैर्द्रुतमित्यर्थः। दुरन्तो दुष्पाकः।।68।।

These seven kinds of vyasanas ending in evil, increase the longing of the senses for their respective objects of enjoyment, and destroy the superiority, wisdom, and excellence and the ever growing prosperity even of those who are endowed with intelligence equal to that of the Gods.

The enemies of a king always under the influence of the Vyasanas, defeat him, and themselves become unconquerable; but the wise king, who is free from the influence of the Vyasanas, subjugates his enemies, and himself becomes impregnable.

अरिगणा नियतं व्यसने स्थितान
परिभवन्ति भवन्ति च दुश्छिदः।
अपगतव्यसनास्तु बुधा रिपून्
परिभवन्ति भवन्ति च दुश्छिदः।।69।।

दुश्छिदो व्यसन[1]ग्रस्तानाम्। दुश्छिदो रिपूणाम्।।69।।

A king aggrieved with vyasanas-addictions is defeated by his enemies who themselves become invincible where as a wise ruler lacking of vyasanas-addictions, overthrows the enemies and he himself becomes unconquerable.

(इति सप्तव्यसनवर्गो नाम त्रयोविंशं प्रकरणम्)

इति शङ्करार्यकृतायां कामन्दकीयनीतिसारपञ्चिकायां जयमङ्गलायां
सप्तव्यसनवर्गो नाम पञ्चदशः सर्गः।

---

[1] 'नस्थानाम्' ङ-च पाठः

अथ षोडशः सर्गः (Canto – 16)

चर्तुविंशं प्रकरणम्

यात्राभियोक्तृप्रदर्शनप्रकरणम्

(Circumstances suitable for Expeditions)

नानाप्रकारैर्व्यसनैर्वियुक्तः शक्तित्रयेणाप्रतिमेन युक्तः।
परं दुरन्तव्यसनोपपन्नं यायान्नरेन्द्रो विजयाभिकाङ्क्षी।।1।।

एवं यथोक्तव्यसनविनिर्मुक्तः परं व्यसनिनं कथं यायाद् अभियुञ्जीत वेत्यस्मिन् सर्गे यानशेषभूतमभियास्यतां[1] यात्राभियोक्तृ[2]प्रदर्शनमुच्यते। श(क्या? क्त्या) [3]दीनामानुकूल्येन [4]यात्रायाः, स्वव्यापारितया अभियोक्तुः। तत्र त्रिचत्वारिंशता श्लोकैर्यात्रा प्रदश्यर्ते– नानेत्यादि। शक्तिग्रहणमुपलक्षणार्थं, शक्तिदेशकालादिना[5] युक्त इत्यर्थः। अप्रतिमेन परस्मादुत्कृष्टेन, यदा [6]परोऽपि शक्त्यादियुक्तः स्यात्।।1।।

Free from the influences of the Vyasanas, and fully influenced by the unrivaled imperial powers, a ruler of men desirous of victory, should set out against his wicked enemy suffering from the influence of the Vyasanas.

प्रायेण सन्तो व्यसने रिपूणां यातव्यमित्येवमुपादिशन्ति।
[7]तत्रैष पक्षो व्यसनं [8]ह्यनित्यं क्षमस्तु सन्नभ्युदितो हि यायात्।।2।।

मतान्तरमाह– प्रायेणेत्यादि। सन्तः आचार्याः। तत्रैष पक्षः कौटिल्यस्य।

---

1. ‘त्रैष’ क पाठः
2. ‘हि नि’ क पाठः
3. ‘भिप्रयास्यतो या या’ ङ च पाठः
4. ‘कृद’ ङ च पाठः
5. ‘नां साध्यानामा’ क-ख-ग-घ पाठः
6. ‘साध्यायाः स्वव्यापारो यात्राभि’ ग-घ-पाठः
7. ‘दियु’ च पाठः
8. ‘परोऽश’ क-ख पाठः

अनित्यं कादाचित्कम्। स्वयं क्षम एव यायाद् व्यसनिनमव्यसनिनं वा। कः पुनः क्षम इत्याह– अभ्युदित इति, शक्तिदेशकालाभ्युच्चितः, तस्यैव हि परं हन्तुं क्षमत्वात्।।2।।

In almost all cases, the wise advise military expeditions against the foes, when these are overwhelmed with calamities but when a king is confident of his own powers and is in highly prosperous state he may fall upon the foe, though this latter may not be afflicted by the Vyasanas.

यदा क्षमस्तु प्रसभं निहन्तुं पराक्रमादूर्जितमप्यमित्रम्।
तदा[1]पि यायाद[2]हितानि कर्तुं परस्य वा पीडनकर्शनानि।।3।।

तदेव स्फुटयन्नाह– यदेत्यादि। निहन्तुम् उच्छेत्तुम्। ऊर्जितम् अभ्युच्चितमपीति। स हि नानात्मनो (?) मित्राणिच शक्त्यादिभिः परिच्छेद्य यायादिति। [3]अगत्या कर्शनपीडनान्यपि विहितानि कर्तुं यदा क्षमः, तदापि यायात्। तथाचोक्तं "प्रायशश्चाचार्याः परव्यसने यातव्यमित्युपदिशन्ति। स्वशक्त्युपचये यातव्यम्, अनैकान्तिकत्वाद् व्यसनानाम् इति कौटिल्यः। यदा वा प्रयाता कर्शयितुमुच्छेत्तुं वा शक्नुयादमित्रं तदा यायादि" (कौटि० अर्थ० 9.1.136) ति।।3।।

When a monarch would be sure of his ability to forcibly slay even his enemy swelling with powers, then and then only should he start on a military expedition, inflicting injuries, such as damage and distress, on the latter.

सम्पन्नसस्यं विषयं परस्य यायात् प्रमृद्नन् विजयाय राजा।
सस्योपघातेन परस्य वृत्तेश्लेदः[4] स्वसैन्योपचयश्च साधु[5]।।4।।

प्रमृद्नन् विलुम्पन्, विषयमिति सम्बन्धः।।4।।

---

1. 'भिया' ख-ग पाठः
2. 'त् स्वहि' ख-ग पाठः
3. 'अत्यगात् कर्शनविधानाङ्गान्यपि कर्तुं' क-ख-ङ-पाठः
4. 'दश्च सैन्याप' क पाठः
5. 'धुः' क पाठः

A king should first set out to conquer that part of the enemy's territory which abound with the wealth of sentimentality and is thus a thing to be pursued. It is considered sound policy to deprive the enemy of his supply of food by the destruction of the sentimentality, and thus to add to the strength of a king's own army.

विशुद्धपृष्ठः पुरतो विचिन्वन् भयप्रदेशान् परकर्मवेदी।
स्ववीवधासारविशुद्धमार्गो विशेद् धरित्रीं द्विषतोऽप्रमत्तः।।5।।

विशुद्धपृष्ठः कृतपश्चात्प्रतिविधान[1] इत्यर्थः। भयप्रदेशान्[2] दुर्गान् शङ्क्यमानभयहेतून्। वरकर्म अवस्कन्दनादिकम्। स्वकीययोर्वीवधासारयोर्विशुद्धो मार्गो यस्य।।5।।

His rear safe and secure and avoiding precarious countries in front, a cool-headed king, acquainted of the movements of the enemy, should enter such territories of the enemy where there would be no difficulty on the direction for the supply of food and the support of the friends.

समे प्रदेशे विषमे च भूमेर्निम्ने स्थले वा स्वमुखेन यायात्।
अनातुरः [3]सन्नभयो हि विद्वान् सन्नद्धसैन्यो विहितान्नतोयः।।6।।

अवस्कन्दकालेऽप्यनाकुलः सन् विभयोऽपि भवति। [4]आत्मरक्षाधिकृतं सैन्यम्। विहितान्नतोयः स्वसैन्यस्य।।6।।

Inexorable and unafraid, an Intelligent king well-provided with food and drink and with detachments ready for action should march through all places—plains, uneven tracts and low lands,—being always directed by a reliable precursor.

ग्रीष्मे प्रभूताम्बुवनेन यायान्निर्वापणार्थं करिणां [5]पथा तु।
[6]ऋतेऽम्भसो ग्रीष्मकृतात् प्रतापाद् भवन्ति कुष्ठानि मतङ्गजानाम्।।7।।

---

1. 'नः। भ' ङ च पाठः
2. 'न् श' ङ च पाठः
3. 'न् विभवेषु वि' ख-ग पाठः
4. 'अलमनुक्षा' क पाठः, 'हलमनुक्षा' ख पाठः, 'गुल्मं सै' ग घ पाठः
5. 'यथाम्बु' क पाठः
6. 'विनाम्बुना ग्री' क पाठः

स्वमुखेनेत्यस्य[1] प्रदर्शनार्थमाह– ग्रीष्म इत्यादि। प्रभूताम्बुवनेन पथेति। प्रभूतमम्बु वनं च यस्मिन् पथि। निर्वापणं तापापनयनम्। ऋतेऽम्भस इति। हस्तिनोऽन्तस्तापात् तोयमनवगाहमानाः कुष्ठिनो भवन्ति, अपिबन्तश्चान्धाः॥7॥

In summer, a king should march through woods abounding in waters, in which the elephants of the army may perform their ablution; for, if they do not get water for washing their huge bodies, leprosy will affect them, owing to the severe heat of summer.

स्वस्थक्रियाणामपि कुञ्जराणामूष्मा शरीरेषु[2] हि जाज्वलीति।
आयासयोगेन च[3] सम्प्रवृद्धः प्रसह्य हन्ति द्विरदान् प्रतापः॥8॥

समे विषमे च स्थलभेदे। निम्ने स्थले। स्वमुखेनेति[4]। समादिषु येन प्रदेशेन स्वयैन्यमुखं सुगमः पन्थाः समुत्पद्यते, तेन यायादित्यर्थः। अनातुरः स्वस्थक्रियाणां [5]स्थानस्थितानाम्। आयासः पथि शारीरो व्यायामः॥8॥

An internal heat burns inside the bodies even of elephants employed to perform easy work; this heat when increased by the toils of heavy work, soon kills the elephants.

सर्वाणि [6]सत्त्वानि खलूष्णकाले विनाम्बुना यान्ति परामवस्थाम्।
[7]अत्यर्थमुष्णप्रतितप्तकायाः प्रयान्ति नद्यः करिणोऽपिबन्तः॥9॥

अपिबन्तो जलमित्यर्थात्। तस्मादेते परिरक्ष्याः, तत्प्रतिबद्धत्वाद्राज्यस्य, सेनाङ्गेषु प्रधानत्वाद्, अनेककार्यकरणाच्च॥9॥

When there is want of sufficient water in summer, all creatures are reduced to great distress and elephants when they are deprived of drinking water, soon become blind, in consequence of the heat that scorch their bodies.

---

[1] 'स्य पुनर्द' ङ च पाठः

[2] 'ष्वभिजा' क पाठः

[3] 'हि' क पाठः

[4] 'ति। स्व' क-ख पाठः, 'ति। स्व' क-ख- पाठः, 'ति। येन प्रदेशेषु स्वसैन्यमु' ग घ पाठः

[5] 'स्वस्थस्थि' क-ख पाठः

[6] 'भूतानि' क पाठः

[7] 'शुष्कत्वमुष्णप्रवित' क पाठः

सुगन्धिदानस्तुतिशीकरेषु दन्ताभिघातस्फुटितोपलेषु।
गजेषु नीलाभ्रसमप्रभेषु राज्यं निबद्धं पृथिवीपतीनाम्।।10।।

यदाह श्लोकत्रयेण– सुगन्धीत्यादि। स्फुटितमित्यन्तर्भावितण्यर्थं द्रष्टव्यम्।।10।।

The kingdoms of the rulers of earth, rest on elephants resembling in effulgence masses of blue clouds, from whose temples the fragrant ichor exudes and who are capable of rendering rocks apart with the blow of their tusks.

सुकल्पितः [1]संयति दृष्टमार्गः स्वधिष्ठितो [2]वीरतमेन पुंसा।
[3]तुरङ्गमाणामपि कल्पितानामेको गजः षष्टिशतानि हन्ति।।11।।

सुकल्पितः साङ्ग्रामिकेण विधानेन। [4]संयद् युद्धम्। पुंसा आधोरणेन।।11।।

One elephant, duly prepared, trained in the ways of war and ridden by the bravest of persons, is capable of slaying six thousand well-trained horses.

[5]जले स्थले च द्रुमसङ्कटे च समेऽसमे साधु चलेऽचले च।
प्राकारहर्म्याट्टविदारणे च जयो ध्रुवं नागवतां बलानाम्।।12।।

समेऽसमे चेति स्थलभेदाः।।12।।

Armies having elephants in them, are sure to achieve success on water, on land, in narrow valleys crowded with trees, on ordinary, even or uneven grounds, and in such acts as creating breaches in the ramparts and towers .

---

[1] 'युगद्' क पाठः
[2] 'धी' क पाठः
[3] 'णां परिकं' क पाठः
[4] 'युगं यु' क-ख-ग-घ पाठः
[5] 'साधारणे च द्रुमसङ्कटे च जले स्थले साधु सुसङ्कटे च' क पाठः

तस्माद् यतो भूरिजलस्तु पन्था यतोऽन्नपानोपचयोऽविशङ्कः।
ततो हि[1] यायाज्जनयन् प्रतापं शनैः शनैर्विश्रमयन् बलानि।।13।।

यतो भूरिजल इति। यत्र देशे ग्रीष्मे प्रभूतजलो मार्गः। पानं जलादन्यत्। अविशङ्कः सामन्ताटविकादिप्रतिभयाभावात्। तत इति तेन प्रदेशेन। प्रतापं जनयन् देशविलोपादिना विश्रमयन् बलानीति।।13।।

For these reasons, a king should march slowly and without causing fatigue to his troops, through such countries where there are routes on which there is plenty of food and drink, and where there is no danger or difficulty—there by Increasing his own efficiency.

अभ्युन्नतानामणुरप्युदारं पश्चात्प्रकोपं जनयेदरीणाम्।
तं[2] चाप्रमत्तः प्रसमीक्ष्य यायान्न नाशयेद् दृष्टमदृष्टहेतोः।।14।।

विशुद्धपृष्ठ इत्यस्य प्रदर्शनार्थमाह– अभ्युन्नतानमित्यादि। अभ्युच्छ्रितानां विजिगीषूणां पश्चात्कोपं जनयेत्। अणुरपि अरीणां मध्ये स्वल्पोऽपि शत्रुः। उदारं महान्तम्। तं चेति प्रकोपम्। अदृष्टहेतोः यानसाध्यस्यार्थस्य कृते।।14।।

Even the smallest of prosperous enemies causes great difficulty from behind. So, coolly reviewing his condition, a king should undertake military expeditions. He should not ruin what he possesses, for what is uncertain.

पश्चात्प्रकोपः पुरतः फलं च पश्चात्प्रकोपस्तु[3] तयोर्गरीयान्।
रन्ध्रं हि तद् विप्रकृता महत्त्वं नयन्ति तस्मात् प्रविधाय यायात्।।15।।

पश्चात्प्रकोपोऽल्पः। पुरतः फलं च महत्। रन्ध्रं हि तदिति। य[4]स्मात् कोपमल्पमपि विप्रकृताः शत्रवो महत्त्वं नयन्ति, तस्मात् प्रविधाय प्रतिकृत्य।।15।।

Difficulties at the back and success in the front, of these, the former is of greater moment and deserves early attention.

---

1. 'भि' क पाठः
2. 'स्वं च' क पाठः
3. 'श्च' क पाठः
4. 'त' ङ च पाठः

Those kings, who transgress this principal, increase the defects of their administration. For these reasons, weighing these things well, a king should set out on an expedition.

पुरश्च पश्चाच्च यदा समर्थस्तदाभियायान्महते फलाय।
पुरः प्रसर्पन्नविशुद्धपृष्ठःप्राप्नोति तीव्रं खलु पार्ष्णिभेदम्।।16।।

पुरश्च पश्चाच्चेति। यदा समर्थः पुरस्तादनल्पं[1] फलं साधयितुं पश्चाच्च कोपम्। पार्ष्णिभेदं पृष्ठविनाशम्।।16।।

When a monarch is strong both, in his front and his back i. e. when he is capable of subjugating his enemies both in front and rear then only should he launch upon an expedition bearing great fruits. Otherwise, marching forward with the enemy at his back unchecked, a king suffers gesture loss in the rear portion of his army.

यास्यन् पुरो रक्ष्यमनेकवर्गमनेकमुख्यं च बलं विदध्यात्।
अनेकमुख्यस्य हि नैकमत्यमनेकमुख्यं द्विषतामभेद्यम्।।17।।

यस्मान्मा भूत् पार्ष्णिभेद इति, तस्मात् पृष्ठारक्षं[2] बलं निदध्यादित्याह– यास्यन्नित्यादि। पुरो रक्ष्यं स्थानीयारक्षम्। शतको द्विशतको वा वर्गः, सोऽनेको यस्य। अनेकमुख्यम् अनेकवर्गस्वामि।।17।।

On setting out on an expedition, a king should place in the forefront, an army of many detachments, whose ranks teem with many brave heroes. If There is unity in an army of great heroes, and the united army is undefeatable by the enemy.

अवश्ययातव्ययोद्यतः सन् पश्चात्प्रकोपाहितयानशङ्कः।
सेनापतिं वाप्यथवा कुमारं बलैकदेशेन पुरो निदध्यात्।।18।।

यदा तु स्वयं जातशङ्कः, तदा द्वौ प्रेषयेद् इत्याह– पश्चात्प्रकोपाहितयानशङ्कः किं यायामह नेति। कुमारं युवराजम्। बलैकदेशेन तृतीयेन चतुर्थेन वांशेन। पुरो निदध्यात् पुरस्ताद्[3] यातुं नियोजयेत्। स्वयं तु पश्चात् तिष्ठेदित्यर्थोक्तम्।।18।।

---

1. 'ल्पकं फ' क-ख पाठः
2. 'ष्ठाक्षयं ब' क-ख पाठः
3. 'त् त्रातुं' ग-घ पाठः

When a enemy must be marched upon, an energetic king should not be afraid of the difficulties that may beat his rear; he should depute in the front his commander-in-chief or the prince with a portion of the army and himself remain to watch the enemy in the rear.

[1]आभ्यन्तराद् बाह्यकृताच्च कोपा [2]दाभ्यन्तरस्त्वेव तयोर्गरीयान्।
आदाय गच्छेदबहिःप्रचारान् बाह्यांश्च कृत्वा विहितार्थकल्यान्[3] ।।19।।

कोपश्च बाह्याभ्यन्तरभेदेन द्विविध इत्याह– [4]आभ्यन्तरादित्यादि। [5]आभ्यन्तरो[6] गरीयान् बहिर्भवात्। आदाय सामादिभिः प्रसाध्य। अबहिः प्रचारान् आभ्यन्तरान् कुपितान्। विहितार्थकल्यान् कृतप्रतिविधानत्वान्निर्दोषान्।।19।।

Of internal and external defects, the internal Is grave internal ones and providing necessary measures for the removal of the external ones, a king should set out on an expedition.

पुरोहितामात्यकुमारकुल्याः सेनाभिगोप्तार इमे प्रधानाः।
एषां हि सन्तोऽन्यतमप्रकोपमन्तः[7] प्रकोपं समुपादिशन्ति।।20।।

अमात्यो मन्त्री। कुल्यो विजिगीषू राज्यार्हः। सेनाभिगोप्ता सेनापतिः। एषां स्कन्धावारान्तर्वर्तित्वात् तत्प्रकोपमन्तः प्रकोषम्।।20।।

The priests, the ministers, the princes and the noblemen—these are the principal leaders of the army ; their disaffection of which no sign is outwardly perceivable, and which is caused by some change of policy, is said by the sages to be internal defect.

---

1. 'अ' क पाठः
2. 'द' क पाठः
3. 'ल्पान्' क पाठः
4-5. 'अ' क-ख-ग-घ पाठः
6. 'रो हि ग' ङ च पाठः
7. 'पादन्तः' ख-ग पाठः

[1]राष्ट्रान्तपालाटविकानतानां[2] बाह्यप्रकोपोऽन्यतमप्रकोपः।
उत्पाद्यमानं निपुणं[3] प्रचारैस्तं[4] [5]सत्रिभिः सम्यगुपाददीत।।21।।

राष्ट्रपालो राष्ट्रमुख्य:। अन्तपालो विषयान्तरक्षाधिकृत:। आटविका: वनेचरा: राजसधर्माणा: आनता दण्डोपनता:। एषां बहिर्वर्तित्वात् तत्प्रकोपो बाह्यप्रकोप:।[6] तमिति बाह्यमाभ्यन्तरं वा। सत्रिभि: सञ्चारविशेषै:। सम्यगुपाददीत प्रसाधयेत्।।21।।

The other kind of disaffection of which the fury is outwardly perceivable, is the disaffection of '.the frontier guards, foresters and border tribes. When this sort of disaffection is generated, a king should meet it, assisted by their ministers and counselors of skillful ways persuading them over to his side.

सामादिभिः संशमयेत् प्रकोपं परस्परावग्रहभेदनैश्च।
तथा च धीरः शमयेद्विकारं यथा भजेरन्न परान् प्रतप्ताः।।22।।

कथमित्याह– सामादिभिरित्यादि। बाह्यमाभ्यन्तरं च[7] कोपं सामादिभि: प्रशमयेत्। परस्परावग्रहभेदनैश्च बाह्येनैव बाह्यान् आभ्यन्तरेण[8] चाभ्यन्तरानन्योन्येनावग्राहयेत्। अन्योन्यस्माच्च भेदयेदित्यर्थ:। प्रतप्ता इति। नात्यर्थमुपताप्य कोपं शमयेत्। अन्यथा प्रतसा: [9]परान् गच्छेयु:।।22।।

Internal disaffection should be pacified by such measures of policy as conciliation, gift etc., and external disaffection by the causing of disunion and dissension among the disaffected party. A wise monarch should pacify disaffection in such a manner that the disaffected do not resort to the enemy's side,

---

1. 'ज्या' मूलकोशपाठ:
2. 'कान्त्यजानां' मूलकोशेषु पाठ:
3. 'णप्र' ख-ग पाठ:
4. 'तन्मन्त्रि' क पाठ:
5. 'मन्त्रिभि:' ग-घ पाठ:
6. 'तदितरद् बा' ङ
7. 'वा' ङ पाठ:
8. 'णाभ्य' क-ख-ग-घ पाठ:
9. 'परं' क-ख-ग-घ पाठ:

मनुष्ययुग्यापचयः क्षयो हि हिरण्यधान्यापचयो व्ययस्तु।[1]
तस्मादिमां नैव विदग्धबुद्धिः क्षयव्ययायासकरीमुपेयात्।।23।।

क्षयव्ययापेक्षया यात्रां दर्शयितुमाह– मनुष्येत्यादि। मनुष्यः क्षुद्रो मुख्यश्च। युग्यं वाहनम्। हिरण्यं सुवर्णादि। तस्मादिमां यात्रामित्यर्थात्, क्षयव्ययायासकरीं नोपेयात्।।23।।

The loss of men and ammunitions' is said to be destruction; and the loss of money and food is said to be drain. A wise and prudent king should never betake to a troublous policy prolific of devastation and drain.

अवश्यनिष्पत्तिमहाफलाढ्यामदीर्घसूत्रां परिणामकल्याम्।
कामं व्ययायासकरीमुपेयान्न त्वेव जातु क्षयदोषयुक्ताम्।।24।।

तत्र क्षयव्ययाभ्यां बहुगुणविशिष्टो लाभः स्वल्पश्चायासः, तामुपेयादेव, यदाह– अवश्येत्यादि। अवश्यम्भाविभिर्महद्भिश्च फलैः स्फीतां क्षयव्ययकरीमपि। अदीर्घसूत्रां यानमात्रसाध्यफलाम्। तत्र हि[2] स्वल्प आयासः। परिणामे कल्यां निराबाधामुपेयात्[3]। कामं व्ययायासकरीमिति। एका क्षयकरी यात्रा। द्वितीया[4] व्ययकरी। तृतीया चोभयकरी। तत्रोभयकरीं यथोक्तामुपेयादेव। शेषयोर्महाफलतादियोगेऽपि[5] व्ययकरीमुपेयाद्; नेतरां, व्ययात् क्षयस्य गरीयत्वात्।।24।।

He should follow such policies as are sure to be crowned with success and attended with much beneficial results, and whose termination would not be delayed and future effects would be conducive of much good. But he should never resort to such troublous policies which involve the evils of destruction and drain.

---

1. 'ध' क पाठः
2. 'त्वल्प' ङ च पाठः
3. 'वारामु' क-ख पाठः
4. 'या चो' क-ख-ग-घ पाठः
5. 'त्वा' ङ च पाठः

वस्तुष्वशक्येषु समुद्यमश्च शक्येषु चाकालसमुद्यमश्च।
[1]शक्येषु मोहादसमुद्यमश्च त्रिधैव कार्यव्यसनं वदन्ति।।25।।

पुरस्ताच्च लाभेप्सुना कार्यव्यसनादयो लाभविघ्नाः परिहर्तव्या इति [2]तद्दर्शनार्थमाह–वस्तुष्वित्यादि।।25।।

Attempt to accomplish what are incapable of being proficient, want of attempt for what are capable of being proficient, proceeding out of imprudence, and attempt in opportune moments for what are capable of being accomplished—these are said to be the three kinds of Vyasanas attending the performance of acts.

कामोऽक्षमा दक्षिणतानुकम्पा ह्रीः साध्वसं क्रौर्यमनार्यता च।
[3]दम्भोऽभिमानोऽथ च धार्मिकत्वं दैन्यं स्वयूथस्य विमाननं च।।26।।

कामो मृगयादिष्वासक्तिः। अक्षमा परगुणेषु। दक्षिणता सानुक्रोशता। अनुकम्पा दीनोऽयमिति। साध्वसम् [4]अतर्किताद् भयम्। क्रौर्यं दौरात्म्यम्। अनार्यता साधुत्वानपेक्षणम्। दम्भो विसंवादकत्वम्। [5]अभिमानः [6]अभ्युन्नतमनस्कता। धार्मिकत्वं परलोकापेक्षणम्। दैन्यम् अल्पसन्तुष्टता। स्वयूथस्य स्वपक्षस्य।।26।।

Lust, want of forgiveness and forbearance, too much tenderness of feeling, bashfulness, crookedness, and want of straight-forwardness, arrogance, self-conceit, excessive piousness, impoverishment of the army and its dishonoring,

द्रोहो भयं शश्वदुपेक्षणं च शीतोष्णवर्षास्वसहिष्णुता च।
एतानि[7] काले समुपाहितानि कुर्वन्त्यवश्यं खलु सिद्धिविघ्नम्।।27।।

---

1. 'क्येष्वकार्येषु स' ख, ग, पाठः
2. 'दर्श' क. घ. पाठः
3. 'ति' ख. ग. पाठः
4. 'न्तः शीता' ङ. च. पाठः
5. 'ति' क. ख.ग. पाठः
6. 'त्यु' क. ख. ग. घ. पाठः
7. 'न्यका' क. पाठः

द्रोहः प्रतिकूलाचरणम्। [1]भयं स्वतो भीरुता। उपेक्षणं हस्तगतावधीरणम्। एतानि काल इति। लाभकाले[2] विहितानि।।27।।

Malevolence, terror, carelessness, and imprecision, incapability of enduring the inclemency of the weather, hot, cold, and rainy,—these causes favored by the advantages of the season, are sure to hinder the achievement of success.

निजोऽथ मैत्रश्च समाश्रितश्च सम्बन्धजः कार्यसमुद्भवश्च।
भृत्यो गृहीतो विविधोपचारैः पक्षं बुधाः सप्तविधं वदन्ति।।28।।

यियासुश्च विजिगीषुः पक्षवान् गुणवानुत्पन्नपौरुषोऽनुकूलदैवश्च यायादिति दर्शयितुमाह– निज इत्यादि। निजो मौलः। मैत्रो मित्रसम्बन्धी[3]। समाश्रितः आत्मरक्षाद्यर्थम्। सम्बन्धजः कन्यादानादिना कृतः। कार्यसमुद्भवः सामवायिकः। भृत्यः भृतिप्रतिबद्धः। गृहीतो [4]विविधैरुपचारैर्भृतः।।28।।

The wise say that there are seven kinds of party viz—that which is the kings own, that which is of the allies, that which has sought the kings protection, that which has been created by some act or other, that which arises out of some relationship, that which was a party before, and that which has been dissuaded over by various services and display of politeness and courtesy.

[5]सदानुसृत्या गुणकीर्तनेन निन्दासहत्वेन च[6] रन्ध्रगुप्त्या।
[7]तदर्थशौचोद्यमसङ्कथाभिः पक्षोऽनुरागीति स[8] वेदितव्यः।।29।।

एषु सप्तसु योऽनुरागी सद्वृत्तश्च, ताभ्यां सह यायादित्यनयोः स्वरूपमाह–

---

1. 'यं भी' ग. घ. पाठः
2. 'लोऽभिहि' ङ. च. पाठः
3. 'द्ध' ङ च पाठः
4. 'धाप' क-घ पाठः
5. 'वृत्त्या' क पाठः
6. 'चरित्रगु' क ग पाठः
7. 'योंद्गम' क ग पाठः
8. 'नि' क-ग पाठः

सदेत्यादि। अनुसृत्या अनुगमनेन।[1] विजिगीषुकृता[2] स्वनिन्दा, तस्या:[3] सहिष्णुत्वेन। रन्ध्रगुप्त्या विजिगीषुदोषप्रच्छादनेन। तदर्थशौचोद्यमसङ्कथाभिरिति विजिगीष्वर्थेषु शौचमुद्यम: सङ्कथा च॥29॥

A loyal party is to be recognized by his ready obedience, his singing in praise of the king's merits, his not putting up with the insults and blame offered to the king, his efforts to fill up the weaknesses of the king, and by his conversations regarding the richness, energy and courage of the monarch.

कुलीनमार्यं श्रुतवद्विनीतमलोलुपं सत्यमहार्यमन्यै:।
कृतज्ञतोर्जामतिसत्त्वयुक्तं सद्वृत्तपक्षं खलु [4]तं च विद्यात्॥30॥

अलोलुपम् अलुब्धम्। अहार्यम् अप्रतार्यम्। ऊर्जा बलम्। मति: प्रतिभा।[5] सद्वृत्तपक्षमिति। सद्वृत्तं पक्षं विद्यादिति सम्बन्ध:॥30॥

One of high lineage, straight-forward, learned in the Shastras, polite, high in rank and position, firm in his allegiance, grateful, and endowed with power, intelligence, and wisdom,—such a one should be recognized as a faithful and well-behaved party.

उद्योगमेधाधृतिसत्त्वसत्यत्यागानुरागस्थितिगौरवाणि।
जितेन्द्रियत्वं प्रसहिष्णुता ह्री: प्रागल्भ्यमित्यात्मगुणप्रवेक:॥31॥

उद्योग: उद्यम:। मेधा[6] बुद्ध्युपलक्षणार्था[7]। धृति: अनुद्विग्नता। अनुराग: विजिगीषो: प्रकृतीनां च। स्थितिर्व्यवस्था। गौरवं विद्यावृद्धेषु। प्रसहिष्णुता च शीतादीनाम्। आत्मगुणप्रवेक इति। आत्मगुणानामयं प्रधानो गुण:। तेनान्यगुणाभावेऽप्यभियास्यता तत्रादर: कार्य:॥31॥

---

[1] 'न। यदा वि' क-ख-ङ-च पाठ:
[2] 'ता नि' ग-घ पाठ:
[3] 'तदास्या:' क-ख-ङ-च पाठ:
[4] 'मित्रमिच्छेत्।' क-ग पाठ:
[5] 'भा। सद्वृत्तं प' ङ-च पाठ:
[6] 'धावान् निरुक्तलक्षणत्वात्' ङ च पाठ:
[7] 'णत्वात्' क-ख पाठ:

Energy, an accurate remembrance, contentment, courage, truthfulness, liberality, kindliness, firmness, disunity, self-control, endurance, timidity, and expressiveness or boldness in speech—these are said to be the qualities of the king's self.

मन्त्रस्य शक्तिं सुनयप्रचारं [1]स्वकोशदण्डौ प्रभुशक्तिमाहुः।
उत्साहशक्तिं [2]बलवद्विचेष्टां त्रिशक्तियुक्तो भवतीह जेता।।32।।

सुनयप्रचारः सन्ध्यादीनां सामादीनां च [3]यथावदवस्थापनम्। तच्च ज्ञानबलाद् भवतीति कार्यद्वारेण मन्त्रशक्तिरत्रोक्ता। कौटिलीये तु स्फुटमेवोक्तं "ज्ञानबलं मन्त्रशक्तिरि" (कौटि० अर्थ० 6.2.17)ति। स्वकोशदण्डाविति। स्वसम्पदुपेतौ कोशदण्डौ प्रभुशक्तिः, तयोरेव [4]प्रभुशक्तिनिष्पादने सामर्थ्यात्। तथाचाह [5]'कोशदण्डबलं[6] प्रभुशक्तिरि'ति। बलवद्विचष्टां बलवतीं विक्रमचेष्टाम्। तथाचाह 'विक्रमबलमुत्साहशक्तिः' इति। त्रिशक्तियुक्तां जेता। अन्यथा ज्ञानविकलोऽप्रभावो निरुत्साहः कथं शत्रुं जयेत्।।32।।

Its management according to the commendable rules of polity is said to be the power of counsel. The solvency and the efficiency of the treasury and the army respectively, are said to be the command of the king, and strong and powerful exertion is said to be the power of energy; the possessor of these three types of commands becomes the victor.

शैघ्र्यं सुदाक्ष्यं व्यसनेष्वदैन्य मुत्साहसम्पत्स्वतिधीरता च।
औत्पादिकी शास्त्रसमुद्भवा च सांसर्गिकी धीः परिणामिनी च।।33।।

उत्साहज्ञानयोर्भेदानाह– शैघ्रयमित्यादि। व्यसनेष्वदैनं परकृतेष्वभियोगादिषु

---

1. 'सु' मूलकोशेषु पाठः
2. 'बलबुद्धिचेष्टत्रि' क पाठः
3. 'यथमव' ङ च पाठः
4. 'भुत्वनि' ग-घ-ङ च पाठः
5. 'ण्डस्य ब' ङ च पाठः
6. 'फ' ग घ पाठः

व्यसनेषु सामर्षता। अतिधीरता अतिशौर्यम्। पुनरुत्साहगुणाख्यानमभियाने उत्साहः प्रधानमिति दर्शनार्थम्। [1]औत्पादिकी [2]उत्पत्तिप्रतिबद्धा। सा चाष्टाङ्गा [3]तत्त्वतो भवति। शास्त्रसमुद्भवा सम्यग्विज्ञातशास्त्रतत्त्वस्य तदनुस्यूता। सांसर्गिकी आहार्यबुद्धिः, [4]ज्ञानवृद्धसंसर्गादागता। परिणामिनी या तदात्वे नोत्पद्यते, किन्तु पश्चाद बुद्धेः स्वयं विमृशतो[5] भवति। एताश्चतस्रो बुद्धयः सदा मन्त्रशक्तौ व्याप्रियन्ते।।33।।

Expeditiousness, skillfulness, courage in seasons of adversity and coolness in prosperity, an reliable, matured and social wisdom resulting from close study of the Shastras,

[6]उत्साहसत्त्वाध्यवसायचेष्टादार्ढ्यं च कर्मस्विह[7] पौरुषं च।
अरोगता कर्मफलोपपत्तिर्दैवानुकूल्यं च निराधिता च।।34।।

उत्साहः शौर्यादिगुणयुक्तः। सत्त्वं व्यसनेऽभ्युदये[8] च यदविकारकम्। अध्यवसायः इदं साधयामीति महार्थेषु चेतोकृत्तिः। स च सत्त्वपरिणामः। सत्त्वहीनस्य च तथाविधार्थसाधनाध्यवसायाभावात्। चेष्टा कायिको व्यापारः। दार्ढ्यं स्थैर्यम्। एतत् पञ्चविधं चितकायपरिस्पन्दरूपं पौरुषं पुरुषकर्म। अरोगता निर्व्याधिकता[9]। कर्मफलोपपत्तिः यद्यत् कर्मारभते तस्यतस्याप्रतिहता फलनिष्पत्तिः। आधिः प्रियवियोगादिजं दुःखम्। एतक्रितयात्मकं दैवानुकूल्यमिति।।34।।

Energy, confidence, persistence, exertions, resoluteness and manliness in the performance of acts, healthiness, the ability for the achievement of the ends of action, a favorable fortune and cheerfulness—these are qualities worthy of a king.

---

1. 'त्पत्तिकी' ङ पाठः, 'त्पातिकी' ग घ पाठः
2. 'त्पातप्रतिलाम्भकी' ग-घ पाठः
3. 'तद्वतो बुद्धिमतो भ' क-ख पाठः, 'शाश्वतो भ' ग घ पाठः
4. 'योगादा' ङ पाठः
5. 'मर्शो' ङ-च पाठः
6. 'त्त्वव्यव' क पाठः
7. 'स्वतिपौ' क ग पाठः
8. 'नेचाभ्यु' ङ पाठः
9. 'धिता' क-ख पाठः

पक्षादिनानेन गृहीतकोशः पक्षादिहीनं रिपुमभ्युपेयात्।
इति प्रसर्पन् नियतं समुद्रप्रक्षालितां तां लभते धरित्रीम्।।35।।

पक्षादिनेति। अनुरागी सद्वृत्तश्च पक्षः, गुणप्रवेकः, शक्तित्रयं, पौरुषं, दैवानुलोम्यं च। उतैर्युक्तो यायात्। गृहीतकोश इति। वक्ष्यमाणदानकल्पनार्थं कोशग्रहणम्।।35।।

Laying hold of the enemies' treasury by sowing dissension among his followers, a king should march upon the enemy disunited from his supporters. Always acting in this way, i, e., undertaking such expeditions only, a king obtains the dominion of the earth washed by the waves of the ocean, i.e. over the whole length and breadth of the earth bounded by the ocean.

कालो गजानां सजलाभ्रजालो यातुं तदन्यश्च तुरङ्गमाणाम्।
नात्यर्थवर्षोष्णतुषारयुक्तः सम्पन्नसस्यस्त्विति कालसम्पत्।।36।

कालदेशाद्यपेक्षया यात्रां दर्शयितुमाह– काल इत्यादि। तदन्यः वर्षाकालादन्यो हेमन्तो ग्रीष्मश्च। यदा तु शीतोष्णवर्षाणां साम्यं, तदा कालसम्पदित्याह– नात्यर्थेत्यादि।।36।।

The best season for the marching out of the elephants is when the sky is overspread with masses of rain clouds; seasons other than this, is suitable for the march of the horses; and the proper season for military expedition, is that which is neither too hot nor too cold, nor rainy nor dry, and when the earth is covered with emotional situations.

रात्रावुलूको [1]विनिहन्ति काकान् काकोऽप्युलूकान् रजनीव्यपाये।
इति स्म कालं समुदीक्ष्य यायात् काले फलन्तीह समीहितानि।।37।।

कालदेशवशाद् बलाबलं दृश्यत एवेत्याह– रात्रावित्यादि।।37।।

At night, the owl kills, the crow; and the crow kill the owl when night passes away. Therefore a king should set out on an expedition marking well the advantages or disadvantages of the seasons. It is in proper season that these attempts are crowned with success.

---

[1] 'पि' ख-ग पाठः

श्वा नक्रमाकर्षति कूलसंस्थं श्वानं च नक्रः सलिलाभ्युपेतम्।
व्यायच्छमानो ध्रुवमभ्युपैति देशस्थितः कर्मफलोपभोगम्।।38।।

व्यायच्छमानश्चेष्टमान:। देशस्थित: स्वसैन्यव्यायामयोग्यदेशस्थित:।।38।।

A dog can overpower a crocodile when it is on land, and the crocodile can overpower the dog when it is in water. Therefore one a king exerting with the advantages of the place in his favor, enjoys the fruition of his acts.

समं तुरङ्गैर्विषमं च नागैस्तथा जलाढ्यं समहीधरं च।
नावा (धि?दि) तः पत्तिबलानुयातैर्यथाबलं[1] च प्रसमीक्ष्य मिश्रम्।।39।।

तदेव दर्शयन्नाह– सममित्यादि, देशं गच्छेदिति वक्ष्यमाणेन सम्बन्ध:। विषमं निम्नोन्नतम्। नावा (वृतमि? दित इ)ति। अद्भिर्वृतं नौकटकेनैव यायात्। पत्तिबलानुयातै: तुरङ्गनागनौकटकै:। यथाबलं च प्रसमीक्ष्येति। समविषममिश्रं देशं तुरङ्गैर्नागैश्च गच्छेद्, जलावृतं नागैर्नौकटकेन वा।।39।।

On horses on even tracts, and on elephants on watery - marshy lands and countries abounding in trees and covered with rocks, and united with the army of his adherents and reviewing his own strength, king should proceed for the conquest of countries.

मरुप्रगाढं [2]पततीह तोये ग्रीष्मे [3]त्वनूपोदककक्षदुर्गम्।
मिश्रं च संवीक्ष्य यथासुखं च[4] गच्छेन्नरेन्द्रो विजयाय देशम्।।40।।

मरुप्रगाढमिति। पतति तोये, वर्षासु गच्छेदित्यर्थ:। अनूपोदककक्षदुर्गमिति। अनूपदेशमुदकयुक्तं ग्रीष्मे गच्छेत्। मिश्रं च संवीक्ष्य यथासुखमिति। साधारणदेशं साधारणे काले गच्छेत्।।40।।

---

1. 'तो य' क पाठ:
2. 'प्रतताभ्रकाले ग्री' ग पाठ:
3. 'प्रभूतोदकवर्त्मदु' क-ग पाठ:
4. 'हि' क-ग पाठ:

On desert tracts when the rain falls, in summer through countries abounding in water, and mixed up with allied troops, a king should march, for the conquest of countries.

न चातितोयं न च तोयहीनं युक्तं च सम्यग्यवसेन्धनेन।
उपेत्य मार्गं बहुतज्ज्ञयुक्तं [5]सुखं प्रयाणै रिपुमभ्युपेयात्।।41।।

न चातितोयं न च तोयहीनमिति। कालसामान्येन सर्वसैन्यस्यायं मार्गोपदेशः। प्राक् तु ग्रीष्मात् (?) प्रेक्षाकारिणामेव मार्ग उक्तः 'ग्रीष्मे प्रभूताम्बुवनेन यायादि' (श्लो० 7)ति। बहुतज्ज्ञयुक्तं बहुभिर्मार्गज्ञैराक्रान्तम्। प्रायेण सुखहेतुत्वात् सुखं स्थाणुकण्टकश्वभ्राद्यभावात्।।41।।

Following a route on which there is not too much water or which is not totally destitute of water, which prospers in grains and fire-woods, and where plenty of carpenters are to be found, a king should proceed towards the enemy by easy marches.

स्ववीवधासारमुपेततोयं विश्वासिताक्रान्तजनं विशुद्धम्।
तन्मात्रमेव[1] द्विषतामुपेयाद् यस्मान्न कुर्यादपयानमार्तः।।42।।

शत्रुदेशं च गच्छन् कियद्दूरं यायादित्याह– स्ववीवधासारमिति। यस्मिन् मार्गे स्वकीयौ वीवधासारौ प्रवर्तेते। पर्याप्तजलम्। विश्वासिता आक्रान्ताश्च जनाः यस्मिन् तन्मात्रमेव शत्रुदेशं विशुद्धत्वाद् यायाद्, अन्यथा विच्छिन्नवीवधासारत्वात् तोयवैकल्यादविश्वासितैरनाक्रान्तैश्च जनैः समन्ततो व्याकुलीक्रियमाणत्वादार्तः प्रतिनिवर्तेत, पराभिघातश्च स्यात्।।42।।

That portion only of the enemy's country should be marched into, where there would be no difficulty for the supply of food and for the support of the allies ; which would abound in water, and whose watery expanses would be free from sharks etc., and crossed over by faithful followers and the sick and wounded would not shrink back.

---

1. 'खप्रयाणो' ख-ग पाठः
2. 'र्गं' क पाठः

ये [1]दूरयात्रां सहसा विशन्ति मूढा रिपूणामविचार्य भूमिम्।
ते यान्ति तेषामचिरेण खङ्गधारापरिष्वङ्गमयत्नसाध्यम्[2]।।43।।

यदाह– ये [3]दूरयात्रामिति, विशुद्धाद् देशादभ्यधिकां भूमिम्। अविचार्य वीवधासारादिकम्। अयत्नसाध्यम् अभूमिष्ठत्वात्।।43।।

Those hopeless fools who without much planning, impulsively enter into the enemy's territory which is long way off, soon feel the touch of the edge of the enemy's sword.

मार्गे च दुर्गोपनिविष्टसैन्यो विधाय रक्षां विधिवद् विधिज्ञः।
सन्नद्धपार्श्वस्थितवीरयोधः सेवेत साध्वीं निशि योगनिद्राम्।।44।।

इदानीं स्वव्यापारेणाभियोक्ता प्रदर्श्यते षोडशभिः श्लोकैः। तत्र रात्रिगतं व्यापारमाह– मार्ग इत्यादि। दुर्गोपनिविष्टसैन्यः दुर्गमाश्रित्य समावासितस्कन्धावारः। विधाय रक्षां बहिरन्तश्च। स्कन्धावारस्य विधिज्ञः। सन्नद्धाः पार्श्वस्थिता वीरा योधा यस्य। एवञ्च कृतरक्षस्य निद्रा साध्वी भवति। योगनिद्रां सेवेत मायानिद्रया सुप्यात्, यथा तुरङ्गहेषादिस्वनमपि श्रुत्वा प्रतिबुध्येत्।।44।।

Posting sentries on the route and in the camp, arranging duly for his safety and with brave warriors living by his side ready for action, a king should enjoy a pleasant sleep uninterrupted by dreams.

भ्रमत्तुरङ्गद्विरदेन्द्रहेषाघण्टास्वनापूरितकर्णरन्ध्रः[4]।
तदन्तरा तु[5] प्रतिबोधवर्ती के[6] जाग्रतीत्याहित[7] आद्रियेत।।45।।

यदाह– भ्रमदित्यादि। जागरूकाधिष्ठितानां स्कन्धावाराद् बहिर्भ्रमतां तुरङ्गमाणां यो हेषास्वनः द्विरदेन्द्राणां च घण्टास्वनः ताभ्यां व्याप्तं कर्णरन्ध्रं

---

1. 'मा' क पाठः, 'मात्रं' ग पाठः
2. 'ध्याः' क पाठः
3. 'मात्रमि' क-ख पाठः
4. 'सादित' क-ग पाठः
5. 'ल' ख पाठः
6. 'राजा गृहीत्वा व्रतमाद्रि' क पाठः
7. 'तमाद्रि' मूलकोशेषु पाठः

यस्य। तदन्तरा निद्राच्छेदे। के जाग्रत्यस्मिन् प्रहर इत्याद्येतन्निरूपयेत्। आहितः सावधानः।।45।।

When from the enemy's camp the neigh of moving horses and the roar of a elephants proceed, and when the sound of bells reaches his ears, the king should then even in his sleep, call out saying—'what brave hero, keep watch there.'

ततः प्रबुद्धः शुचिरिष्टदेवः श्रीमद्विभूषोज्ज्वलितः प्रहृष्टः।
सेव्येत मन्त्रिप्रवरैर्यथावत् पुरोहितामात्यसुहृद्गणैश्च।।46।।

तत इत्यादि दिवागतं[1] व्यापारं दर्शयति। शुचिः स्नानादिना। इष्टदेवः पूजितदेवः। प्रहृष्टः सैन्योत्साहनार्थम्। सेव्येत आस्थानोपतः। मिन्त्रप्रवरैः उत्तममन्त्रिभिः।। 46।।

Then awaking, king should purify himself and offer adoration to the gods; cheerful and dressed in beautiful garments, he should then be duly paid homage to by the prime-ministers, priests, associates and friends.

कर्तव्यतां तैः सह सम्प्रधार्य यानं समारुह्य[2] विचित्रयानः।
कुलोद्गतैः [3]शस्त्रिभिरात्मकल्पैर्बहिर्निरीयात् परिवारितः सन्।।47।।

कर्तव्यतां तदात्वे आयत्यां च। यानं हस्तिनं, तस्य विचित्रगमनात्। बहिर्निरीयात् [4]स्वसमदावासान्निर्गच्छेयत्।।47।।

Then deciding with their help as to what should be done, that possessor of beautiful conveyances, should march out riding on a first-class vehicle, and surrounded by foot soldiers of noble extraction who are equal to himself in prowess.

पश्येन्नृपो हस्तिरथाश्वचर्यां सामूहिकं योधगणं पृथक् च।
विवक्षितांश्च द्विरदान् द्विरहस्तुरङ्गमांश्चापि[5] विधानयुक्तान्।।48।।

---

1. 'परं व्या' क-ख पाठः
2. 'स्थाय वि' क पाठः
3. 'तुल्यैर्ब' क पाठः
4. 'तस्माद्राजा नि' ग घ पाठः
5. 'श्चैव वि' क पाठः

पश्येद् निर्गतः। हंस्तिरथाश्वचर्यामिति हस्तिरथाश्वयानमार्गम्। सामूहिकं पृथक् चेति। समुदितं प्रत्येकं च योधगणं पश्येत्। विवक्षितान् शौर्यादिगुणयुक्तान्। द्विरह इति। पूर्वाह्णेऽपराह्णे च पश्येत्। विधानयुक्तान् सान्नाह्यान्।।48।।

The king should himself look after the treatment of the horses and elephants and the repairing of the chariots, and the comforts of the objectivities and the soldiers respectively. He should see that the favorite horses and the leader elephants are supplied with Bidhana.

सुखोपगम्यः स्मितपूर्वभाषी प्रियं वदेद् वृत्त्यधिकं च दद्यात्।
प्रियेण दानेन च सङ्गृहीतास्त्यजन्ति भर्तर्यपि जीवितानि।।49।।

प्रियेण वचनेन। भर्तरि निमित्तम्।।49।।

The king should be available to all and his speech should invariably be preceded by smiles. He should speak sweet and kind words, and pay the soldiers more than their wages. Won over by sweet words and liberal payment, the troops will gladly lay down their lives for their lord.

रथाश्वनौकुञ्जरयानयोग्यो नित्यक्रियः स्याद्धनुषि[1] प्रगल्भः।
सुमेधसां कर्मणि दुष्करेऽपि नित्यक्रिया कौशलमादधाति।।50।।

नित्यक्रिय इति। रथादियानयोग्योऽपि धनुषि कुशलोऽपि पुनस्तत्र नित्यव्यापारः स्यात्। किमर्थमित्या—सुमेधसामिति।।50।।

By constant practice, one becomes quite competent to ride upon chariots, horses, elephants and boats, and attains great mastery in bowman-ship; constant practice bestows on the intelligent ability for performing even most difficult deeds.

सन्नद्धमुच्चैर्द्विपमास्थितः सन् सन्नद्धसैन्यानुगतः प्रकुर्वन्।
सामन्तदूतेन हि साधुमन्त्रं प्रवीरयोधान्तरितेन यायात्।।51।।

उच्चैर्द्विपं विवक्षितम्। साधुमन्त्रं [2]परातिसन्धानगर्भमालापं प्रकुर्वन्। प्रवीरयोधान्तरितेन दुष्टव्यापारनिषेधार्थम्।।51।।

---

[1] 'ष:' क पाठ:

[2] 'भि' क ख पाठ:

Riding on a huge elephant duly equipped and with followers and soldiers accoutered in mail and with the ranks of the army swarming with brave heroes, a king should march forward, having at first held consultation with the ambassadors of the feudatory kings.

आलोकयेद् बुद्धिगुणोपपन्नैश्च[1]रैश्च दूतैश्च परप्रचारम्।
एतैर्वियुक्तो भवति क्षितीन्द्रो जनैरनेत्रैश्च समानधर्मा॥52॥

परप्रचारं यातव्यचेष्टितम्। एतैरिति चरैर्दूतैश्च नेत्रस्थानीयैः। अनेत्रैरन्धैः॥52॥

He should bring to light the fasteners of the enemy through the agency of his highly intelligent and liberal-minded spies. A ruler of earth abandoned by his spies becomes like a man deprived of his sight.

विलोभयन् किञ्चिदपि प्रयच्छन् कुर्वीत मित्रं द्विषतोऽन्तपालम्।
राष्ट्रादभीक्ष्णं द्विषतः प्रपण्यैः पण्यं हितं [2]नाडिकयाददीत॥53॥

विलोभयन् इदं ते करिष्यामीति किञ्चिदेव प्रयच्छन् तदात्वे[3] कुर्वीत मित्रं स्वीयवीवधासारप्रवर्तनार्थं प्रपण्यैः। हितं येनार्थी[4]। नाडिकया सञ्चारपरम्परया। आभिमुख्येनाप्यादीयमानं परो निरुन्ध्यात्॥53॥

The friend of the enemy should be own over by tempting offers or by the giving of some trivial thing; that portion of the enemy's party that may be bought off, should be bought off by the payment of a proper price.

उपक्रमं वाञ्छितमाशु कुर्याद् दूतोपयानात् क्रियमाणसन्धिः।
स चेद् विसन्धिः स तु तत्र [5]चैकः कृतो भवत्यात्मसमुच्छ्रयश्च।।54।।

क्रियमाणसन्धिरिति। दूतसम्प्रेषणेन विजिगीषुणा सन्धेयस्य यातव्यस्य

---

1. 'श्चा' ख ग पाठः
2. 'धिकमा' ख पाठः
3. 'दा कु' क ख पाठः
4. 'र्थं' ग-घ पाठः
5. 'भेदः कृ' मूलकोशेषु पाठः

तस्योरसि हस्तमार्द्रं दत्त्वा वाञ्छित[1]मुपक्रमं प्रकृतिभेदादिकं कुर्यात्। तत्र यथाभिमते सन्धौ[2] शोभनमेव। असिद्धे किं फलमित्याह– स चेदिति। यदि शत्रुरकृतसन्धिः[3], स तु तत्रैकः कृतो भवति स[4] एव शत्रुः प्रकृतिभ्यः पृथकृतो भवति। आत्मसमुच्छ्रयश्च विजिगीषोरात्मनस्तत्प्रकृतिभिरैक्यं भवति।।54।।

If the enemy is not unwilling to enter into a treaty, a king should establish peace with him by deputing his ambassadors, and finish w foe is unwilling to hat he has undertaken as desirable, as soon as possible. On the other hand-he should sow dissension among his followers and thereby help his own advancement.

दौर्गान् पथिष्वाटविकान्तपालान् संश्लेषयेद् दानवतापि[5] साम्ना।
विरुद्धदेशेषु हि सन्निरोधे ते ह्यस्य मार्गोपदिशो भवन्ति।।55।।

दौर्गान् दुर्गपालान्। विरुद्धदेशेषु हि सन्निरोधे विरुद्धकृते उपरोधे। मार्गोपदिश इति क्विप्प्रत्ययान्तः।।55।।

A king should wean over to his side by gifts, conciliation etc. the foresters, and frontier tribes and commanders of forts, whom he may come across on his route. In difficult and intricate tracts and when one is confined within them, they become the guides, and point the way out.

अकारणादेव हि कारणाद् वा य एति कश्चित् पुरुषोऽरिसेवी।।
निजश्च विश्लिष्ट उपेत्यशत्रुमायाति यस्तस्य गतिं प्रपश्येत्।।56।।

अकारणात् कारणाद्वेति। स्वदोषेण स्वामिदोषेण वा शत्रुसेवको विजिगीषुमेति, निजश्च विजिगीषुसेवकोऽकारणात् कारणाद्वा विश्लिष्टः शत्रुं यात्वा पुनरापतति, तयोरुभयोः[6] प्रचारं पश्येत्, किं कल्याणबुद्धिरन्यथाबुद्धिर्वेति।।56।।

---

1. 'तपरमप्र' ग घ पाठः
2. 'न्धौ शुद्धे शो' ग-घ पाठः
3. 'न्धिः तदा तु' ग-घ पाठः
4. 'स चैकश' क-ख पाठः
5. 'हिं' क पाठः
6. 'योः प्र' ग-घ पाठः

Or any person who for some reason or without it, has gone over to the enemy's side forsaking his former allegiance, his movements should be watched.

आरिप्सुना मन्त्रबलान्वितेन प्रागेव कार्यो निपुणं विचारः।
[1]दोष्णां बलान्मन्त्रबलं गरीयः शक्रोऽसुरान् मन्त्रबलाद् विजिग्ये।।57।।

अभियोगश्च मन्त्रपूर्वकः फलवानिति श्लोकत्रयेण दर्शयति – आरिप्सुनेत्यादि। अरिमभियोक्तुमिच्छता। निपुणं सम्यक्। दोष्णां बलाद् बाहुबलात्। अरिमभियुञ्जानेन मन्त्रेण योद्धव्यमिति (अ) भिप्रायः। शक्रोऽसुरान् बलजम्भवृत्रप्रभृतीन् बाहुशालिनः।।57।।

One possessed of the power of counsel and desiring his own advancement, should at first hold careful counsels. Power of counsel is of greater importance than that of the arms. Indra conquered the Asuras through the power of his better counsel.

मनीषया निर्मलया विलोकितं फलाय कर्मोद्यममास्थितः परम्।
[2]अकालहीनं नयवित् समाचरेत् फलं ह्यकाले नियतं व्युदस्यति।।58।।

मनीषया बुद्धा निरूपितं कर्म पराभियोगं फलाय समाचरेदिति सम्बन्धः। अकालहीनं परस्यच्छिद्रकालमासाद्येत्यर्थः। अकाले नियतं नियोक्तुः फलं शत्रुसिद्धमन्ते (दिव्युप्स्यति ? व्युदस्यति)।।58।।

A wise king conversant with the principles of polity should in the proper season undertake an act, be in guided by its keen and pure intelligence, and putting forward every effort for a successful termination. It is in proper season only that success can be -achieved.

प्रभावितानां श्रुतशौर्यशालिनां [3]यथावदालोचितमार्गचारिणाम्।
चिराय[4] दैवी द्युतिरुन्नतात्मनां भुजङ्गदीर्घेषु भुजेषु लम्बते।।59।।

प्रभावितानाम्।।59।।

The divine magnificence of the powerful and high-souled

---

1. 'ष्णोर्ब' मूलकोशेषु पाठः
2. 'न' ख-ग पाठः
3. 'बलालो' ग पाठः
4. 'देवी भृशमुन्न' ग पाठः

king, who is possessed of knowledge and heroism, and who walk on the properly lighted path, is said to hang on their own arms resembling serpents in length.

समुदितनरसम्पद् भूरिसम्पन्नसस्ये
विगतसलिलपङ्के काल उद्भूतवृत्तिः।
कुसुमितसहकारश्रीज्वलत्कानने
वा नरपतिररिभूमिं साधु गच्छेज्जयाय।।60।।

(समुदितेति समु)दिता नरसम्पद् य (स्य नर) पतेरिति सम्बन्धः। तिस्रो यात्राः दीर्घकाला ह्रस्वकाला मध्यकाला च। ताश्च यथाक्रममाह– भूरिसम्पन्नसस्ये काले मार्गशीर्षे। विगतसलिलपङ्के ज्येष्ठमूलीये। कुसुमितानां सहकाराणां श्रिया ज्वलत् काननं यस्मिश्चैत्रमासे। उद्भूतवृत्तिः त्रिष्वपि कालेष्वभिव्यक्तशक्तिः।।60।।

When the earth would be adorned with plenty of grains and filled with prosperity and cheerful men, when there would be no rain and consequent muddiness of the soil, and when the woods would seem to blaze forth with the beauty of the blossoming mango trees,—in such a season putting forth his activities, a king should march out for conquering the enemy's territories.

इति नरपतिराहितादरः परमभियोक्तुमनाः समुत्पतरुत्।
इति विधिविषयोपसेवनान्नियतमरातिरुपैति गोचरम्।।61।।

अभियोक्तारमधिकृत्याह– इतीति। समुत्पतेद् उत्तिष्ठेत्। विधिविषयोपसेवनादिति। यात्राया अभियोक्तुश्च यो विधिरुक्तः, स एव विधिविषयो विजिगीषुणा सेव्य इति कृत्वा। गोचरं सिद्धेरिति शेषः।।61।।

Thus with his best efforts and his mind totally concentrated on the attack, a king should fall upon his enemy. An enemy, whose properties have been snatched away, gets back his territory if he serves the victor faithfully.

(इति यात्राभियोक्तृप्रदर्शनं नाम चतुर्विंशं प्रकरणम्)

इति कामन्दकीये नीतिसारे यात्राभियोक्तृप्रदर्शनो नाम षोडशः सर्गः।

अथ सप्तदशः सर्गः (Canto – 17)

पञ्चविंशं प्रकरणम्

स्कन्धावारनिवेशनप्रकरणम्

(Establishment of Encampments)

[1]यात्वा वैरिपुराभ्याशं[2] भूभागे साधुसम्मते।
स्कन्धावारनिवेशज्ञः स्कन्धावारं निवेशयेत्।।1।।

अभियानोत्तरकालभावित्वाद्विग्रहस्य तदनन्तरं विग्रहाशेषभूतो विधिः सर्गचतुष्टयेनोच्यते। तत्रास्मिन् सर्गे प्रकरणद्वयं स्कन्धावारनिवेशो निमित्तज्ञानं च। तत्र यात्वा शत्रुदेशमनिवेशितस्कन्धावरस्य विग्रहासम्भवात् स्कन्धावारनिवेश उच्यते द्वाविंशत्या श्लोकैः, यदाह– [3]यात्वेत्यादि। वैरिपुराभ्याशं[4] यत्र शत्रुर्यातव्यः स्वकटकेनावस्थितस्तस्याभ्याशम्[5]। भूभागे देशे। साधुसम्मते वास्तुकर्मप्रशस्ते।।1।।

Marching in to the vicinity of the enemy's town, king acquainted with the ways of encamping, should field his camps on grounds commended by the wise.

चतुरश्रं चतुर्द्वारं नातिविस्तारसङ्कटम्।
साट्टप्रतोलीप्राकारं महाखातसमावृतम्।।2।।

चतुरश्रमगारमिति सम्बन्धः। चतुर्द्वारं चतसृषु दिक्षु। नातिविस्तारसङ्कटं, तत्र ह्यन्योन्यरक्षणं[6] परस्परापीडनं[7] च सैन्यं निवेश्यते। साट्टप्रतोलीप्राकारमिति।

---

1. 'गत्वा' क पाठः
2. 'शभू' घ-ङ पाठः
3. 'गत्वे' ग-घ पाठः
4. 'र दुर्गं श' ग-घ पाठः
5. 'शभू कोशेषु पाठः'
6. 'न्यरक्षं प' ग-घ पाठः
7. 'र' ग-घ-ङ पाठः

समन्तान्महाप्राकारमन्तरान्तरा[1] चाट्टालकानि[2]। द्वयोर्द्वयोश्चाट्टालकयोर्मध्ये प्रतोलीमुपस्थापयेत्। महाखातसमावृतं प्राकाराद्बहिः॥2॥

The camp should be quadrangular, with four entrances; it should not be either too spacious or too narrow, and should be surrounded on all sides with highways, embankments and entrenchments.

[3]शृङ्गाटकार्धचन्द्रं वा मण्डलं दीर्घमेव वा।
भूमिप्रदेशसामर्थ्यादगारमुपकल्पयेत्।।3।।

भूमिप्रदेशसामर्थ्यादिति। भूमिप्रदेशसंस्थानवशाच्चतुरश्रशृङ्गाटकादिसंस्थानभेदं स्कन्धावारस्यागारं स्थानं कल्पयेत्॥3॥

The tents inside the camp should be made square, crescent shaped, circular or long, according to the advantages and measure of the ground on which they are erected.

विभक्तैश्च[4] विविक्तैश्च पार्श्वैरन्वितमायतैः।
गुप्तं कक्षपुटाकारं महामार्गसमावृतम्।।4।।

पार्श्वैरिति। प्राकारस्याभ्यन्तरे भागे स्कन्धावारस्य चत्वारि पार्श्वानि, यैरहोरात्रं स्कन्धावारस्य जागरकाः परिभ्रमन्ति, तैर्विभक्तैर्दण्डमात्रविस्तारैः। [5]विविक्तैः शून्यैः। आयतैः प्रगुणैरन्वितमगारमिति संबन्धः। गुप्तं समन्तान्निश्छिद्रत्वात्। कक्षपुटाकारं नवसंस्थानम्। तत्र वास्तुपुरुषहृदयपरिहारार्थं तुल्यप्रमाणान् नवकोष्ठान् प्रकल्पयेदित्यर्थः[6]। महामार्गसमावृतम्। त्रयः प्राचीना राजमार्गाः त्रय उदीचीना इति, तैर्युक्तम्॥4॥

Adorned with broad, disjointed and several tops, adorned with tents, having a secret chamber, and easy outlets on all sides.

---

1. 'रा चा' क पाठः
2. 'दि' ख-ग पाठः
3. 'टमर्ध' ख-ग पाठः
4. 'श्चाविभक्तै' क ग पाठः
5. 'अविभक्तैरशू' क-ख पाठः
6. 'न् क' ग-घ-ङ पाठः

तस्य मध्ये मनोह्लादि [1]महन्मौलबलावृतम्।
अन्तः कोशगृहोपेतं कारयेद् राजमन्दिरम्।।5।।

तस्येति अगारस्य। मध्य इति मध्यमो यो नवमभागः, तं पुनर्नवधा विभज्य मध्यं भागं त्यक्त्वा तस्योत्तरे नवभागे राजमन्दिरं कारयेत्। तथाचोक्तं "मध्यमस्योत्तरे नवभागे राजवास्तुनिवेशं कारयेदि" (कौटि० अर्थ० 10.1.147)ति। महद् मन्दिरामिति सम्बन्धः। अन्तः कोशगृहोपेतं राजमन्दिरस्य मध्ये कोशमन्दिरमपरं कारयेत्।।5।।

Having a treasure-chamber inside, and capable of imparting a sense of cheerfulness and comfort, the king's pavilion should be erected there, and be protected by mighty and veteran troops.

मौलं भृतं श्रेणि सुहृद् द्विषदाटविकं बलम्।
राजहर्म्यं समावृत्य क्रमेण विनिवेशयेत्।।6।।

क्रमेणेति। राजमन्दिरं समन्तादावृत्य मौलं बलं क्रमागतं विनिवेशयेत्। ततो भृत्यबलं वेतनप्रतिबद्धम्। ततोऽपि श्रेणिबलं जानपदम्। अत्र श्रेणिशब्दः स्वलिङ्गे नैव स्थितः। तस्मादपि सुहृद्भूतं[2] बलम्। ततोऽपि [3]द्विषद्भूतम्। ततश्चाटविकमिति।।6।।

Having received them with welcome, a king should place near his own pavilion, the old soldiers serving the royal line for generations, the rank and file, the troops of the allies and of the enemies prevented over, and classes of foresters, in consecutive order.

अन्तः[4] स्ववर्गिणः क्रूरानलुब्धान् दृष्टकर्मणः।
पर्याप्तवेतनानाप्तान् मण्डलेन निवेशयेत्।।7।।

---

1. 'हामौ' ख-ग पाठः
2. 'त्रभिन्नं व' ङ पाठः
3. 'त्रभिन्नम्। त' ङ पाठः
4. 'न्तःस्थव' मूलकोशेषु पाठः

अन्तः स्ववर्गसहितान् स्कन्धावारस्य। दृष्टकर्मणः साक्षात्कृतसमस्तव्यापारान्। पर्याप्तवेतनान् लोभाभावात् परस्याभेद्यान्। मण्डलेन निवेशयेत् स्कन्धावारं परिवृत्येत्यर्थः॥7॥

On the outskirts of the camp, numerous formidable hunters of wicked deeds who have been handsomely paid and won over, should be placed in circular procedure.

हस्तिनो लब्धनामानस्तुरङ्गाश्च मनोजवाः।
गृहोपकण्ठे नृपतेर्वसेयुः स्वाप्तरक्षिताः॥8॥

लब्धनामानः प्रभाविनः॥8॥

Elephants of celebrated names and horses fleet as the glances of the mind, both under the management of faithful dependents, should mount guard at the vicinity of the king's pavilion.

यामवृत्त्या सुसन्नद्धं रात्रिन्दिवमुदायुधम्।
अन्तर्वंशिकसैन्यं च तिष्ठेद् राजाभिगुप्तये॥9॥

यामवृत्त्या प्रहरपर्यायेण। उदायुधं सन्नद्धमपि स्वकोशादुत्खातायुधम्। अन्तर्वंशिकसैन्यम् अन्तः पुररक्षानियुक्तं[1] सैन्यम्॥9॥

A king for his own safety day and night should remain armed with weapons and prepared for action, being ever on his guard, and with the interior of his pavilion cleared of soldiers.

युद्धयोग्यो महादन्ती सन्नद्धः साध्वधिष्ठितः।
[2]तिष्ठेन्नरपतिद्वारे[3] वेगवांश्च तुरङ्गमः॥10॥

साध्वधिष्ठित आप्ताधिष्ठितः। तिष्ठेन्नरपतिद्वारे प्रहरपर्यायेण, तदात्वे हि कार्योत्पत्तौ तमारुह्य कार्यकरणसमर्थो भवति॥10॥

---

1. 'क्तं यत् सै' ग-घ-ङ पाठः
2. 'तेर्द्वा' मूलकोशेषु पाठः
3. 'रि' क पाठः

An elephant with huge tusks, trained in the modes of warfare, duly equipped and ridden by a brave guide, and a fleet steed, should ever be kept ready at the entrance of the king's pavilion.

सैन्यैकदेशः सन्नद्धः सेनापतिपुरस्सरः।
प्रयत्नवान् [3]परिपतेन्मण्डलेन[4] बहिर्निशि।।11।।

सैन्यैकदेशश्च तृतीयश्चतुर्थो वा भागः। परिपतेत् स्कन्धावाराद् बहिः परिभ्रमेत् परावस्कन्दप्रतिविधानार्थम्।।11।।

With a portion of his own troops and with those of the friends, and placing the commander-in-chief in his front and accoutered in mail, a king should at night fall upon the enemy outside his own camp.

परसैन्यप्रचारांश्च सत्त्वाढ्याः शीघ्रगामिनः।
वाताश्विका [5]विजानीयुर्दूरसीमान्तचारिणः[6] ।।12।।

परसैन्यप्रचारांश्च विजानीयुः तदनुरूपप्रतिविधानार्थम्। सत्त्वाढ्याः सत्त्वाधिकाः। वाताश्विकाः वाताश्वचारिणः। शीघ्रपातिनोऽपि केचिद् दूरं सीमान्तं परिभ्रमितुमशक्ता इति पृथगुपादानम्।।12।।

Swift horsemen capable of running to distant boundaries and border-lands, and of great fleetness, should determine the movements of the enemy's troops.

तोरणाबद्धमाल्येषु यन्त्रवत्सु पताकिषु।
द्वारेषु परमां गुप्तिं कारयेदाप्तकारिभिः।।13।।

यन्त्रवत्स्विति चतुर्द्वारेषु शरपाषाणप्रमोक्षार्थं सर्वतोभद्रादीनि यन्त्राण्युपस्थापयेत्। गुप्ति रक्षाम्। आप्तकारिभिः विजिगीषोरिष्टकारिभिः।।13।।

---

[3] 'चरेन्म' क-ग पाठः
[4] 'लं तद् व' ख-ग पाठः
[5] 'युः पुर' ख पाठः
[6] 'वासिनः' ग पाठः

Strict watch should be made to be kept by faithful troops at the entrances decorated with flags, flag-staffs, and porches adorned with garlands of flowers.

निर्गच्छेत् प्रविशेच्चैव सर्व एवोपलक्षितः।
तिष्ठेयुः परदूताश्च राजशासनगोचराः।।14।।

राजशासनगोचरा इति। परकीयेभ्यः प्रवेशो न देय इति राजशासनम्। यदा चायं प्रवेशमादिशति, तदा प्रविशेयुः, अन्यदा तु तच्छासनगोचरा एव तिष्ठेयुः।।14।।

Everybody should go out and come in keenly watched. The enemy's spies should dance in attendance upon the king, ready to receive his commands.

वृथाकोलाहलाद्धास्याद् द्यूतात् पानाश्च वारितः।
सज्जोपकरणस्तिष्ठेत् सर्वः[1] कार्योन्मुखो जनः।।15।।

वृथाकोलाहलात् क्रीडोत्पत्तिकृताद् हास्याद् द्यूतात् पानाच्च कलहहेतोः सज्जोपकरणः[2] तिष्ठेत्। कार्योन्मुखः यस्य च यस्मिन्नियोगस्तदवहितः।।15।।

Prevented from drinking, gambling and useless noise-making, the men should stand prepared for all Acts, ready with all accouterments and instruments.

बहिः खातात् तु सैन्यानां मुक्त्वा सञ्चारमात्मनः[3]।
परसैन्यविघातार्थं सर्वां भूमिं विनाशयेत्।।16।।

मुक्त्वा सञ्चारमिति। चतुर्द्वारेषु स्वसैन्यानां सञ्चारमार्गमात्रं[4] त्यक्त्वाशेषां भूमिं नाशयेत्।।16।।

Leaving grounds spacious enough for the drill and exercise of his own good swordsmen, a king should destroy

---

1. 'र्वका' क-ख पाठः
2. 'णः का' ग-घ-ङ पाठः
3. 'मायतम्' क पाठः
4. 'र्गमायतं त्य' ग-घ पाठः, 'र्गत्य' ङ पाठः

all other lands outside his own entrenchments, for the purpose of destroying the enemy's troops.

क्वचित् कण्टकशाखाभिः क्वचिच्छूलैरयोमुखैः।
दूषयेत् परितो भूमिं प्रच्छन्नैः[3] प्रदरैरपि।।17।।

कथमित्याह– क्वचिदित्यादिना। अयोमुखैः शूलैः। प्रदरैः श्वभ्रैस्तृणाविप्रच्छन्नैः।।17।।

The ground around the camp should be pervaded, at places with thorny branches of trees, at places with iron pointed spikes of caltrops, and at places with secret holes and fissures.

निर्वृक्षक्षुपपाषाणस्थाणुवल्मीकनिर्दरे।
कारयेत् करणैश्चित्रैः सैन्यव्यायामभूमिकाः।।18।।

निर्वृक्षेति। निर्गता वृक्षादयो यस्मात् प्रदेशादिति विग्रहः। क्षुपो गुल्मः। निर्दरं भूमेर्विदारणम्। व्यायामो युद्धचर्या न तु व्यायाममात्रं करणशब्दसन्निधानात्।।18।।

Every day the drilling of the soldiers should be performed, with various appliances and on grounds cleared of trees, shrubs, stones, trunks, earthen mounds and water.

यस्मिन् देशे यथाकामं सैन्यव्यायामभूमयः।
परस्य विपरीताश्च श्रुतो देशः स उत्तमः।।19।।

स्कन्धावारनिवेशार्थं विग्रहार्थं च देशस्योत्तममध्यमाधमतां दर्शयति– यस्मिन्नित्यादिना। यथाकाममिति यथात्मनो हस्त्यादीनां यथेष्टं चेष्टमानानां भूमयः। परस्य विपरीताः अयथाकामम्।।19।।

The place where desirable grounds for the drill of the king's own troops can be obtained and where all the disadvantages will be on the enemy's side such a place is said to be the best for enchanting purposes.

---

1. 'न्नैश्च द' क पाठः

आत्मनश्च परेषां च तुल्या[1] व्यायामभूमयः।
[2]यत्र मध्यम उद्दिष्टो देशः शास्त्रार्थचिन्तकैः।।20।।

तुल्या[3] व्यायामभूमयः सैन्यस्य।।20।।

Where grounds equally advantageous for the drill of one's own troops and those of the enemy can be found that place is said by persons interpreting the Shastras, to be of ordinary merit.

अरातिसैन्यव्यायामसुपर्याप्तमहीतलः[4]।
आत्मनो विपरीतश्च यः स देशोऽधमः स्मृतः।।21।।

सुपर्याप्तं सुप्रचारम्।।21।।

Where there are spacious grounds for the drilling of the enemy's troops and where the reverse is the case with regard to a king's own troops,—that place is said to be the worst of all places.

नित्यमुत्तममाकाङ्क्षेत् तदभावे तु मध्यमम्।
अधमं बन्धनागारं नोपसेवेत सिद्धये।।22।।

उत्तममाकाङ्क्षेद् निवेशार्थं विग्रहार्थं च। बन्धनागारं तत्र हि चेष्टासरोधाद् बद्धस्येवावस्थानम्।।22।।

Always wish to have the best encamping ground, in its absence, try to get a middling one ; but never, for the sake of success, use the worst place, which is no better than a place of detention.

(इति स्कन्धावारनिवेशनं नाम पञ्चविंश प्रकरणम्)

---

1. 'ल्यव्या' ख-ग पाठः
2. 'स मध्यमः समुद्दि' क पाठः
3. 'ल्यव्या' क-ख पाठः 'ल्या व्यापारभू' ङ पाठः
4. 'भुवस्तलः' क पाठः

षष्ठविंशं प्रकरणम्

निमित्तज्ञानप्रकरणम्

Nimittajnana Prakaranam

आक्रान्त इव केनापि रोगानीकैरभिद्रुतः।
अकस्माद्भवदुद्वेगो रजोनीहारसंवृतः॥23॥

एवं निवेशितस्य स्कन्धावारस्य जयपराजययोः शुभाशुभनिमित्तं जानीयादिति निमित्तज्ञानमुच्यतेऽष्टादशभिः श्लोकैः। तत्राशुभमविकृत्याह– आक्रान्त इत्यादि। केनापि भूतविशेषेणावष्टब्ध इव रोगानीकैरभिद्रुतः। अकस्माद् विना [1]प्रियाप्रियवाग्योगादिना[2] भवदुद्वेगः॥23॥

A camp—which seems to be within the clutches of some body, where numerous diseases prevail, where suddenly hostilities spring up, and heavy frosts fall,

विधूम्रैः परुषैर्वातैरकस्माच्च पतद्ध्वजः।
परस्परभवद्द्रोहो नतथातूर्यनिस्वनः॥24॥

विधूम्रैः धूमिकादिभिः खरैश्च वातैः संवृत इत्येव। अकस्माद् विना वातेन पतद्ध्वजः। परस्परभवद्द्रोहः [3]अवस्कन्दादिभिः। नतथातूर्यनिस्वनः यथा प्राक्॥24॥

Which is blown over by unfavorable winds, where suddenly dusts begin to fall, where each tries to injure another and where the drums do not sound well,

उत्प्रेक्षितभयत्रासो निर्घातोल्का (भि?दि) दूषितः।
[4]उद्भमत्प्रज्वलच्छस्त्रो[5] विदक्षिणशिवारुतः॥25॥

---

[1] 'या' क-ख-ग-घ पाठः

[2] 'भो' क-ग-घ पाठः

[3] 'खष्टरादि' ग-घ पाठः

[4] 'द्भूमप्र' क पाठः

[5] 'त्रो' क-घ पाठः

भयं मरणहेतुकं, त्रासः शङ्कामात्रम्। निर्घातोल्कादिदूषणं विजिगीषुदेशे तस्य निपातनात्। उद्वमत् स्वकोशान्निष्क्रामत् प्रज्वलत् शस्त्रं यत्र। विदक्षिणशिवारुतः विदक्षिणः प्रतिकूलः॥25॥

Where there are constant alarm and scare, where resonating thunders roar and where meteors fall, where the king's Parasol appears to be on fire and emits smoke and where squealing of jackals is heard from the left side.

मण्डलैः काकगृध्राणामाकीर्णो[1] रूक्षवाशिभिः।
मुहुरत्युग्रतादीप्तः संसिक्तो रक्तवृष्टिभिः॥26॥

अत्युग्रतादीप्तः अतिरूक्षत्वाद् राक्षसीनिवास इव। रक्तवृष्टिभिः औत्पातिकीभिः॥26॥

Which is infested by flocks of crows, vultures and other such birds of ominous note, where great heat is suddenly felt and showers of blood fall,

परीतराजनक्षत्रः क्रूरैरौत्पातिकैर्ग्रहैः।
सूर्यदृष्टकबन्धादिरकस्मान्मूढवाहनः॥27॥

क्रूरैर्ग्रहैः राहुभौमशनैश्चरैः। औत्पातिकैः केतुकम्पादिभिः। सूर्यमण्डले दृष्टं कबन्धादि यस्मिन् स्कन्धावारे। तस्मात्तु नान्यत्र दृश्यते। मूढो विमनस्कः॥27॥

Where the Rajanakshatra is seen to be surrounded on all sides, by other baneful significant planets, and whence headless trunks are seen in the sun, and where the vehicles and draught animals are suddenly stupefied,

[2]अकस्मान्मत्तमातङ्गः [3]संशुष्यद्दानशीकरः।
इत्यादिविकृतोपेतः स्कन्धावारो न शस्यते॥28॥

दानं मदः। विकृतम् अशुभम् ॥28॥

---

1. सीनो वृक्षवासिनाम् क पाठः
2. 'न्मूढमा' क पाठः
3. 'प्रदुष्य' ख-ग पाठः

And where the ichor exuding from the temples of elephants in rut, suddenly dries up,—a camp where these and such other kinds of omens will do prevail, is a very bad one – and is not acclaimed by the wise.

प्रहृष्टनरनारीकः प्रशस्तस्वनदुन्दुभिः।
गम्भीरहेषितहयः [1]पूरितद्विपबृंहितः।।29।।

शुभमधिकृत्याह—प्रशस्तस्वनो गम्भीरस्वनः। बृंहितं गार्जितम्।।29।।

A camp-where the inmates, men and women, are all cheerful, where the drums and kettle-drums sound aloud where horses neigh deeply and elephants duly equipped roar terrifically,

पुण्याहब्रह्मघोषाढ्यो नृत्तगीतसमाकुलः।
निरीतिको[2] महोत्साह आकाङ्क्षितजनोदयः[3]।।30।।

पुण्याहब्रह्मघोषाढ्य इति। प्रशस्तदिने वेदध्वनिमुखरः। यदि वा पुण्याहघोर्षर्ब्रह्मघोषैश्च सर्वदा[4] कलितः। निरीतिको निरुपद्रवः।।30।।

Which rings with music of the Vedic chants and the saying of Punyaha, where melodious harmony of songs and dances rise up in wave after wave, where there is no cause of alarm and great excitement prevails, and where the expected victory is indicated by good insignia.

विरजस्कोऽभिवृष्टश्च प्रादक्षिण्यस्थितग्रहः।
दिव्यान्तरिक्षैरुत्पातैः पार्थिवैश्च विवर्जितः।।31।।

अभिवृष्टो जलधरसिक्तः। प्रादक्षिण्यस्थितग्रहः [5]पुरःशुक्राद्यभावात्। उत्पातैरिति। उत्पातास्त्रिविधाः दिव्यान्तरिक्षभौमाः, तैरप्रशस्तैर्विवर्जितः।।31।।

---

1. 'जि' क पाठः
2. 'कः सदोत्सा' क पाठः
3. 'यो' क पाठः
4. 'दाकालक' ग घ पाठः
5. 'पुरुषशु' क-ख पाठः

Where there is no dust-storm but excessive rain falls, where the Grahas are seen to be on the right cycle, and no unusually ominous phenomena, either heavenly or earthly, are viewed,

प्रशस्तकूजद्विहगः प्रदक्षिणशिवारुतः।
नीचैः प्रवृत्तानुलोममारुतः स्तुतमङ्गलः।।32।।

[1]विहगाः काकादयः। अनुलोमो मारुतः पृष्ठतोवाही। स्तुतमङ्गलः स्थानस्थानेषु [2]वन्दिभिः।।32।।

Where favorable winds sing auspiciousness by their blowing, where the troops are well-fed and cheerful, and where incenses are burnt on blazing flames.

हृष्टपुष्टजनः[3] साधुः सुगन्धिज्वलितानलः[4]।
[5]अमन्दमत्तमातङ्ग आसाराभ्युदयान्वितः।।33।।

साधुः परस्परद्रोहाभावात्। सुगन्धिः निर्गन्धेन्धनदाहेऽपि ज्वलितोऽनलो यत्र। आसारो मित्रबलम्।।33।।

Where the elephants are mad without having drunk intoxicating liquors and where the Asaras are in highly prosperous state,—a camp where these auspicious signs prevail, is praised by the wise.

इत्यादिलक्षणोपेतः स्कन्धावारः प्रशस्यते।
[6]शस्ते तस्मिन् द्विषो भङ्गोऽशस्ते ज्ञेयो विपर्ययः।।34।।

शस्ते तस्मिन् स्कन्धावारे। अशस्ते विषर्ययः द्विषो जयः।।34।।

When good and auspicious signs are seen in the camp,

---

1. 'हङ्गमाः कारादयः' घ पाठः
2. 'बन्धुभिः' घ पाठः
3. 'बलासारः सु' ख ग पाठः
4. 'शिशिरानिलः' ख ग पाठः
5. 'त्तमाद्यन्मा' ख पाठः
6. 'एतस्मिन् विद्विषां भ' क पाठः

the foe is sure to be moved, and when they are bad and inauspicious, reverses are to be suffered by the king. It is portents that indicate good or bad results.

[1]सिद्ध्यसिद्धी निमित्तानि यतः शंसन्ति कर्मणाम्।
विद्यादात्महिताकाङ्क्षी तस्मादेतानि तत्त्वतः।।35।।

शंसन्ति कथयन्ति। तस्मादेतानि शुभाशुभानि॥35॥

For these reasons, a monarch versed in the Shastras should mark all the omens. When the predictions are good and the king exerts with a pure heart, he leads to success with the worthy works undertaken by him.

प्रशस्तेन निमित्तेन विशुद्धेनान्तरात्मना।
व्यक्तमारभ्यमाणं हि सिद्धिं याति समीहितम्।।36।।

विशुद्धेनान्तरात्मना जयाभिकाङ्क्षिणा। समीहितं विग्रहादिकम्॥36॥

Victory is of him, who possesses friends, wealth, knowledge, prowess, favorable fortune, persistence and manly efforts.

सहायसम्पत् प्रज्ञानं सत्त्वं दैवानुकूलता।
[2]उद्योगोऽध्यवसायश्च यस्यैते तस्य सिद्धयः।।37।।

सिद्धिनिमित्तान्तराण्याह– सहायसम्पदित्यादि। प्रज्ञानं प्रज्ञा अष्टाङ्गा। दैवानुकूलता प्रागुक्ता। उद्योग उत्साहः। [3]अध्यवसायो व्याख्यातः (स 16 श्लो० 34)॥37॥

The king is called the Skandha in as much as he is said to be the root of the prosperityof the people. The functions of the ministers, the army and other members of a government are said to be Abara.

---

1. 'द्धासिद्धं नि' क पाठः
2. 'गो व्यव' ख-ग पाठः
3. 'व्यव' क-ख पाठः

तन्मूलत्वात् प्रजानां तु राजा स्कन्ध उदाहृतः।
आवारोऽमात्यदण्डादिर्वृतिरावार[1] उच्यते।।38।।

क: पुन: स्कन्धावार:, यस्य निमित्तज्ञानमित्याह– तन्मूलत्वादिति। यथा शाखानां वृक्षस्कन्ध आश्रयस्तथा राजा प्रजानामाश्रयत्वात् स्कन्ध उच्यते। आवारोऽमात्यदण्डौ। अमात्यप्रकृतेर्दण्डप्रकृतेश्च सचेतनाया: प्राधान्येन व्याप्रियमाणत्वात्। वृतिरावार उच्यत इति फलत आवारत्वमात्रं दर्शयति।।38।।

When for the advancement and prosperity of the people the Skandha or the king is supported or helped forward by the great Avaras or ministers, armies etc, it is said to be Skandhavara.

भूतानां भूतिनिष्पत्तेरावारेण महीयसा।
[2]आवृतस्तु यतः स्कन्धः स्कन्धावारस्ततः स्मृतः।।39।।

भूतानां भूतिनिष्पत्तेरिति। प्रजानां त्रिवर्गनिष्पत्तेः कारणादित्यपरं प्रयोजनम्। आवृतस्तु यतः स्कन्ध इति करणसाधनात्मिकां व्युत्पत्तिं दर्शयति। इदमुक्तं भवति– प्रजाभि: स्वभूतिनिष्पत्त्यर्थिनीभिस्तत्परिरक्षार्थं तत्साहापकार्थं चाव्रियते[3] अमात्यदण्डादिकया वृत्या स्कन्धोऽनेनेति स्कन्धावार:।।39।।

The destructions of the pavillions, the clothing, the drinking water and the food grains, and of the supporting troops of the associates,—these are said to be the deaths of the Skandhavara ; —these therefore should be cautiously protected .

समवस्कन्दघासाम्बुवीवधासारनिग्रहाः।
एते प्रयत्नतो रक्ष्याः स्कन्धावारस्य मृत्यवः।।40।।

अस्य निवेशितस्य रक्षणोपायमाह– समवस्कन्देत्यादि। निग्रहशब्दो विघाते द्रष्टव्य:, घासादिमिश्च प्रत्येकं योज्य:।।40।।

---

1. 'त्ति' क-ख पाठ:
2. 'यत आवारित: स्क' क पाठ:
3. 'ते स्क' ग-घ पाठ:

Thus the army should be carefully encamped and its good or bad state viewed; this good or bad condition should also be cautiously watched with regard to the enemy's army. When no evil omens would be seen, a king should begin action.

इति प्रयत्नेन निवेशयेद् बलं
शुभाशुभं चास्य तथोपलक्षयेत्।
परस्य चैतन्निपुणं विलोकयेत्
समारभेताशुभहीनदर्शने।।41।।

प्रकरणद्वयार्थमुपसंहरन्नाह[1]– इतीत्यादि। परस्य विलोकयेद् निवेशं शुभाशुभं च। अशुभदीनदर्शन इति परस्कन्धावारस्याशुभस्य[2] च दर्शने[3] हीनस्य च दर्शने समारभेत विग्रहमित्यर्थात्।।41।।

The army should be cautiously positioned in this way and their situation appropriately observed. Similar careful observation of the enemy's position should also be made and the action should be commenced only when situation is completely free from unfavorable threats.

(इति निमित्तज्ञानं नाम षड्विंश प्रकरणम्)

इति कामन्दकीये नीतिसारे स्कन्धावारनिवेशननिमित्तज्ञाने नाम सप्तदशः सर्गः।

---

1. 'रंश्चाह' ग-घ पाठः
2. 'स्य निवेशनं ही' क-ख- पाठः
3. 'नं' कोशेषु पाठः

अथाष्टादशः सर्गः (Canto – 18)

सप्तविंशं प्रकरणम्

उपायविकल्पप्रकरणम्

(Various Expidents)

महाप्रज्ञानसम्पन्नः स[1]हायैरुपबृंहितः।
उद्योगाध्यवसायाभ्यामुपायान् निक्षिपेत् परे।।1।।

एवं[2] शुभाशुभनिमित्तदर्शनाल्लब्धोत्साहः शत्रौ विजिगीषुरुपायान् प्रयुञ्जीत। शत्रुजयस्योपायसाध्यत्वादित्युपायविकल्प उच्यतेऽस्मिन् सर्गे। यदाह– महाप्रज्ञानसम्पन्न इत्यादि। महती अष्टाङ्गा प्रज्ञा यस्य स महाप्रज्ञानः सम्पन्नश्च[3] सहायैः यदा सहायसम्पदादयः षट् सिद्धिहेतवो गुणाः स्युस्तदा शत्रौ निक्षिपेदुपायान्।।1।।

Controlled by a deep intelligence and armed with heroism and a favorable fortune, a king with proper activities and perseverance, should bring to bear against the enemy, the expedients for subjugating them.

चतुरङ्गं बलं मुक्तवा कोशो मन्त्रश्च युध्यते।
तत् साधुमन्त्रो मन्त्रेण कोशेन च जयेदरीन्।।2।।

कुत्र कमुपायमादौ निक्षिपेदिस्याह– चतुरङ्गमित्यादि। कोशो मन्त्रश्च युध्यते प्रथमम्। हस्त्यश्वरथपदातिभिर्व्यायामयुद्धमन्त्यावस्थायां क्रियते। तस्मात् प्रथमं मन्त्रेण सामभेदात्मकेन कोशेन कृतेन [4]जयेदरीन्। साधुमन्त्रः कृतपञ्चाङ्गविनिर्णयत्वात्।।2।।

---

1. 'सत्त्वदैवोप' मूलकोशपाठः
2. 'वं शुभनि' क-ख पाठः
3. 'न्नः स' ग-घ-ङ-च पाठः
4. 'जीयाद' क-ख पाठः

A solvent treasury and a good counsel, fight better than an army consisting of the four kinds of forces. Therefore a king of sound political knowledge—should conquer his enemies by the power of counsel and treasures.

साम दानं च भेदश्च दण्डश्चेति चतुष्ट[1]यम्।
मायोपेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः।।3।।

के पुनरुपाया इत्याह– सामेत्यादि। तत्र सामादिचतुष्टयं सर्वेषामेवाचार्याणामभीष्टमिति पृथङ् निर्दिष्टम्। मायादिभिः सह सप्तोपायाः प्रकीर्तिताः[2] कैश्चित्।।3।।

Conciliation, gift or bribery, display of military power, and domestic discord, these four, and pretense, neglect and artifice—these, seven in all, are said to be the means of success against an enemy.

परस्परोपकाराणां दर्शनं गुणकीर्तनम्।
[3]सम्बन्धस्य समाख्यानमायतेः [4]सम्प्रदर्शनम्।।4।।

तत्र चतुष्टयस्य स्वरूपभेदं षड्भिः श्लोकैराह– परस्परोपकाराणामित्यादि। त्वयेदमस्मासूपकृतं मया युष्मास्विदमिति पूर्वकृतानामुपकाराणां दर्शनम्। गुणकीर्तनं शूरः श्रुतवान् यद्वा [5]रूपवानित्यादि। सम्बन्धस्य समाख्यानं या त्वद्भगिनी सा मद्भ्रातृभर्येति यौनस्य, अस्मत्पितुः सकाशात् त्वयाधीतमिति मौलस्य। [6]आयतिसम्प्रकाशनम्। अस्मिन्नेवं कृते इदमावयोर्भविष्यतीत्याशाजननम्।।4।।

The enumeration of the good services done mutually, admiring of the merits, the establishment of some relationship, display of majesty,

---

[1] 'र्विधः।' क पाठः
[2] 'ता इति कश्चि' ग-घ पाठः
[3] 'प्राक्सम्बन्धस' ख-ग पाठः
[4] 'यतेश्च प्र' ख-ग पाठः
[5] 'जयवा' ङ पाठः
[6] 'तिप्र' ग-ध-ङ पाठः

वाचा पेशलया साधु तवाहमिति चार्पणम्।
इति सामप्रभेदज्ञैः साम पञ्चविधं स्मृतम्।।5।।

पेशलया हृदयहारिण्या।[1] तद्यथा– योऽहं, स भवान्, यन्मम द्रव्यं, तद् भवता स्वकृत्येषूपयुज्यताम् इति।।5।।

And to speak in sweet and smooth words—"I am yours",—these are said to be the five kinds of conciliation, by those who know how to apply it.

[2]यः सम्प्राप्तधनोत्सर्ग उत्तमाधममध्यमः।
प्रतिदानं तथा तस्य गृहीतस्यानुमोदनम्।।6।।

उत्तमाधममध्यम इति। सारासारो मध्यमोपायः। सम्प्राप्तो गृहीतो धनोत्सर्गो द्रव्यसम्पत्, तस्य गृहीतस्य तथा सारासारादिभेदेन प्रतिदानं प्रत्यर्पणम् अनुप्रतिदानमित्यर्थः। गृहीतस्यानुमोदनम् अनुज्ञानम्।।6।।

To give away acquired wealth in good, bad or middling manner, to give in return for what is obtained, or to suffer what has been taken away,

द्रव्यदानमपूर्वं च स्वयंग्राहप्रवर्तनम्।
देयस्य प्रतिमोक्षश्च दानं पञ्चविधं स्मृतम्।।7।।

द्रव्यदानमपूर्वं च भाण्डागारादुद्धृत्य यदभिनवं दानम्। स्वयंग्राहप्रवर्तनं, परस्वेष्विति शेषः। अमुष्माद् द्रव्यं गृहाण तवैव भविष्यतीति। देयस्य प्रतिमोक्षणम् ऋणादिप्रतिमोचनम्।।7।।

To give away some wonderful thing and the remission of what is due—these are said to be the five types of gifts.

स्नेहरागापनयनं सङ्घर्षोत्पादनं तथा।
सन्तर्जनं च भेदज्ञैर्भेदस्तु त्रिविधः स्मृतः।।8।।

---

1. 'ण्या यथा' ङ पाठः
2. 'सम्प्राप्तो यो ध' ख-ग पाठः

भेदस्त्रिविध इति। परस्माद् विश्लेषणं भेदः। स द्विविध उक्तः कौटिलीये शङ्काजननमभिभर्त्सनं च। भेदानुग्रहेण वृद्धः[1] प्रासादतरुवत् स्वमाश्रयमेवोच्छेत्स्यतीत्याशङ्काजननम्। अस्य त्वस्मिन् मित्राभिग्रहस्य परिणामोऽस्मत्तो भविष्यतीत्येवम्प्रकारसन्तर्जनमभिभर्त्सनम्। तत्र शङ्काजननं कार्यद्वारेण द्विधा विभज्येह त्रिविध उक्तः। उत्पादिता हि शङ्का स्नेहं भक्तिं चापनयति स्पर्धां चोत्पादयति॥8॥

To cause affection and love to fade away, to cause rivalry, and to threaten, these are the three methods of sowing domestic disharmony.

वधोऽर्थहरणं चैव परिक्लेशस्तथैव च।
इति दण्डविभागज्ञैर्दण्डस्तु त्रिविधः स्मृतः॥9॥

वधः प्रवासनम्। परिक्लेशः बन्धनताडनादिभिर्दुःखोत्पादनम्॥9॥

To kill, to plunder wealth, and to inflict loss and misery, these are said to the three types of display of military authority, by those who know how to use military authority.

प्रकाशश्चाप्रकाशश्च वधो द्विविध उच्यते।
प्रकाशदण्डं कुर्वीत लोकद्विष्टे तथा रिपौ॥10॥

वधाख्यस्य दण्डस्य विषयभेदं चतुर्भिः श्लोकैर्दर्शयति– प्रकाश इत्यादि। पूर्वं द्विविध उच्यते वधाख्यो दण्डः। लोकद्विष्टाश्चोरपारदारिकादयो रिपवश्च प्रकाशं हता न दोषाय॥10॥

Danda or inflection of punishment is said to be of two forms viz.open and secret. The enemies of those disliked by the people should be openly dealt with.

उद्वेज्यते[2] हतैर्लोको यैर्ये[3] स्युर्नृपवल्लभाः।
बाधन्तेऽभ्यधिका ये तु तेषूपांशु प्रशस्यते॥11॥

---

[1] 'द्धाः शेषं सुप्रसन्नमित्यष्टदशः सर्गः।' इति ङ पाठः

[2] 'ते च लो' क पाठः

[3] 'र्ये च स्यु' क पाठः

हतैर्यैर्दृष्टैरपि। नृपवल्लभाः स्यालादयः। तेऽपि लोके दृढभक्तिताख्यापनार्थमप्रकाशं हन्तव्याः। ये चाभ्यधिका बलीयासः प्रकाशं हन्तुमशक्याः॥11॥

Those who cause apprehension to the people, those who are the kings favorites, and those who stand very much in the way of the material prosperity of the state should be dealt secretly.

विषेणोपनिषद्योगैः शस्त्रेणोद्वर्तनेन वा।
तथोपांशु नयेद्दण्डं यथान्यो न विभावयेत्॥12॥

स चोपांशुदण्डः कथं प्रयोक्तव्य इत्याह– विषेणेत्यादि। अभ्यवहार्यादिसंसृष्टेन[3] विषेण। उपनिषद्योगैः रहस्यप्रयोगैरग्न्यादिभिः। शस्त्रेण तीक्ष्णप्रयुक्तेन। उद्वर्तनेनेति। के(न) चित् स्फोटादिजनकेन विलेपनेन॥12॥

By poisoning, by the help of mystic ceremonies - e.g.Marana, assassination by weapon and by throwing down. By these methods secret punishments should be meted out, that nobody could come to know of them.

ब्राह्मणे जातिमात्रेऽपि धार्मिके चान्त्यजेऽपि वा।
धर्मोन्निनीषया धीमान् न वधं दण्डमादिशेत्॥13॥

अन्त्यजे चण्डालादौ। धर्मोन्निनीषया धर्मोद्विभावयिषया। न वधदण्डमादिशेत् परिक्लेशार्थहरणे तु विनयाधानार्थमादिशेदेव॥13॥

an intelligent king, should not—for the advancement of his material (spiritual) welfare On Brahmans, or on any other caste, on pious people and on low and mean classes of men, , inflict the capital punishment.

उपेक्षया वा हन्तव्या येषूपांशु [1]प्रशस्यते।
उपेक्षां चापि निपुणः प्रत्यक्षं परिवर्जयेत्॥14॥

विधानान्तरमाह – उपेक्षया वेत्यादि। उपेक्षां वक्ष्यति। नृपवल्लभादीनां

---

1. 'शिल' क-ख पाठः
2. 'वर्तते' क पाठः

यद्यन्ये हन्तारः स्युस्तदा तैरेव हन्यतामित्युपेक्षां कुर्यात्। प्रत्यक्षं परिवर्जयेद्, वधस्य हि प्रत्यक्षमुपेक्षामाचरंस्तैरेव हन्येत[4] अस्मद्विनाशमुपेक्षत इति॥14॥

Those against whom secret punishment is recommended, may also be done away by neglect. But a prudent person should avoid to show this neglect outwardly.

प्रलिम्पन्निव चेतांसि दृष्ट्या साधु पिबन्निव।
स्रवन्निवामृतं साम प्रयुञ्जीत प्रियं वचः॥15॥

यथा सामादीन् प्रयुञ्जीत तथा दर्शयति श्लोकचतुष्टयेन– प्रलिम्पन्नित्यादि। साम प्रयुञ्जीत, किं तत् सामेत्याह– प्रियं वच इति॥15॥

Thoroughly looking over, reviewing and studying their hearts and speaking sweet words and thereby appearing to be shedding nectar—a king should employ conciliation as an expedient against the enemy.

वागनुद्वेगजननी सामेति परिकीर्त्यते[2]।
सामाख्या सूनृते सान्त्वे प्रिये स्तोत्रे च कीर्त्यते॥16॥

तदेव पञ्चविधं सूचयन्नाह– वागित्यादि। अनुद्वेगजननी विस्रम्भजननी। सा वाक् परस्परोपकाराणां दर्शने आख्याने सम्बन्धाख्याने सूनृते समाख्याने सान्त्वे तवाहमिति चार्पणे प्रिये आयतिसम्प्रकाशने स्तोत्रे गुणकीर्तने॥16॥

Sweet and pleasant speech is said to be conciliation itself. Acclamation, truth, sweet speech, these are synonymous with appeasement.

आत्मनो विक्रयमिव कुर्वन् दद्यात् समीहितम्।
जलवत् पर्वताञ्छत्रून् भिन्द्यादनुपलक्षितः॥17॥

विक्रयमिव कुर्वन्निति अङ्गार्पणेनात्मानं विक्रीणन्निव। दद्यात् समीहितं यद् दातुमभिप्रेतम्। जलवद् भिन्द्यात् शनैःशनैः॥17॥

---

1. 'र्तिता।' क पाठः
2. 'न्यतेऽस्म' क-ख पाठः

Appearing to view the undertaking of the enemy in the light of his own, a king should enter into his heart unperceived, like water penetrating into the mountain.

दण्डपाणिरिवाधृष्यो दण्डं दण्ड्येषु पातयेत्।
प्रत्यक्षामपि चोपेक्षामप्रत्यक्षामिवाचरेत्।।18।।

दण्डपाणिरिव यम इव भूतानामधृष्यः। प्रत्यक्षमपीति। वधस्य प्रत्यक्षमुपेक्षां वर्जयेदित्युक्तं प्राक्। इदानीं तस्य विशेषः। प्रत्यक्षमुपेक्षामप्रत्यक्षमिवाचरेदाकारसंवरणेन।।18।।

Punishments should be inflicted in deserving cases as unbaisedly as lord of death-by the weilder of the Danda. Even where punishment is meted out openly it should be done with indifference as if un noticed

साम्नार्थसिद्धये विद्वान् यतेत यतमानसः।
सामसिद्धिं प्रशंसन्ति सर्वतश्च[1] विपश्चितः।।19।।

एते च सामादयो यथाक्रमं प्रयोक्तव्याः। तत्र श्लोकद्वयेन सामप्रयोगमाह– साम्नेत्यादि। अर्थसिद्धये यतेत यतमानसः, असंयतचेतसो हि सामाभावात्। सर्वतः सर्वत्र चतुर्ष्वप्युपायेषु, सर्वेभ्य उपायेभ्यः।।19।।

A wise ruler alwayas gains his ends by firmly adhering to the expedient of Sama or conciliation . For purposes of success sama of the four upayas or expedients is always commended by the wise.

क्षीरोदो मथितः साम्ना फलायामरदानवैः।
निजघ्निरे धार्तराष्ट्राः सामप्रद्वेषिणोऽचिरात्।।20।।

सामप्रधानस्य सामद्वेषिणश्च गुणदोषावाह– क्षीरोद इति। पुरा किल क्षुज्जरापीडिता देवाः ब्रह्माणमुपगम्य तत्पीडोपशमं पप्रच्छुः। स तानाह क्षीरोदं निर्मथ्यामृतं पिबतेति। ते तत्स्तुतिराश्चिरकालं तमाराध्य दानवसहायाः ममन्थुरिति। धार्तराष्ट्राः दुर्योधनादयः। ते विक्रमैकरसा मानिनः सामसाध्येषु पाण्डुषु विक्रममाणास्तैर्निहता [2]इत्यतिप्रतीतम्।।20।।

---

1. 'वस्तुषु पण्डिताः' ख-ग-पाठः
2. 'ति प्र' ग-घ पाठः

The immortals and the Danavas succeeded in churning the ocean of milk and obtained desirable results only through appeasement. The sons of Dhritarastra, who were against the policy of conciliation, were soon killed by the sons of Pandu.

दारुणं विग्रहं विद्वान् दानेन प्रशमं नयेत्।
इन्द्रोऽपचारे शुक्रस्य दानेन शममेयिवान्।।21।।

श्लोकत्रयेण दानप्रयोगमाह– दारुणमित्यादि। यदा साम्ना न सिद्धिस्तदा दारुणो विग्रहो भवति। इन्द्रोऽपचार इति। दानवानामिन्द्रो वृषपर्वानामासुरो दुहित्रा कृतेऽपचारे शुक्रस्य दानेन स्वदुहितुः शममेयिवान्।।21।।

An intelligent and wise king should pacify a threatening enemy by means of gift or bribery. When intent on ruining Indra, Sukra was appeased through gift.

अपराधेन दुहितुः [1]कुपिते भृगुनन्दने।
वृषपर्वा च दानेन दानवेन्द्रोऽभवत् सुखी।।22।।

तदेव स्फुटयन्नाह– अपराधेनेत्यादि। वृषपर्वणो दानवेन्द्रस्य दुहिता शर्मिष्ठा नाम तन्मन्त्रिणः शुक्रस्य दुहित्रा देवयान्या सह स्नातुं गता। तत्र स्नाता देवयानी विसंवादानुबद्धवस्त्रया शर्मिष्ठया परुषमभिहिता सञ्जातखेदा च पित्रे न्यवेदयत्। शुक्रोऽपि तच्छ्रुत्वा[2] सञ्जातामर्षस्तद्राष्ट्रादन्यत्र गच्छन्नसुरैः प्रसाद्यमानस्तानाह 'यद्यस्मद्दुहित्रे वृषपर्वा शर्मिष्ठां दासीत्वेन प्रयच्छति, तदा प्रतिनिवृत्तोऽहमिति। ततोऽसौ दुहितुः प्रदानेनाभवत् सुखीति।।22।।'

When Bhrigu's son was enraged in consequence of the fault of Sarmista -Vrishaparva's daughter, Vrishaparavan the lord of the Danavas made himself happy by giving her over to Sukra so that she may serve his daughter.

उपच्छन्द्यापि दातव्यं बलिने शान्तिमिच्छता।
समूलमेव[3] गान्धारिरप्रयच्छन् गतः क्षयम्।।23।।

---

[1] 'क्रुद्धे च भृ' क पाठः
[2] 'त्वा जा' ग घ पाठः
[3] 'एव' क पाठः

उपच्छन्द्य बलेनानिच्छतेऽपि। गान्धारिः दुर्योधनः। स हि वनवासाज्ञातवासौ यथासमयमुषित्वा स्वमंशं याचमानेभ्योऽपि पाण्डवेभ्योऽप्रयच्छन् समूलमेव ननाश॥23॥

One desirous of peace, even uninvited, should approach the powerful king, and give away things for pleasing' to him; the sons of Gandhari refusing to give to the Pandavas a portion of the kingdom met with complete devastation.

किञ्चित् प्रयच्छन् भूयस्या तृष्णया[1] विप्रलोभयन्।
भिन्द्याच्चतुर्विधान् भेद्यान् प्रविश्योभयवेतनैः।।24।।

अष्टादशभिः श्लोकैर्भेदप्रयोगमाह– किञ्चिदित्यादि। प्रयच्छन् तदात्वे। तृष्णया आगामिन्या। भेदसौकर्यार्थमत्र मात्रया दानप्रयोगः[2]। चतुर्विधान् भेद्यान् क्रुद्धलुब्धभीतमानिनः कृत्यान्। प्रविश्योभयवेतनैः द्वारभूतैः॥24॥

Alluring, by mighty hopes, but fulfilling little of them, a king should dissuade over the four kinds of alienable parties, knowing them through spies.

अलब्धवेतनो लुब्धो मानी चाप्यवमानितः।
क्रुद्धश्च कोपितोऽकस्मात् तथा भीतश्च[3] भीषितः।।25।।

अलब्धवेतनः नन्वत्र विमानितो मानी क्रुद्धवर्गे भवति। सत्यम्। आशुभेदप्रतिपत्त्यर्थं विशेषणम्। एवञ्चालब्धवेतनो लुब्धः, क्रुद्धश्च कोपितः, भीतश्च भीषितः इत्यपि विशेषणमर्थवत्॥25॥

The greedy who have been deprived of their dues, the honorable persons who have been dishonored, the irritable persons who have been angered, and those who have been extremely abused,

यथाभिलषितैः कामैर्भिन्द्यादेतांश्चतुर्विधान्।
परपक्षे स्वपक्षे च यथावत् प्रशमं नयेत्।।26।।

---

1. 'यातिप्र' ख-ग पाठः
2. 'नयो' ग-घ पाठः
3. 'रु' मूलकोशेषु पाठः

कामैर्भोगैर्भिन्द्यादेतान् परपक्ष इति सम्बन्धः। स्वपक्षे च यथावत् प्रशमं नयेत् सामादिभिरकृत्यतां नयेत्॥26॥

These are the four types of strange gatherings, who should be won over, each by the fulfillment of his particular desire. But to establish peace in his own party as well as in the party of the enemy—is a better procedure.

भेदं कुर्वीत यत्नेन मन्त्र्यमात्यपुरोधसाम्।
तेषु भिन्नेषु भिन्नं हि युवराजे तथोर्जिते।।27।।

अमात्यः कर्मसचिवः। स चात्राक्षपटलिको विज्ञेयः। ऊर्जिते लब्धप्रभावे॥27॥

With all efforts and carefulness a king should effect the isolation of the ministers, counselors, and priests, and when these have been isolated, the highly powerful princes should be tried.

अमात्यो युवराजश्च भुजावेतौ महीपतेः।
मन्त्री नेत्रं हि तद्भिन्न [2]एतस्मिन्नपि तद्वधः।।28।।

भुजावेतौ, ताभ्यां राज्यभारस्योह्यमानत्वात्। पुरोहितस्यामात्येऽन्तर्भावः। मन्त्री नेत्रं, तेन [3]सन्ध्यादिपदार्थस्यालोच्यमानत्वात्। तद्वधो महीपतिविनाशः॥28॥

The prime-minister and the crown prince are said to be the two arms of a lord of earth ; the former is also said to be the king's eye, —and the isolation of him cannot be compared to the isolation of anybody else.

सर्वावस्थं तु मेधावी तत्कुलीनं विकारयेत्।
विकृतस्तत्कुलीनस्तु स्वयोनिं ग्रसतेऽग्निवत्।।29।।

सर्वावस्थं क्षयलोभविरागप्राप्तम्। विकारयेत् संघर्षयेत्। अग्निवद्, अग्निर्ह्यरणिमेव नाशयति॥29॥

An intelligent king should with all endeavors try to isolate one of his rival king's family ; such a one when isolated

---

1. 'क' क पाठः
2. 'साध्या' क-ख पाठः

destroys his own dynasty like fire destroying the fuel which produces it.

तत्कुलीनेन तुल्यस्तु पुमानभ्यन्तरोषितः।
तस्मादेतौ परे भिन्द्याच्छमं चात्मनि सन्नयेत्।।30।।

तत्कुलीनेन तुल्यः [1]सर्वावस्थत्वात्। अभ्यन्तरोषितो विश्वासी। सोऽपि विकारितस्तत्कुलीनवद् ग्रसते। तस्मादेतौ परे भिन्द्यात्। शममात्मनि सन्नयेद्, विकृतौ प्रशमयेदित्यर्थः।।30।।

One highly disaffected at heart is equal to one of the rival king's family. Therefore a king should dissuade him over in any way and maintain peace and conciliation among his own ranks.

तत्रोपजापः कर्तव्यो यः कोपानुग्रहक्षमः।
स कल्याणः शठो वेति परीक्ष्यः सूक्ष्मया धिया।।31।।

कोपानुग्रहक्षम इति। कोपं कर्तुं शमयितुं च समर्थः। तत्र भेदः कार्यः। कल्याणः अविसंवादकः। शठस्तद्विपरीत इति।।31।।

Secret overtures should be made only to one who is capable, of doing good or bad. But with keen and scrutinizing intelligence it should be ascertained whether he is a straightforward or a pretender.

कल्याणस्तु यथाशक्ति करोति सफलं वचः।
शठः पक्षौ चलयति द्वावप्यर्थोपलिप्सया।।32।।

सफलं कार्यानुष्ठानेन। पक्षौ चलयति अरिपक्षं विजिगीषुपक्षं च। सञ्चाल्यार्थमादत्ते केवलं, न कार्यं घटयति।।32।।

A straight-forward person should try to fulfill his words to the best of his power. But a hypocrite, in consequence of his longing for wealth, would betray with gatherings.

पूर्वं[2] सम्भाषितोऽनीचः कालयापनमाश्रितः।
मिथ्याभिशस्तः श्रीकाम आहूयाप्रतिमानितः।।33।।

---

[1] 'वयवत्वा' ग-घ पाठः

[2] 'र्वसल्लाँपितो' क पाठः

क्रुद्धादीन् भेदयेदित्युक्तं, के क्रुद्धादय इत्याह– [1]पूर्वं संभाषित इत्यादि। इदं ते दास्यामीति पूर्वमाभाषितः। अनीचो महात्मा। स तस्मादलब्धार्थः। केवलं कालयापनमाश्रितः, नात्मयापनया। स तेन राज्ञा संश्रुत्यार्थाद्[2] विप्रलब्धस्तम्भै कुप्यति विसंवादकोऽयमिति। मिथ्याभिशस्त इदमनेन प्रतिषिद्धमाचरितमिति मिथ्यादूषितः [3]कुप्यति। श्रीकामो व्यवहारे विजयार्थी। स सम्यगहमेव ते व्यवहारं द्रक्ष्यामीत्याहूयाप्रतिमानितः पराजितः क्रुध्यति। एते त्रयः क्रुद्धवर्गे द्रष्टव्याः॥33॥

Commanders, mean-minded persons, those who serve the king only to pass the time, those who have been punished without reason, those who long for personal prosperity, those who are invited and then neglected or dishonored,

राजद्वेषी तत्कुलीनो द्विष्यते यश्च भूभुजा।
आहितव्यवहारश्च तथा कारनिवेशितः॥34॥

राजद्वेषी [4]स्वचित्तदोषादेव। स राज्ञो भीत[5] इवास्ते। तत्कुलीनः राज्याभिलाषी। तस्माच्छङ्कावश्यमेव। द्विष्यते यश्च भूभुजेति। राजदोषाद् दौर्भाग्याद्वा। स कथं द्वेष्योऽहमिति ततः[6] शङ्कित एव तिष्ठति। एते त्रयो भीतवर्गे। आहितव्यवहारः सर्वत्रैव निवेशितसंव्यवहारः। स बहूनां धारकस्तद्वित्तग्रहणार्थ लुभ्यतीत्ययं लुब्धवर्गे। कारनिवेशितः, कारो दण्डः, तत्र गुरुतरे नियुक्तः त्वयेदमाशु[7] नेयमिति। स तस्मै कुप्यन् क्रुद्धवर्गे द्रष्टव्यः॥34॥

One of the king's own family who is jealous or hostile to him, he that is found fault with by the king, those who have given up their business, and those on whom heavy taxes have been levied,

---

[1] 'र्वसल्लाँपित' क-ख पाठः
[2] 'र्थं वि' ग-घ पाठः
[3] 'क्रुध्यति' ग-घ पाठः
[4] 'स्वनिमित्त' ग-घ पाठः
[5] 'षित एवा' ग-घ पाठः
[6] 'त्र' ग-घ-घ पाठः
[7] 'पन्ने' ग-घ पाठः

रणप्रियः साहसिक आत्मसम्भावितस्तथा।
विच्छिन्नधर्मकामार्थः क्रुद्धो मानी विमानितः।।35।।

रणप्रियः स्वत एव मानी भवति। साहसिकः अविमृश्य यः सहसाचरति। स मानाधिक्यात् [1]कार्याकार्यानपेक्षी। आत्मसंभावितः विद्याभिजनादिभिः कोऽन्योऽस्मदधिक इति। एते त्रयो मानिवर्गे। विच्छिन्नधर्मकामार्थः। धर्मादीनामर्थसाध्यत्वात् तदर्थं लुभ्यतीत्ययं लुब्धवर्गे। क्रुद्धस्तीक्ष्णः, योऽहङ्कारमपि न सहते। स मानिवर्गे। मानी च विमानितः क्रुद्धवर्गे।।35।।

Those who love to fight, those who are rashly bold, those who are self-conceited, those who are severed from virtue, wealth and desire, those who are of passionate nature, the honorable persons who have been dishonored,

भीतः स्वदोषवित्रस्तः कृतवैरोऽतिसान्त्वितः[2]।
अतुल्येन [3]सहासक्तस्तुल्यमानान्निराकृतः[4]।।36।।

भीतो राज्ञः प्रचण्डात्। स्वदोषवित्रस्त आत्मदुश्चरितेन शङ्कितः। कण्टकान् मर्दयिष्यामीति राजकीयं दण्डं याचित्वान्यान्[5] हतवान्। स स्वयमुपहतत्वाद् भीत एव तिष्ठति। कृतवैरः सान्त्वितः। स हि पूर्वकृतवैरात् ततोऽपकारमुत्प्रेक्षमाणो भीत एवास्ते। एते त्रयो भीतवर्गे। अतुल्येन सहासक्तः नीचेन सह कर्मसु नियुक्तः। स नीचेनोपहतत्वान्नष्टोत्कर्षमात्मानं मन्यमानो मानिवर्गे द्रष्टव्यः। तुल्यमानादन्तस्मात् समानजातीयान्निराकृतः कृतहीनमानो राज्ञे कुयति विषप्रवृत्तोऽयमिति। अयं क्रुद्धवर्गे।।36।।

Those who are cowards, those who live in constant fear of being punished for their offences, those who have created enemies through want of kind treatment, those who love the company of those inferior to them, and who drive away their equals.

---

[1] 'र्यान' क-ख पाठः
[2] 'शङ्कित' क पाठः
[3] 'महाशक्त' क पाठः
[4] 'नो नि' क पाठः
[5] 'त्वाहैत' ग-घ पाठः

अकारणनिरुद्धश्च[1] कारणाश्च विशेषतः।
अकारणात् परित्यक्तः पूजार्होऽप्रतिपूजितः।।37।।

अकारणनिरुद्ध इति शिल्पात् स्वामिना यो[2] बद्धः, कारणाच्च तद्दोषद्विशेषतोऽत्यन्तं निरुद्धः। स बन्धनपरिक्लिष्टस्तस्मै कुप्यति। एवमकारणात् परित्यक्तो निर्वासितः। तदुभयं क्रुद्धवर्गे। पूजार्होऽप्रतिपूजितः मानिवर्गे क्रुद्धवर्गे वा।।37।।

Those who are imprisoned without cause and who have been specially favored for some reason or other, those who have been detained without reason, those worthy and worshipful persons who are disregarded.

हृतद्रव्यकलत्रश्च महाभोगाभिकाङ्क्षितः।
परिक्षीणो बहिर्बन्धुर्बहिर्द्रव्यो बहिष्कृतः।।38।।

हृतद्रव्यकलत्र इति। गृहीतं तु बहुद्रव्यं [3]यस्याल्पस्वच्छचेतसोऽत्यन्तस्वल्पया[4] यात्रया पूर्वराशिमादातुकामो दत्ततृष्णावकाशो लुब्धवर्गे। प्रसभाद्[5] भुक्तकलत्रश्च क्रुद्धवर्गे। महाभोगामिकाङ्क्षितः [6]भोगेनासन्तुष्टोऽभिवर्धमानो महाभोगस्याभिकाङ्क्षिता मानिवर्गे। परिक्षीणः परितो युग्याद्यपचयाद् दुर्भिभादेश्च कारणात् प्राप्तक्षयो लुभ्यन् लुब्धवर्गे। बहिबन्धुः प्रवासितबन्धुः [7]घातितोऽनेन मे बन्धुरिति। बहिद्रव्यो दाषितसर्वस्वः। स सर्वस्वमाहारितत्वात् छन्नतृष्णाबीज कुप्यति। तदुभयं क्रुद्धवर्गे। बहिष्कृतः पापेन कर्मणा। सोऽसत्कर्माभिख्यातो भीत एवास्ते किमयं करिष्यतीति। अयं भीतवर्गे।।38।।

Those whose family and possessions have been appropriated, those who are inflamed by a strong desire for enjoyment, those who have been ruined, those who are friends

---

1. 'णाद्विरु' क-ग पाठः
2. 'योऽवब' क-ख पाठः
3. 'स्वच्छस्साऽत्य (?)' ग-घ पाठः
4. 'ल्पतया' ग-घ पाठः
5. 'भोपभु' ग-घ पाठः
6. 'न्तोषा हि व' क-ख पाठः
7. 'पा' क-ख पाठः

superficially, those whose belongings and possessions have been taken off and those who have been driven out.

इति भेद्याः समाख्याता भिन्द्यादेतान् [1]परे स्थितान्।
आगतान् पूजयेत् काभैर्निजांश्च प्रशमं नयेत्।।39।।

भिन्द्यादेतान् परे स्थितान् [2]मुण्डजटिलव्यञ्जनैः। तद्यथा–मदान्धो हरती मतेनाधिष्ठिता यद्यदासादयति तत्तत् प्रमृद्नाति, एवमयमशास्त्रचक्षुरन्धो राजा पौरजानपदानां वधायाम्युत्थितः। शक्यमग्य प्रतिन्तृप्रोत्साहनेनापर्कतुम्। अमर्षः क्रियतामिति क्रुद्धवर्गम्। यथा भीतः सर्पो यस्माद् भयं पश्यति, तत्र पुरा क्रोधावेषमुत्सृजति, एवमयं राजा जातदोषाशङ्कस्त्वयि[3] पुरा क्रोधविषमुत्सृजति। अयत्र गम्यतामिति भीतवर्गम्। यथा श्वगणिनां धेनुः श्वभ्यो दुग्धे न ब्राह्मणेभ्यः, एवमयं राजा सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नेभ्यो न दुग्धे न चात्मगुणसम्पन्नेभ्यः। असौ राजा पुरुषविशेषज्ञस्तत्र गम्यतामिति लुब्धवर्गम्। यथा चण्डालोदपानश्चण्डालानामेवोपभोग्यो नान्येषाम्, एवम् अय राजा नीचो नोचानामेवोपभोग्यः न त्वद्विधानामार्याणाम्। असौ राजा पुरुषविशेषज्ञस्तत्र गम्यत मिति मानिवर्गम्। कामैस्तदमिलषितैः। निजान् आत्मीयान्।।39।।

These are said to be the isolated parties. When any of these is found with the enemy, he should be dissuaded over. Those who come over to the king's side should be honored by the gift, those things they may desire to have; in this way also, a king should maintain unity and concord among his own partisans.

समतृष्णानुसन्धानमत्युग्रभयदर्शनम् ।
[4]प्रधानं दानमानं[5] च भेदोपायाः प्रकीर्तिताः।।40।।

जलवद् भिद्यादिति लेशतो भेद योपाय उक्तः। तमेव रपष्टमाह– समतृष्णानुसन्धानमिति अरयानुष्ठाने यथा मे लाभस्तथा तवापीति। अननुष्ठाने त्वमेव न भविष्यसीत्युग्रभयदर्शनम्। प्रधानम् उत्कृष्टम्।।40।।

---

1. 'बहिः स्थि' क पाठः
2. 'ण्डि' क-ख पाठः
3. 'यरत्व' क-ख
4. 'कामं दा' क पाठः
5. 'नौ' क पाठः

To find out what is sought-after by both the king and the isolated party, and to see what both fear and are fearful of, and chiefly by bribing or giving presents and honoring—these are said to be the means for achieving isolation.

भेदं कुर्वीत मतिमान् विगृहीतो बलीयसा।
शण्डामर्कौ [1]सुरैर्भित्त्वा बलवन्तौ पराजितौ।।41।।

भेदव्याख्यानकं दर्शयितुमाह– भेदमिति। शण्डामर्कौ सुन्दोपसुन्दौ सोदर्यौ [2]सुरैर्भित्त्वा पराजितौ तिलोत्तमां प्रणिधाय।।41।।

An intelligent king Confronted by a powerful enemy, should try to effect isolation among the former's party. The powerful Sanda and Amarka, alienated from each other,were defeated by the gods.

दण्डेन हि समाहन्याद् भित्त्वारेः संहतं बलम्।
भिन्नं हि तत् काष्ठमिव घुणजग्धं विशीर्यते।।42।।

दण्डप्रयोगं श्लोकत्रयेणाह– दण्डेनेत्यादि। समाहन्यादिति। अरिबलं भित्त्वा पश्चाच्चतुरङ्गेण बलेन प्रकाशवधं कुर्यादित्यर्थः।।42।।

Causing disunion in the united army of the enemy, a king should defeat it by open attack. Disunited, it is destroyed like a piece of wood which is set fire by dried grass.

उत्साहदेशकालैस्तु संयुक्तः सुसहायवान्।
युधिष्ठिर इवात्यर्थं दण्डेनास्तं नयेदरीन्।।43।।

अभित्त्वाप्यभ्युच्चितः प्रकाशं हन्यादित्याह–उत्साहेत्यादि। उत्साहो विक्रमबलम्। सुसहायवान् सामवायिकाभ्युच्चितः। युधिष्ठिरो हि भ्रातृणां दिव्यास्त्रसंयोगादुत्साहशक्तिं समुद्वीक्ष्य देशकालौ सहायसम्पदश्च सप्ताक्षौहिणीसमवायी विग्रहेण सपत्नानवधीत्।।43।।

Supported by faithful allies and favored by the advantages of the soil and the season, and inflamed with energy, a king

---

1. 'हिं' क पाठः
2. 'हैं' ग-घ पाठः

should drive his enemy to destruction by open attack, even like king Yudhisthira himself.

आत्मनः शक्तिमुद्वीक्ष्य [1]दण्डमभ्यधिके नयेत्।
एकाकी शक्तिसम्पन्नो रामः [2]क्षत्रं पुरावधीत्।।44।।

सामवायिकाभावेऽप्येकाकी [3]पराक्रमशक्त्याधिक्यमवेक्ष्य विगृह्णीयादित्याह– आत्मन इति। अधिकेऽपि ज्यायस्यपि। रामः पितृवधामर्षितो निश्शेषं क्षत्र मवधीत्।।44।।

Reviewing the measure of his own strength, a king should regulate his attacks and lead his army to battle. Earlier, Rama possessed of strength and energy, slew the Kshatriyas single handedly.

अलसं विक्रमश्रान्तं विहतोपायचेष्टितम्।
क्षयव्ययप्रवासैश्च [4]श्रमेण[5] विपरिद्रुतम्।।45।।

सामादीनां विपयभेदेनैकद्वित्रिचतुर्योगात् तद्भेदानष्टादशभिः श्लोकैराह– अलसमित्यादि। विक्रमेण श्रान्तं खिन्नम्। विहतोपायचेष्टितं निष्फलसामादिप्रयोगम्। क्षयव्ययावुक्तलक्षणौ। विपरिद्रुतं विक्षिप्तसैन्यम्।।45।।

Those who are idle, those who have lost all power those who have fatigued of their efforts in an undertaking, those who are suffering from extensive destruction and loss, those who are routed.

भीरुं[6] मूर्खं स्त्रियं बालं धार्मिकं दुर्जनं पशुम्।
मैत्रीप्रधानं कल्याणबुद्धिं सान्त्वेन साधयेत्।।46।।

मूर्खमशास्त्रचक्षुषम्। बालमप्राप्तव्यवहारम्। दुर्जनमयुक्तकारिणम्। पशुं लोकव्यवहारबाह्यम्। मैत्रीप्रधानं सख्यैकनिष्ठम्। कल्याणबुद्धिमविसंवादकम्।।46।।

---

1. 'भ्य' मूलकोशेषु पाठः
2. 'क्षा' क पाठः
3. 'विक्र' क-ख पाठः
4. 'सन्तप्तं परिपीडितम्' क पाठः
5. 'णापि प' मूलकोशेषु पाठः
6. 'तं' क पाठः

And cowards, fools, women, boys, virtuous men, and wicked and brute-like persons, as also those of a friendly nature and of a peaceful turn of mind—these should be won over by peacemaking methods.

लुब्धं क्षीणं च दानेन सत्कृत्य[1] वशमानयेत्।
अन्योन्यशङ्कयाभिन्नान् दुष्टान् वै दण्डदर्शनात्।।47।।

लुब्धं क्षीणं चेति। ननु च परिक्षीणो लुब्धवर्गे पठितः। सत्यम्। लोभातिशयख्यापनार्थं पृथङ्निर्दिष्टः स इति। अन्योन्यशङ्कयाभिन्नानिति। परस्परशङ्काज (नन? ननेना) भिन्नान् संहतान् वशमानयेदिति संबन्धः। दुष्टान् दण्डस्य दर्शनाद् विकृतान् दण्डेन वशमानयेत्। एते एकयोगाश्चत्वारः।।47।।

The greedy and the poor should be brought under subjugation by being honored with gifts, so also those wicked ones who are disunited being afraid of one another and through fear of, the punishments inflicted on them.

पुत्रान् भ्रातॄंश्च बन्धूंश्च साम्नार्थेन[2] च साधयेत्।
एतैः कः सदृशो लोके दूरं विप्रकृतैरपि।।48।।

साम्नार्थेन चेति। पुत्रादीनां मानित्वाद् भोगादिकाङ्क्षित्वाच्च सामदानाभ्यां साधनं, न तु दण्डेनेत्याह– एतैरित्यादि। अनेन 'कर्कटकसधर्माणो हि राजपुत्रा जनकं[3] भक्षयन्ति। तेषामजातस्नेहे पितर्युपांशुदण्डः श्रेयानिति भरद्वाज' (कौटि० अर्थ० 1.17.13) इत्येतन्निवर्तयति। विप्रकृतैरपि राजापथ्यकारिभिरपि।।48।।

Sons, brothers, and friends, should be won over by persuasive words, like , who can be equal to them, although they may be made distant by the enemy?

सामैतेषु प्रयुञ्जीत दैवात् प्रस्खलितेष्वपि।
दुष्करां यान्ति विकृतिमार्याः शीलनिबन्धनाः।।49।।

---

[1] 'त्यैव समा' क पाठः
[2] 'न तु' क पाठः, 'नैवा सा' ख-ग पाठः
[3] 'आर्यास्तांस्तु प्रच' क पाठः

तस्मात् सामदानाभ्यामेव साधयेदित्याह– सामैतेष्विति। दानसहितमिति शेषः। दैवादनयलक्षणात् प्रस्खलितेषु, अपिशब्दान्मानुषतोऽप्यनयात्[1]। विकृतिं पुत्रादिषु नृशंसताम्।।49।।

If by chance these fall off from their loyalty, conciliation should be employed against them. Indeed, sometimes they are eternally destroyed through pride and arrogance.

कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता।
अलोभ इति येष्वेत [2]तानार्यान् परिचक्षते।।50।।

कुलादयो गुणा व्याख्यातप्रायाः।।50।।

They in whom nobility of birth, good conduct, charity, kindness, misfortune, truthfulness, gratefulness and harmlessness are to be found, are said to be Acharyas.

पौरान् जानपदांश्चैव दण्डमुख्यांश्च दण्डवित्।
साधयेद् दानभेदाभ्यां यथायोगेन चापरान्।।51।।

पौराः दुर्गनिवासिनः। दण्डमुख्याः सेनानापकादयः। तान् साधयेद् दानभेदभ्याम्, अन्यथा हि ते लोभात् परोपजापं लिप्सन्ते। संहताश्चावश्या भवन्ति। दण्डमुख्याश्च[3] दण्डमुपहन्युरिति दण्डविद्ग्रहणम्।।51।।

A king conversant with the policy of gift and isolation and knowing the ways of inflicting punishment, should win over the people and the leaders of the army by gift and isolation.

अवरुद्धांस्तत्कुलीनान् सामन्तांश्च विचक्षणः।
साधयेद् भेददण्डाभ्यां यथायोगेन चापरान्।।52।।

अवरुद्धा निर्वासिताः। तत्कुलीनाः पुत्रभ्रातृव्यतिरेकेण। सामन्ता अवलवन्तो राजानः। तान् साधयेद् भेददण्डाभ्याम्, अन्यथा हि ते संहता दण्डेन चानुपतप्ताः

---

1. 'कभक्षाः ते' क-ख पाठः
2. 'प्यपन' क-ख पाठः
3. 'श्च तथाद' ग-घ पाठः

पुनरपकुर्वन्ति। एते द्वियोगास्त्रय उक्ता:। यथायोगेन चापरानिति। यो यस्य योग: असौ यथायोग: तेनायान् साधयेत्। अलसं संहतबलं सामभेदाभ्याम्। लुब्धं दुष्टं दानदण्डाभ्याम् अलसं दुष्टं सामदण्डाभ्याम् इत्यपरे द्वियोगादय: पूर्वैश्च त्रिभि: षड भवन्ति। अलसं लुब्धं संहतबलं सामदानभेदै:। लुब्धं संहतबलं दुष्टं दानभेददण्डै:। संहतबलं दुष्टमलसं भेददण्डसामभि:। दुष्टमलसं लुब्धं दण्डसामदानैरिति त्रियोगाश्चत्वार:। अलसं लुब्धं संहतबलं दुष्टं सामदानभेददण्डैरिति चतुर्योग एक:। एवं समुदायेन पञ्चदशयोगा:। उक्तं हि "तेषामेकयोगाश्चत्वार:, द्विगोगाश्च षट्। त्रियोगाश्चत्वार: एकश्चतुर्योग इति पञ्चदशयोगा अनुलोमास्तावन्त: प्रतिलोमा:" (कौटि० अर्थ० 9.7.146) इति॥52॥

Offended friends should be reconciled by honoring and gifts and kind words ; others should be won over by the proper employment of the policy of estrangement or enticement or gift.

[1] देवताप्रतिमास्तम्भसुषिरान्तर्गता नरा:।
पुमान् स्त्रीवस्त्रसंवीतो निशि चाद्भुतदर्शन:[2] ॥53॥

मायादीनां स्वरूपभेदं नवभि: श्लोकैराह–देवतेत्यादि। देवताया: प्रतिमास्तम्भाश्चोत्कीर्णदेवता अन्त: पिरास्तन्मध्यगतैर्नरैर्गित्यपूजया च सान्निध्यख्यापनार्थमुपलक्षिता: स्यु:। ततो हि ते निर्गत्य शत्रुमुपगतं[3] हन्यु:। स्त्रीवस्त्रसंवीत: स्त्रीवेषधारी शत्रुमतिसन्धत्ते वा। निशि चाद्भुतदर्शन:[4] शत्रुविजयख्यापनार्थम्॥53॥

Men hidden inside the images of gods, pillars, and holes, men dressed in the clothes of women, and assuming terrible appearances at night and appearing in the appearance of Pisachas or demons, and gods,—in this way do persons practice the policy of deceit and this is known as Maya.

वेतालोल्कापिशाचानां शिलानां च सरूपता।
इत्यादिमाया विज्ञेया मानुषी मानुषेश्वरै: ॥54॥

---

1. 'पूजयान्तर्गतैनरै:' ख-ग पाठ:
2. 'नम्' क पाठ:
3. 'हि' क-ख पाठ:
4. 'नम्' ग-घ पाठ:

तच्चादुतं वेतालादीनां सरूपता॥54॥

To assume different appearances at will, to shower down weapons, iron balls and water, and to be hidden in darkness, these also are the pretenses practiced by men.

कामतो रूपधारित्वं [1]शस्त्रास्त्राश्माम्बुवर्षणम्।
तमोऽनिलोऽचलो मेघा[2] इति माया [3]ह्यमानुषी॥55॥

कामतो रूपधारित्वम् इच्छया देहस्य रूपान्तरधारणम्। अमानुषी दिव्या माया॥55॥

Bhima killed Kichaka by being disguised as a woman. The god of fire also remained hidden for a long time by practicing divine maya.

जघान कीचकं भीम आश्रितः स्त्रीसरूपताम्।
चिरं प्रच्छन्नरूपोऽभूद् दिव्यया मायया नलः॥56॥

द्वयस्य साफल्यमाह– जघानेति कीचको द्रौपदीं जिहीर्षुर्गान्धर्वशालायां तत्कृतसङ्केतोऽभिसृतवान्। पूर्वस्थितेन तत्र तद्वेषधारिणा भीमसेनेन[4] हत [5]इति प्रसिद्धमेव। प्रच्छन्नरूपो नल इति। स हि द्यूतेन हारितराज्यो वने भार्यां त्यक्त्वा कर्पटार्धसंवीतः परिभ्रमन् [6]दवाग्निपरीतेनाजगरेणाधाव मामापद्यस्व अहं च ते प्रत्युषकरिष्यामीति प्रार्थितत्वं दवाग्नेर्नोचयित्वा तद्वचनेन स्वपदानि गणयन् प्रस्थितो दशमे पदे दशेति ब्रुवाण एव तेनादश्यत। तद्दष्टमात्रश्च सद्यो विकृताकृतिरप्रत्यभिज्ञेयो भूत्वा किमेतदिति पृष्टवान्। ततः सोऽजगरेण शुक्लपंशुकं दत्त्वोक्तः एवं विकृतेनानेन रूपेणाच्छन्नोऽप्रत्यभिज्ञायमानः कञ्चित्कालं चरित्वा यदा कलिप्रवेशान्मुक्तः स्वजनभार्यासमेतो भविष्यति तदाशुकयुगलं परिधान लब्धस्वरूपः स्वमेव राज्यं प्रतिपद्य शत्रुं च विजित्य सुखी भविष्यसीति। ततः स दिव्यमायया प्रच्छन्नरूपः

---

1. 'स्त्राग्न्यश्मा' ख पाठः
2. 'घ' क पाठः
3. 'ष्य' क पाठः
4. 'न निह' ग-घ पाठः
5. 'इत्यति' ग-घ पाठः
6. 'रिवीत' ग-घ पाठः

ऋतुपर्णस्य राज्ञो गृहे सूदकर्मणा वसन् दमयन्त्या परिज्ञातः स्वयंवरव्याजात् सहर्तुपर्णेन विदर्भपुरमानीयमानो मध्येमार्गं कलिना विमुक्तस्तया समेतस्तत्पित्रा विदर्भराजेन सह दमयन्त्या स्वमेव राज्यं प्रापितस्तत्रैव सुखं न्यवसदिति॥56॥

Not to prevent one from wrong, from war and from danger—these are said to the the three kinds of Upeksha or diplomatic neglect, by those who are conversant with his nature and use.

अन्याये व्यसने युद्धे प्रवृत्तस्यानिवारणम्।
[1]इत्युपेक्षार्थकुशलैरुपेक्षा[2] त्रिविधा [3]स्मृता॥57॥

अन्याये अदण्ड्यदण्डनादौ। व्यसने मृगयादौ। युद्धे ज्यायसा सह॥57॥

Upeksa according to experts is of three kinds, viz to show obvious neglect to wrong doers to those habituated to vyasanas and to those indulging in warfare.

अकार्ये सज्जमानस्तु विषयान्धीकृतेक्षणः।
कीचकस्तु विराटेन हन्यतामित्युपेक्षितः॥58॥

अन्याये अदण्ड्यदण्डनादौ व्यसने मृगयादौ। युद्धे ज्यायसा सह॥ कीचको विराटेनेति। स हि शौर्याद् राजवाल्लभ्यादन्याये व्यसने च प्रवृत्तो भीमसेनेन हन्यतामिति मत्स्यराजेनोपेक्षितः। तथा च महाभारते श्लोकः–

"शौर्यादिवल्लभो राज्ञो महासत्त्वश्च कीचकः।
आसीत् प्रहर्ता च नृणां नामशेषः[4] सुदुर्मतिः"॥

इति॥58॥

Intent on the performance of a misdeed and blinded by lust, Kichaka was neglected by Virata and allowed to be killed by Bhima.

---

[1] 'तु' क पाठः
[2] 'क्षास्त्रि' क पाठः
[3] 'म' क पाठः
[4] 'षश्च दुर्म' ग-घ पाठः

संरब्धो भीमसेनेन स्वार्थविच्छेदभीतया।
हिडिम्बया निजो भ्राता हन्यतामित्युपेक्षितः।।59।।

स्वार्थविच्छेदभीतयेति। हिडिम्बस्य रक्षसो वनमुपगतेषु पाण्डवेषु तद्भगिनी हिडिम्बा भीमसेनं दृष्ट्वा दोलाव्यतिकरात् सञ्जातरागा स्वयं पाणिमग्राहयत्। तद्भ्राता च क्रुद्धो युयुत्सुर्भीमसेनेन हन्यतामित्यनयोपेक्षितो मा भूदनेन संप्रयोगविच्छेदो ममेति।।59।।

Afraid of the unfulfilment of her own desire, Hidimba, although seeing Bhimasena ready for the combat, allowed her own brother to be killed and thus neglected him.

मेघान्धकारवृष्ट्यग्निपर्वताद्भुतदर्शनम्।
दूरस्थानां च सैन्यानां दर्शनं ध्वजमालिनाम्।।60।।

सैन्यानां हस्त्यश्वरथपदातीनाम्।।60।।

The exhibition of clouds, darkness, rain, fire, mountain and other strange shapes and of troops which are at a distance marching with flowing banners,

छिन्नपाटितभिन्नानां[1] संस्रुतानां प्रदर्शनम्।
इतीन्द्रजालं द्विषतां भीत्यर्थमुपकल्पयेत्[2]।।61।।

संस्रुतानां क्षरद्रुधिराणाम्। एते त्रय उपायाः सामादिचतुष्टय एवान्तर्भूताः। तत्र माया दण्डेऽन्तर्भूता। तस्य हि प्रकाशोपांशुत्वभेदेन द्वैविध्यात्। उपेक्षापि दण्ड एव, यस्माद् येषूपांशु प्रशस्यते तत्रोपेक्षा। तत्र च दण्डं स्वयं प्रवर्तयतोऽपरेण प्रवर्तनात्। इन्द्रजालमपि संहतबलस्य शत्रोर्भीत्यर्थं कल्पते। तच्च[3] शङ्काजननाद् भेदेऽन्तर्भूतम्।।61।।

And the exhibition of cut off, severed and slaughtered troops, and of highly efficient armies—all these manners of illusion should be resorted for inspiring terror into the enemy's horde.

---

1. 'मामसृजां चापि द' ख-ग पाठः
2. 'नां संहतानां प्र' क पाठः
3. 'त्र' ग-घ पाठः

इत्युपायाः समाख्याता नाना नानार्थसाधकाः।
साम हेतु हि कालज्ञो यथाकालं प्रयोजयेत्।।62।।

नाना भिन्नस्वरूपाः। नानार्थसाधका इति। ततोऽलसादीनां साधकं साम, लुब्धस्य दानं, संहतबलस्य भेदः, दुष्टस्य दण्ड इति। एतेषु च सामदानयोरधिको व्यापार इत्याह– सामेत्यादि। यथाकालमिति दानकाले साम प्रयोजयेद्, दानमपि सामकाले भेदकाले च।।62।।

These are said to be the expedients that serve various purposes of the kings; of these, a king conversant with the nature of pacification, should employ it whenever it pleases him.

सामभेदौ तु[1] कर्तव्यौ [2]दानमानपुरस्सरौ।
दानेन हि समायुक्तावेतावप्यर्थसिद्धये।।63।।

यदाह– दानमानपुरस्सराविति।।63।।

At first the policy of gift or bribery should be employed and then appeasement and isolation. But these latter two when united with the former, are sure to bring about success.

दानरिक्तेन सर्वत्र साम्ना कृत्यं तृणेन वा।
निर्दानं साम नायाति कलत्रेष्वपि संस्थितिम्।।64।।

कृत्यं प्रयोजनम्। तृणेन वा वाशब्दश्चार्थे। इवार्थे वा। तत्साध्यं तृणेनेव करणीयं, दानरिक्तस्य साम्नो लघुत्वात्।।64।।

The policy of isolation without the support of the policy of gift occasionally brings success in an undertaking. Pacification without the help of gift cannot produce the desired effect even when it is employed against one's own wife.

इति ह्युपायान् निपुणं नयज्ञो विनिक्षिपेच्छत्रुबले निजे च।
निरभ्युपायो नियतं प्रपातं विचेष्टमानोऽन्ध इवाभ्युपैति।।65।।

---

[1] 'दर्शयेत्' ख पाठः

[2] 'साधुदानपु' क-घ पाठः

प्रकरणार्थमुपसंहरति श्लोकद्वयेन– नयज्ञः उपायप्रयोगज्ञ:। निजे आत्मीये बले। प्रपातं विनाशम्।।65।।

These expedients, a king conversant with the science of polity, should skillfully bring to bear against the enemy's troops or in his own forces. A king exerting without employing these expedients, proceeds towards his end like a blind man.

Prosperity is sure to come into the possession of those wise kings who employ these expedients; may it be wavering every day. When properly managed with the help of these practical efforts of kings bear fruit.

अवश्यमायान्ति वशं विपश्चितामुपायसन्दंशबलेन सम्पदः।
भवत्युदारं विधिवत् प्रयोजिते फलं हि राज्ञां क्वचिदर्थसिद्धये।।66।।

उपाय एव सन्देशः तेनाकृष्यमाणत्वात्, तद्बलेन तत्सामर्थ्येन। उदारं महत्, फलमिति सम्बन्धः। विधिवत् प्रयोजित उपाये क्वचिदर्थसिद्धय इति सम्बन्धः।।66।।

A vijigisu well versed in the laws of polity should apply these expedients like an expert against the forces of his enemy and also for his own. Where one who does not follow these methods however he may exercise would fall down like a blind man.

Wealth is in variably assimilated by the wise rulers by applying the procedures of expidents.These methods when adopted in conformity with the rules prescribed yield magnificent results in fulfilling the anticipated ends of the king.

(इत्युपायविकल्पो नाम सप्तविंशं प्रकरणम्)

इति कामन्दकीयनीतिसारे उपायविकल्पो नामाष्टादशः सर्गः।

अथ ऊनविंश सर्गः (Canto – 19)

अष्टाविंश प्रकरणम्

सैन्यबलाबलप्रकरणम्

(Strength and weakness of the Army)

सामादीनामुपायानां त्रयाणां विफले नये।
[1]विनयेन्नयसम्पन्नो दण्डं दण्ड्येषु दण्डवित्।।1।।

चतुरङ्गबलं मुक्त्वा मन्त्रेण कोशेन च जयेदरीन्। तदसिद्धौ च दण्डं निक्षिपेदित्याह– सामादीनामित्यादि। विफले नये। प्रयोगो नयः। दण्डं दण्ड्येष्विति। तथाहि सामाद्यसाध्यत्वाद् दण्डार्हास्त इति।।1।।

If the three procedures of appeasement fail-reconciliation, gift and estrangement, a king acquainted with the principles of polity and the ways of punishing, should lead his army against those who deserve punishment.

देवानभ्यर्च्य विप्रांश्च [2]प्रशस्तग्रहतारकाः।
षड्विधं तु बलं व्यूह्य द्विषतोऽभिमुखं[3] व्रजेत्।।2।।

अत्र च चत्वारि प्रकरणानि सैन्यबलाबलं, सेनापतिप्रचारः, प्रयागे व्यसनरक्षणं, कूटयुद्धविकल्पाश्चेति। तत्र सैन्याधीनत्वाच्छत्रुबलवधस्य सैन्यबलाबलमुच्यते। बलाबलं चोपादानात् कालतश्च। तत्र सन्नाहतो नवभिः श्लोकैराह– देवानित्यादि। इष्टान् साङ्ग्रामिकांश्च देवानभ्यर्च्य विप्रांश्च दत्ताशिषो जयार्थम्। ग्रहा आदित्यादयः। तारका नक्षत्राणि। बलं व्यूह्य पूर्वपूर्वं सन्नाह्य, तथाविधस्य बलीयस्त्वात्।।2।।

---

1. 'यमुद्युक्तो द' क पाठः
2. 'सन्नग्र' क पाठः
3. 'हि मुखं नयेत्' क पाठः

Having venerated the gods and the twice-born Brahmans and with the planets and the stars shining propitious, a king should march towards the foe, with his six kinds of troops arrayed in due order.

मौलं भृतं श्रेणि सुहृद्द्विषदाटविकं बलम्।
पूर्वंपूर्वं गरीयस्तु बलानां व्यसनं तथा।।3।।

मौलमित्यादि। व्यसनं तथेति। मौलानां गरीयस्त्वात् [1]तद्यसनमप्यमानित-विमानितादि गरीय:।।3।। ।

The Moula, the avaricious, the Sreni, the associated, those belonging to the enemy dissuaded over and the forest tribes, these are the six kinds of forces; each preceding is of greater importance than each following; so also is their Vyasana.

सत्कारादनुरागाच्च सहसङ्कथनासनात्।
नित्यं तद्भावभावित्वान्मौलं भृतबलाद् गुरु।।4।।

सत्कारात् सम्मानात्। अनुरागाद् विजिगीषौ। विविक्ते विजिगीषुणा सह कार्यसङ्कथनात् सहासनाच्च सगन्धानाम्। नित्यग्रहणं प्रतिपदं योज्यम्। तद्भावभावित्वाच्च विजिगीषुणा सहैकार्थानर्थसम्बन्धाद्। एते धर्मा भृतबले न सन्ति।।4।।

For the respect and love for the king, for the fact of their helping in the removal of the dangers that may happen to him and for their being inspired with the same thoughts and sentiment, the Moula troops are more reliable than the avaricious.

सन्निकृष्टतया नित्यं क्षिप्रोत्थानतयापि च।
वृत्तेश्च स्वाम्यधीनत्वाद् भृतं श्रेणिबलाद् गुरु।।5।।

सन्निकृष्टतया विजिगीषोरासन्नचारितया भृतबलम्। श्रेणिबलं तु व्यवहितचारि। क्षिप्रोत्थानं स्वाम्यादेशमात्रापेक्षित्वाद्, नेतरत् परस्परापेक्षित्वात्। वृत्ति: स्वाम्यधीना, विजिगीषुणा तस्य ध्रियमाणत्वाद्, नेतरस्य, आत्मधारित्वात्।।5।।

---

1. 'प्यवमा' क-ख पाठ:

The greedy troops again are more reliable than the Sreni troops, for the former depend on the king for their livelihood,

तुल्यसङ्घर्षणामर्षात् सुखलाभात् तथैव च।
बलाज्जानपदत्वाच्च मैत्राच्छ्रेणिबलं गुरु।।6।।

तुल्यसङ्घर्षणामर्षादिति। स्वामिनास्य शत्रुषु तुल्यौ स्पर्धामर्षौ, तुल्यः सुखलाभः। बलाद् मैत्रादिति सम्बन्धः जानपदत्वाद् विजिगीषुदेशे जातत्वात्। विपरीतं मित्रबलम्।।6।।

The Sreni troops are again more reliable than the troops of the allies, for these latter do not enjoy a share of the king's victory, whereas the former .participate in his joy and grief, and moreover live in the same country with the king.

[1]असंख्यदेशकालत्वादेकार्थोपगमात् तथा।
[2]बलान्मेदनयोगाच्च शत्रोर्मित्रबलं गुरु।।7।।

असङ्ख्यदेशकालत्वादिति। एतावन्तं देशं यातव्यम् एतावन्तं च कालं स्थातव्यमिति परिमितदेशकालं शत्रुबलं, नैवं मित्रबलं, प्रबन्धस्रवत्वात्। एकार्थोपगमाद् विजिगीषुणा सहैककार्यप्रवर्तनात्। विपरीतमन्यत्। बलाच्छत्रोरिति सम्बन्धः। "बलान्मेदने" ति वा पाठः। मेदनं स्नेहः।।7।।

The associated troops again are more reliable than the troops of the enemy dissuaded over, in as much as the former pursue the same object with the king, and their country and time of action are known, whereas the latter often differ in opinion.

प्रकृत्याधार्मिका लुब्धा अनार्याः सत्यभेदिनः।
तस्मादारण्यकतया तेभ्यः शत्रुबलं गुरु।।8।।

लुब्धाः आटविकाः। अनार्याः स्वयमार्याः न भवन्ति, आर्याधिष्ठिता अपि न भवन्ति। आरण्यकतयेति। यस्मादाटविकानामेते दोषास्तस्मात् तेभ्यः शत्रुबलं गुरु तद्विपरीतत्वात्।।8।।

---

1. 'सङ्ख्यातदे' मूलकोशेषु पाठः
2. 'सस्नेहादभियो' ख पाठः

The low forest tribes, are by nature faithless, greedy, and sinful; for this reason, the weaned over troops of the enemy are better than they, who are wild and undisciplined.

उभयं तद् विलोपार्थं कालापेक्षं[1] व्यवस्थितम्।
विलोपेऽव्यसने[2] चैव तत्रास्य विजयो ध्रुवः।।9।।

उभयमिति अमित्रबलमाटविकबलं च। तदपरराष्ट्रं विलोपयिष्यामीति कालापेक्षया विलोपार्थं स्थितम्। तत्र विलोपे अव्यसने वा अस्य विजिगीषोः शत्रोर्जयो ध्रुवः। अन्यथा ह्यविलोपे व्यसने च ताभ्यामरिभयं स्यात्, परोपजापभयं च।।9।।

Both the forest tribes and the weaned over troops of the enemy, follow the king waiting for the moment when to accomplish his ruin ; so, when all chances of their causing any difficulty will be over,—victory is sure to embrace the king.

उपजापकृतात् तु स्याद् भयमस्माद् विशेषतः।
परस्य चाप्युपजपेदुपजापाद् ध्रुवो जयः।।10।।

तदाह– उपजापकृतादिति। परस्य चाप्युपजपेदिति तदुभयमपि।।10।।

A king has great cause of apprehension from these two (the forest-tribes and the weaned over troops of the enemy), for secret overtures may be directed towards them by the foe. From his own side also, a king should commence intriguing, for intrigue is ever sure to give victory.

स्फीतसारानुरक्तेन मौलेनोपचितः परः।
तत्तुल्येनैव यातव्यः क्षयव्ययसहिष्णुना।।11।।

उपादानकालतो बलाबलं त्रयोदशभिः श्लोकैराह– स्फीतेत्यादि। यदा प्रभूतसारानुरक्तमौलबलः प्रतियोद्धा, तदा तत्तुल्येनैव मौलबलेन यातव्यः।

---

1. 'क्षाव्य' क पाठः
2. 'ने वास्यत' ख पाठः

क्षयव्ययसहिष्णुनेति। यदा व्यायासेन योद्धव्यं, न मन्त्रेण, तदा क्षयसहिष्णुत्वाद् मौलमेव कर्मण्यम्॥11॥

An enemy highly powerful in magnitude of his being possessed of Moula troops swelling with energy and faithful in adherence should be encountered with the same kind of troops capable of enduring loss and destruction.

प्रकृष्टेऽध्वनि काले वा गच्छेन्मौलैः सुमानितैः।
मौलास्तु दीर्घकालत्वात् क्षयव्ययसहिष्णवः॥12॥

प्रकृष्टेऽध्वनि दूरे यातव्ये। काले दीर्घे प्रेषयितव्ये। गच्छेन्मौलैः, क्षयव्ययसहत्वात् तेषाम्। तत्सहत्वे कारणमाह– दीर्घकालत्वादिति। चिरन्तनत्वात्॥12॥

When the march would be long, or the campaign will be a protracted one, a king should proceed with the Moulas duly protected. The Moulas being of long standing are capable of bearing up against loss and destruction.

एषु वस्तुषु मेधावी भृतादीन विवर्जयेत्।
[1]दीर्घाध्वकालखिन्नेषु तेषु भेदभयं भवेत्॥13॥

भृतादीनि विवर्जयेत्, कस्मादित्याह– दीर्घाध्वकालखिन्नेष्विति। भेदभयं भवेत् परस्मात्॥13॥

In these matters -i.e. in protracted marches and campaigns and the like, an intelligent king should not depend much upon the avaricious and other kinds of troops; for when they are worn out with the toils of the protracted march or campaign, their isolation by the foe may be captured.

बहुत्वादेव[2] सैन्यानां दीर्घकालाच्च खेदतः।
नित्यप्रवासयानाभ्यां भेदोऽवश्यं हि जायते॥14॥

तदेव स्फुटयन्नाह– बहुत्वादित्यादि। अन्यसैन्यकालिकोपादानात् तेषां

---

[1] 'र्घकालाध्वखि' ख-ग पाठः

[2] 'द्रिपुसै' ख-ग पाठः

भृतादीनां बहुत्वाद् भेदोऽवश्यभावी। नित्यप्रवासो यातव्यं प्रति भूयोभूयो गमनम्। यानं शत्रुसम्बन्धि॥14॥

When the troops of the enemy are abundant, when the exhaustion and tiredness are extreme and prolonged, and when the army is always sent abroad and put to difficult tasks—its hostility by the enemy follows as a matter of progress.

प्रभूतं मे[1] भृतबलं मौलमल्पमसारवत्।
अरेरल्पं विरक्तं वा मौलं प्रायोऽल्पसारवत्।।15।।

मौलमल्पं तच्च मूलरक्षणेऽपर्याप्तम्, असारवत् फल्गुप्रायमिति भृतबलमादध्यात्। अरेरल्पं विरक्तं वा। प्रभूतमपि प्रायोऽल्पसारवद् असारबहुलम्। तत्र किं मौलेन॥15॥

A king is virtually powerless when his avaricious troops are plentiful, and Moula troops are small in number. So also, an enemy is powerless, when his Moula troops are small in number.

प्रायो मन्त्रेण योद्धव्यमल्पायासेन [2]चैव हि।
अल्पः[3] कालस्तु देशो वाप्रभूतौ च क्षयव्ययौ।।16।।

मन्त्रेण योगगूढोपजापादिना। अल्पायासेन व्यायामेन। अल्पो देशो यातव्यः कालो वाल्पः प्रोष्य वसितव्यः। अप्रभूतौ स्वल्पौ। पूर्वस्मिन् पादेऽकारः प्रश्लिष्टो द्रष्टव्यः॥16॥

Battles should be fought more often with the help of the power of advice of ministers—for then victory is obtained with little difficulty. When again the soil and the season are unfavorable, the destruction and loss becomes massive.

शान्तोपजापविश्वस्तमस्मत्सैन्यं[4] परस्य वा।
अल्पः प्रसारो[5] हन्तव्य [6]इत्युपेयाद् भृतैर्बलैः।।17।।

---

[1] 'चेद् भृ' ख-ग पाठः
[2] 'वेति हिं' क पाठः
[3] 'ल्पोद्देशस्तु कालो वा' क पाठः
[4] 'स्त सैन्यमस्तीति वा रिपोः' क पाठः
[5] 'चारो गन्त' ख-ग पाठः
[6] 'ति याया' ख ग पाठः

शान्तोपजापविश्वस्तमिति शान्तोपजापं विश्वस्तं वास्मत्सैन्यम्। तत्र किं मौलेन। परस्य वाल्प इति सम्बन्धः। प्रसारश्चेष्टा॥17॥

When the enemy's troops give up their efforts in the direction of isolation and become trustworthy, the avaricious troops confront them saying:—'They are of base metal and should be killed."

स्फीतं श्रेणिबलं शक्यमाधातुं यानवस्तुनोः।[1]
ह्रस्वौ प्रवासव्यायामाविति श्रेण्या समुत्पतेत्॥18॥

स्फीतं प्रभूतं श्रेणिबलं यानवस्तुनोः यात्रायां च स्थानीये च बहुत्वाच्छक्यमाधातुम्। प्रवासो ह्रस्वः कार्यलाघवादासन्नदेशत्वाद् वा, व्यायामोऽपि योद्धुमल्पः, प्रायो मन्त्रेण योद्धव्यम् इति॥18॥

Three kinds of troops viz., the forest-tribes, and the troops of the enemy dissuaded over and the Sreni may be induced to excessive drinking and thus rendered incapable of service. With his own troops who have been duly drilled and who have not stayed in foreign lands for a long time for then they would have been worn out, a king should fall upon the enemy.

प्रभूतं हि सुहृत्सैन्यं [2]शक्यमाधातुमात्मनि।
[3]अल्पप्रवासो मन्त्राच्च भूयो व्यायामयोधनम्॥19॥

शक्यमाधातुमात्मनि, यानवस्तुनीत्येव। अल्पः प्रवासः पूर्ववत्। मन्त्राच्च भूयो व्यायामयोधनं मन्त्रयुद्धाद् भूयो व्यायामयुद्धम्॥19॥

A king whose resources for battle are small may by his power of counsel make the similar troops like his own; and thus his strength may be increased.

मित्रसाधारणे कार्ये मित्रायत्ते फलोदये।
अनुग्राह्ये च पीड्ये च मित्रेणैव सह व्रजेत्॥20॥

---

[1] 'नि' क पाठः

[2] 'सम्यगाधा' क पाठः

[3] 'ल्पायासोपपन्नं च मन्त्रेणेति सुहृद्बलैः' ख-ग पाठः

मित्रसाधारण इति। यथा शत्रोरुच्छेदनं कर्शनं वा विजिगीषोः कार्यं, तथा मित्रस्यापि। मित्रायत्ते मित्रसाध्ये कर्शनादौ। अनुग्राह्ये यातव्यसिद्धौ तदर्धांशदानेन। पीड्ये[1] समुपचितत्वात्। तेन सह व्रजेत्।।20।।

Acts in which the king and the similar monarch are both equally interested, actions whose success depends on the friend, and actions in which compassion and cleverness are to be displayed, such actions should be undertaken in aggregation with the friend.

प्रभूतेनारिसैन्येन योधयेन्महतो रिपून्।
श्वसूकरवधापेक्षी नयं चण्डालवन्नयेत्।।21।।

असुहृत्सैन्येन प्रभूतेनेति। यदि प्रभूतं शत्रुबलं, तदानेन योधयेत्। श्वसूंकरवधापेक्षीति। श्वसूकरयोरिवारिबलयोः कलहे चण्डालस्येव मे योधकस्यान्यतरविपत्तौ सिद्धिरिति नयम् अन्योन्ययोधनाख्यं प्रयुञ्जीत।।21।।

Supported by a large host of the enemy's troops dissuaded over, a king should march against a powerful enemy. Then like a dog waiting to kill a boar, he should bring into action reconciliation or other kinds of policy.

अत्यूर्जितं [2]कोपभयादभ्याशे तु रिपोर्बलम्।
वासयेत् कर्शयेच्चैव दुर्गकण्टकमर्दनैः।।22।।

कोपभयादिति। अभ्युच्छ्रितं[3] हि शत्रुबल बाह्यं कोपं जनयति। तस्मात् तद्भयान्नित्यमासन्नं वासयेत्। तत्राभ्यन्तरकोपशङ्का[4] यदि स्याद् दुर्गकण्टकमर्दनैरिति। तत्र पथि दुर्गाणि यात्रोपघातकांश्च कण्टकान् मृद्नत् क्षीयते।।22।।

The troops of the enemy that have been dissuaded over should be employed in, and oppressed with the task of rooting

---

1. 'ड्येत स' ग-घ पाठः
2. 'बलाद' क. पाठः
3. 'च्छ्रि' क. ख. पाठः
4. 'पा' ग. घ. पाठः

out the thorns of the difficult paths ; for otherwise, there is danger of their being perversely annoyed.

नित्यमाटविकं सैन्यं दुर्गक्रण्टकशोधने।
परदेशप्रवेशे च पुरस्कुर्वीत पण्डितः।।23।।

दुर्गे मर्दनीये परदेशप्रवेशे चेति। यदि मार्गदेशिकं[1] परभूमियोग्यं च स्यात्।।23।।

The foresters also should be employed in similar tasks; and when entering into the territory of another, a learned king should always place them in the front.

एतन्मौलादिषड्भेदं चतुरङ्गं बलं विदुः।
षडङ्गं मन्त्रकोशाभ्यां पदात्यश्वरथद्विपैः।।24।।

प्रतिबलतो बलाबलमभिधित्सुराह– एतदित्यादि। चतुरङ्गबलं विदुः पदात्यश्वरथद्विपैः। षडङ्गं केचिन्मन्त्रकोशाभ्यां, तयोरपि प्रथमं युध्यमानत्वात्।।24।।

These are the six kinds of troops and these constitute a complete army together with the cavalry, infantry, car-warriors and elephants. Such an army supported by the power of counsel and a solvent treasury establishes a Sadanga vala or an army of six members.

इति षड्विधमेतद्धि यथायोगं बलं बली।
[2]सुनिश्छिद्रं प्रतिव्यूह्य यायात् [3]परबलं बली।।25।।

यथायोगमिति। एवंबलः परस्तस्यैतत् प्रतिबलमिति यथायोगं प्रतिव्यूह्य। सुनिश्छिद्रं बलं व्यसनाभावात् ।।25।।

A powerful monarch arranging these six kinds of troops without the least defect, should proceed to encounter an army stronger than his own.

---

1. 'गा' ग. घ. पाठः
2. 'श्चितं प्र' क. पाठः
3. 'प्रति' क. पाठः

योगमस्य विजानीयात् सर्वं[1] यन्त्रादिना नृपः।
कृताकृतं[2] प्रचारं च साधु सेनापतेस्तथा[3]।।26।।

बलस्य प्रतिव्यूहनयोगः सर्वो यन्त्रादिना ज्ञेय इत्याह– योगमस्येति। तथाचोक्तं "यन्त्रहस्तिशकटगर्भं कुन्तप्रासहाटकवेणुशरशल्यवद् हस्तिबलस्य प्रतिबलं, तदेव पाषाणलगुडावरणशल्याङ्कुशकचग्रहणीप्रायं रथबलस्य। तदेवाश्वानां प्रतिबलं, वर्मिणो हस्तिनोऽश्वा वा। कवचिनो रथाश्वावरणिनः पत्तयश्चतुरङ्गस्य प्रतिबलम्" (कौटि॰ अर्थ॰ 9.2.137) इति। कृताकृतं किमस्मिन् साङ्ग्रामिकमुपकरणं सम्पन्नं न वेति सम्यग् विजानीयात्। प्रचारं च सेनापतेः येन विज्ञातेन सैनापत्ये नियोजयेत्।।26।।

By his power of counsel,etc., a king should know his army's connections and he should also communicate himself of what his generals do or do not know.

कुलाद्गतं जानपदं मन्त्रज्ञं मन्त्रिसम्मतम्[4]।
दण्डनीतेः प्रयोक्तारमध्येतारं च तत्त्वतः।।27।।

सैन्यस्य सेनापत्यायत्तत्वात् तत्प्रचार उच्यतेऽष्टादशभिः श्लोकैः– कुलोद्गतमित्यादि। [5]एवलक्षणोपेतं कुर्वीत ध्वजिनीपतिमिति वक्ष्यमाणेन सम्बन्धः। अत्र लक्षणद्वारेणैतत्प्रचारो विज्ञेयः। कुलोद्गतो न व्यभिचरति। जानपदस्तत्रत्यत्वाद् विश्वास्यः। मन्त्रज्ञो[6] निर्णयकौशलात् कृच्छ्रेषु [7]प्रसाधनार्हः। मन्त्रिसम्मतः मन्त्रिभिः सह सम्भूय कार्यानुष्ठानसमर्थः। प्रयोक्ता तत्त्वतो दण्ड्येषु, तस्य स्वामिप्रकृतित्वात्। तथाहि "राजा युवराजः सेनापतिश्च स्वामिप्रकृतयः।" अध्येता वक्ता।।27।।

---

1. 'र्वयत्नादि' क पाठः
2. 'तप्र' क पाठः
3. 'दा' क पाठः
4. 'त्तमम्' ख-ग पाठः
5. 'णयुक्तं कु' ग-घ पाठः
6. 'न्त्रनयज्ञः' ग-घ पाठः
7. 'च्छत्रा' ग-घ पाठः

The king's own country the king's own subject, conversant with the rules of counsel and acting in conformity with them., a careful student of the science of Dandaniti and its administrator, he should be conversant with the principles of Dandaniti and eloquent Composition of them.

(इति सैन्यवलाबलमष्टाविंशं प्रकरणम्)

ऊनत्रिंशं प्रकरणम्

सेनापतिप्रचारप्रकरणम्
(Qualifications of Commander-in-Chief)

सत्यसत्त्वक्षमास्थैर्यमाधुर्यार्यगुणान्वितम्।
प्रभावोत्साहसम्पन्नमाजीव्यमनुजीविनाम्[1] ।।28।।

क्षमा आक्रोशादितितिक्षा क्वचित् कार्यकालापेक्षया, स्थैर्यं कर्मसु, माधुर्यं प्रियवादिता। सत्यादय एवार्यगुणाः। यत्तु "कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता। अद्रोह" (स० 18. श्लो० 49) इति प्रागुक्तास्तेषामत्रैवान्तर्भूतत्वान्न तद्ग्रहणम्। प्रभावोत्साहसम्पन्नमिति। शौर्याद्युत्साहगुणयुक्तोऽपि कश्चिदप्रतापः, प्रतापवत्त्वे सत्यप्यकृतोत्साहश्चाभिभूयते। उभयगुणस्तु सदैवाप्रधृष्यो भवति। अतश्च सहनिर्देशः। तयोरप्युत्साहस्यैव प्रधानत्वम्, इतरस्य तज्जन्यत्वात्। एवञ्च मत्वा तद्गुणानत्रैव निर्देक्ष्यति। आजीव्यं जीवनादिदानेन।।28।।

One possessed of the qualities of energy, heroism, forgiveness, patience, amiableness and richness, one gifted with power and manliness and ;who is depended upon by his followers for their support -i. e., one who has got followers and dependants,

मित्रवन्तमुदाराढ्यं बहुस्वजनबान्धवम्।
व्यवहारिणमक्षुद्रं पौरप्रकृतिसम्मतम्।।29।।

मित्रवन्तं बहुमित्रत्वात् परस्यानुच्छेद्यम्। तत्र बहुस्वजनबान्धवं बहुस्वजनबान्धवत्वाद्[2] दत्तबलम्। तत्र बाह्येन सम्बद्धः स्वजनः। आभ्यन्तरेण बान्धवः। उदाराढ्यं महत्त्वादेवाढ्यम्। व्यवहारिणम् [3]ऋणादानादिव्यवहारशीलं

---

[1] 'नः।' ख-ग पाठः
[2] 'द् आत्मबन्धः। त' ग-घ पाठः
[3] 'ण' कोशेषु पाठः

धर्मस्थबन्धुम्। अक्षुद्रम् अविग्रहशीलं सत्सङ्ग्रहशीलं च। पौरप्रकृतिसम्मतम्। उपलक्षणमेतद् जनपदप्रकृतेश्च सम्मतम् अनुद्वेजनात्॥29॥

One who has got numerous friends and whose relations and cognates are many, whose countenance reflects liberality, and who is large-hearted and a thoroughly practical man mixing freely with the people.

नित्याकारणवैराणामकर्तारमनाविलम्।
शुभानुबन्धिकर्माणमल्पामित्रं बहुश्रुतम्॥30॥

नित्यवैरं यन्निष्फलमानुबन्धिकम्, अकारणवैरं निर्हेतुकम्। अनाविलत्वम् अपैशुन्यम्। त्रितयमपि प्रकृतीरनुरञ्जयति। शुभानुबन्धिकर्माणमिति। कल्याणोदयं हि कर्मारभमाणः स्वपरेषां पूज्यः। अल्पामित्रम् अनुच्छेद्यम्। बहुश्रुतं बह्वागमम्। स हि कृच्छ्रेषु नावसीदति॥30॥

Who never cultivates other's ill-will or animosity without any reason, whose number of enemies is very limited and who is of pure character, and is a profound scholar of the Shastras,and acts according to the precepts,

अरोग्यं व्यायतं शूरं त्यागिनं कालवेदिनम्।
कल्याणाकृतिसम्पन्नं सत्सम्भाव्यपराक्रमम्॥31॥

अरोग्यं कर्मण्यम्। व्यायतं महाकायम्। स हि दृष्टमात्र एवाभिभवति। [1]शूरमित्युत्साहगुणः। त्यागिनं सर्वाभिगम्यम्। कालवेदिनं, स हि [2]कार्यं न हापयति। कल्याणाकृतिसम्पन्नं दर्शनीयत्वाल्लोकप्रियम्[3]। सत्सम्भाव्यपराक्रमं प्रकृष्टविक्रमैकदर्शनादन्योऽप्यसाधारणः सम्भाव्यते यस्य॥31॥

One who is healthy, stout, brave, forbearing and acquainted with the opportuneness of season, and is possessed of a noble appearance, and has full reliance on his own power,

---

1. 'मत्युत्साहगुणम्।' ग-घ पाठः
2. 'लं' क-ख पाठः
3. 'कस्य प्रि' ग घ पाठः

गजाश्वरथचर्यासु शिक्षितं सुजितश्रमम्।
खड्गयुद्धे नियुद्धे च शीघ्रचङ्क्रमणक्षमम।।32।।

चर्या [1]हस्त्यादिभिर्गमनम्। तत्र शिक्षितं कृताभ्यासम्। सुजितश्रमं कर्मस्वपरिभग्नम्। नियुद्धं मल्लयुद्धम्। शीघ्रचङ्क्मणक्षमं विद्युद्वल्लघुपरिक्रमण-योग्यम्।32।।

One who knows how to Mend horses and elephants, and repair chariots, and is inexorable, and skillful in fighting and dueling with swords, and can move with swiftness.

युद्धभूमिविभागज्ञं सिंहवद् दृढविक्रमम्।
अदीर्घसूत्रं निस्तन्द्रममर्षणमनुद्धतम्।।33।।

युद्धभूमयो हस्त्यादीनाम्। ताः स्वयमेव वक्ष्यति। दृढविक्रममिति। शौर्यात् सिद्धेऽपि पराक्रमे कस्यचिदस्थिरत्वादिति विक्रमो विशेष्यते। अदीर्घसूत्रं निस्तन्द्रं क्षिप्रकारिणमनलसं च। [2]अमर्षणं परिभवासहिष्णुम्। एते त्रय उत्साहगुणाः। अनुद्धतवषधारिणं सतामभिगम्यम्।।33।।

Who knows the divisions of the field of battle, and whose power remains unperceived till the time of action like that of the lion, and who is not delaying and is watchful, modest and self-controlled,

हस्त्यश्वरथशस्त्राणां सम्यग् लक्षणवेदिनम्।
नरान्तरविवेकज्ञं कृतज्ञमनुकम्पकम्।।34।।

लक्षणवेदिनं शुभाशुभानां हस्त्यादीनां प्राप्तिपरिहारार्थम्। नरान्तरविवेकज्ञं सत्यशौचशौर्यप्रज्ञादिभिः। कृतज्ञमनुकम्पकमिति। कृतज्ञत्वान्मुख्यपुरुषाणाम-भिगम्यम्।।34।।

Who knows the marks (good or bad) of horses, elephants, chariots, and weapons and is fully acquainted with the actions and movements of the spies and emissaries, and is grateful and conversant with all changes of actions,

---

1. 'हयादि' क-ख पाठः
2. 'र्षि' क-ख पाठः

धर्मकर्मसमायोगे कुशलं कुशलानुगम्।
सर्वयुद्धक्रियोपेतं शक्तं तत्परिकर्मणि।।35।।

वर्मकर्म सन्नहनकर्म, तत्समायोगे युद्धोपाये कुशलम्।[1] तत्कुशलैश्चानुगतम्। सर्वयुद्धक्रियोपेतं सर्वैरङ्गैरायुधैश्च योद्धुमभिज्ञम्। शक्तं युद्धपरिकर्मणि व्यूहरचनादौ।।35।।

One who observes all virtuous ceremonies and is expert and followed by expert dependents, who is expert in all modes of warfare and is competent to manage the army.

स्वभावचित्तज्ञतया युक्तमश्वनृदन्तिनाम्।
तन्नाम्नां चापि वेत्तारं तद्विधानोपपादकम्।।36।।

स्वभावचित्तज्ञतया युक्तं तदनुरूपप्रतिपत्त्यर्थम्। तत्राश्वादीनां सहजो धर्मः स्वभावः, आकस्मिकश्चाभिप्रायश्चित्तम्। तन्नाम्नां वेत्तारं यथाकार्यं व्यवहारार्थम्। विधानं पोषणविधिः।।36।।

One who having been naturally gifted with the power of reading others' heart, can perceive what the men, horses and elephants need, who also knows designations and can supply them food.

देशभाषास्वभावज्ञं लिपिज्ञं सुदृढस्मृतिम्।
निशाप्रचारकुशलं [2]शकुनज्ञाननिश्चितम्।।37।।

देशभाषास्वभावज्ञमिति। तत्र देशभाषाज्ञानं व्यवहारार्थम्। देशस्वभावज्ञानं च तद्देश्योपचारप्रतिपत्त्यर्थम्। लिपिज्ञं पत्रसम्प्रेषणमन्त्रणाद्यर्थम्। सुदृढस्मृतिं, स हि सम्प्रधारितं कार्यं न हापयति। निशाप्रचारः सौप्तिकादिव्यापारः। शकुनज्ञानं भविष्यच्छुभाशुभपरिज्ञानफलम्।।37।।

One who knows all countries, languages and human characters, and can decipher all writings and is possessed of a retentive memory; one who is thoroughly competent to lead

---

1. म्। कु ग-घ पाठः
2. 'कुशलज्ञा' ग पाठः 'संज्ञानगतिनि' क पाठः, 'कुलज्ञानविनि' ख पाठः

night attacks and who can determine by his keen intelligence what should be done.

उदयास्तमयज्ञं च नक्षत्राणां ग्रहैः सह।
दिग्देशमार्गविज्ञानसम्पन्नं[1] तज्ज्ञसेवितम्।।38।।

उदयास्तमयज्ञं चेति। ग्रहनक्षत्राणामुदयास्तमयौ शुभाशुभसूचकौ जानाति। दिग्देशमार्गविज्ञानसम्पन्नमिति। रात्रौ वनदुर्गादिषु दिङ्मूढं सैन्यं बोधयति। एवं देशमार्गयोश्च विज्ञानाद् दृष्टदेशमार्गम्। तज्ज्ञैर्दिगाद्यभिज्ञैः सेवितम्[2]।।38।।

One who knows the times of sunset and sunrise, and the position of the stars and planets and their consequent influences, and who is fully acquainted with the routes, the directions, and the countries through which the army is to pass,

क्षुत्पिपासाक्ल[3]मत्रासशीतवातोष्णवृत्तिभिः।
अनाहितभयक्लान्तिं[4] तत्संविग्नाभयप्रदम्।।39।।

अनाहितभयक्लान्ति क्षुदादिभिरनुत्पादितं भयं ग्लानिश्च। तत्क्लेशसहत्वात् कर्मण्यम्। तत्संविग्नाः क्षुदादिपीडिताः सैनिकाः, तेषामाश्वासयितारम्।।39।।

One who is neither frightened nor fatigued by the pangs of hunger and thirst and the inclemency of the weather, hot, cold, and rainy, who can bear up against distresses and exhaustion and who gives declarations of safety to the good.

भेत्तारं परसैन्यानां दुःसाधाहितनिश्चयम्।
[5]हतानां च स्वसैन्यानां [6]सम्यग्विष्टम्भनक्षमम्।।40।।

---

1. 'कालवि' क पाठः
2. 'म् प्रतुध्वा पूर्वादिभिः' ग. घ. पाठः
3. 'प्रकृष्टाध्वशी' क पाठः
4. 'ग्लानि समुद्विग्ना' क. पाठः
5. 'भग्नानां' क. पाठः, 'हिं' ख. पाठः
6. 'सोढुं वि' ख-ग पाठः

हन्तारं, प्रयोगकौशलं दर्शयति, अन्यथा हि शूरमित्यनेनैवावगतत्वात्[1]। [2]दुःसाधाहितनिश्चयं स्थिरप्रतिज्ञम्। विष्टम्भनक्षमं स्तम्भनसमर्थम्।।40।।

One who can create breaches in the army of the enemy, and who can undertake difficult acts, and can detect and remove the cause of alarm of his own troops.

अवस्कन्दाभिमन्तारं भेत्तारं सैन्यकर्मणाम्।
परदूतप्रचारज्ञं महारम्भफलोपगम्।।41।।

अवस्कन्दाः परेणोपरुद्धाः[3], तेषाम् अनुबलाधानेन मन्तारम्। सैन्यकर्मणां (वेत्तारं) हस्त्यश्वरथपत्तिकर्मविदम्। [4]परदूतप्रचारज्ञं यथोक्तेन प्रकारद्वयेन। महारम्भफलोपगं महारम्भफलं साधयितुमुपगन्तारं, नान्यत्।।41।।

One who can protect the camp, and is capable of bringing into light any underhand act of the troops, one who fully knows the disguises and the pretenses put forward by the spies and messengers, and who reaps success by his great effort,

शश्वत्संसिद्धकर्माणं सिद्धकर्मनिषेवितम्[5]।
पराभवेष्वनिर्विण्णं श्रीमद्राजार्थतत्परम्।।42।।

शश्वत्संसिद्धकर्माणं यद्यदारभते कर्म, तत्तदस्य सर्वदा सिध्यतीत्यर्थः। सिद्धकर्मभिश्च निषेवितम्। पराभवेष्वनिर्विण्णं शत्रुकृतेष्वभग्नोतसाहम्। श्रीमद्राजार्थतत्परं प्रकृष्टे राजकार्ये सावधानम्।।42।।

One who always achieves successfully actions undertaken by him, and enjoys their fruition, and who is disregardful of near or remote moments, but is only anxious about the material prosperity of the kingdom,

---

1. 'वाग' क ख पाठः
2. 'साध्याहि' ग-घ पाठः
3. 'णावरु' ग-घ पाठः
4. 'च' क-ख पाठः
5. 'णम्' क पाठः

इत्यादिलक्षणोपेतं कुर्वीत ध्वजिनीपतिम्।
ध्वजिनीं तु सदोद्युक्तः स गोपायेद् दिवानिशम्।।43।।

ध्वजिनीं सेनामुक्तलक्षणम्। गोपायेद् रक्षेत् तन्नियुक्तत्वात्।।43।।

One possessed of these characteristics should be made the leader of an army. The army should always, day, night, be carefully protected.

नद्यद्रिवनदुर्गेषु यत्रयत्र भयं भवेत्।
सेनापतिस्तत्रतत्र गच्छेद् व्यूहीकृतैर्बलैः।।44।।

नद्यद्रिवनदुर्गेष्विति। दुर्गशब्दः प्रत्येकं योज्यः। भयं सामन्ताटविदिभ्यः। व्यूहीकृतैः सन्नद्धैः।।44।।

Wherever rivers, mountains, forests and difficult regions there will be any chance of danger, the general should proceed there with his army arranged in due order.

(इति सेनापतिप्रचारो नाम ऊनत्रिंशं प्रकरणम्)

त्रिंशं प्रकरणम्

प्रयाणव्यसनरक्षणप्रकरणम्

(Remedies for lapses in Marches)

नायकः पुरतो यायात् प्रवीरपुरुषावृतः[1]।
मध्ये कलत्रं स्वामी च कोशः फल्गु च यद् बलम्।।45।।

व्यूहीकृतैर्यातव्यमित्युक्तं, तत् कथं न्युह्य यायाद्, गच्छंश्च केषु व्यसषु पराभियोगाद् रक्षेदिति प्रयाणव्यसन[3]रक्षणमुच्यते नवभिः श्लोकैः। तत्र याणमधिकृत्याह– नायक इत्यादि। नायको बलाध्यक्षः। पुरतो यायाद् सन्, मार्गावा[4]सयोश्च सम्पादनार्थम्। कलत्रमन्तःपुरम्। स्वामी विजिगीषुः। बलं विष्ट्यादिकम्।।45।।

The escorts supported by a detachment of heroic troops should march in the line; the king and his camp, and the treasury solvent or insolvent, should be in the middle.

पार्श्वयोरुभयोरश्वा अश्वानां पार्श्वयो रथाः।
रथानां पार्श्वयोर्नागा[2] नागानां चाटवीबलम्।।46।।

पार्श्वयोरुभयोः स्वामिन इत्यर्थः। अटवीबलं तात्स्थ्यादाटविकम्।।46।।

The horses should march in both the sides and they should be bordered by the chariot warriors; these again should be bordered by elephants that the forest tribes should edge.

---

1. 'यु' क पाठः
2. 'नमु' ग-घ-ङ पाठः
3. 'वस-? थ योश्चासम्बाधार्थं' क-ख पाठः
4. 'तो ना' ख-ग पाठः

पश्चात् सेनापतिः सर्वं पुरस्कृत्य कृती स्वयम्।
यायात् सन्नद्धसैन्यौघः खिन्नानाश्वासयञ्छनैः।।47।।

पश्चात् स्वामिनो गच्छत:। सर्वं सैन्यम्। खिन्नानां सैनिकानामाश्वासन[1]-करणस्वभाव:।।47।।

The accomplished general thus having placed everybody in the front should march slowly in the rear, arranging the host of troops, and breathing comfort to the injured and the feeble.

यायाद् व्यूहेन महता मकरेण पुरोभये।
श्येनेनोद्धृतपक्षेण सूच्या वा वीरवक्रया।।48।।

पुरोभय इति। पुरस्तात् परोऽभिहनिष्यतीति भयमुत्प्रेक्ष्य मकरव्यूहेन यायात्। स हि विस्तीर्णमुखत्वादशेषं बलं रक्षति। श्येनेनोद्धृतपक्षेण विस्तृतपक्षेण, यदा तिर्यग्भागे भयमुत्प्रेक्षेत[2]। सूच्या वा वीरवक्रया मुखनिवेशितशूरयोधया[3], यद्येकायनमार्गे पुरोभयमाशङ्क्येत।।48।।

When there should be danger in the line, the troops should be disposed of in the Makara (crocodile-shaped), or in the two-winged patron or (hawk-shaped), or in the Suchi-needle-shaped, arrangement and then marched forward.

पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसंज्ञितम्[4]।
सर्वतः सर्वतोभद्रं भये व्यूहं प्रकल्पयेत्।।49।।

पश्चाद्भये शकटं, तस्य पश्चाद्विस्तीर्णमुखत्वात्। पार्श्वयोरुभयोर्वज्रसंज्ञितं तदुभयतो विस्तीर्णमुखम्। सर्वतो भये सर्वतोभद्रं, तस्य सर्वतोमुखत्वात्।।49।।

When there would be danger in the rear, the Sakata or chariot-shaped arrangement should be formed ; when the danger would be in the edges, the array called Vajra should be formed; and in all situation the array known as Sarvatobadra that frighten the enemy, should be formed.

---

[1] 'सक' ख-ग पाठ:
[2] 'क्ष्ये' ङ पाठ:
[3] 'धायनतया' ग-घ पाठ:
[4] 'सन्निभम्' क पाठ:

कन्दरे शैलगहने निम्नगावनसङ्कटे।
दीर्घाध्वनि परिश्रान्तं क्षुत्पिपासाहितक्लममङ्क॥50॥

व्यसनरक्षणमधिकृत्याह– कन्दर इत्यादि। कन्दरादिष्ववतरणारोहणोत्तरणादिव्यासक्तम्॥50॥

When the troops are exhausted in consequnce of prolonged marches through long routes and over hills, valleys, forests and narrow woody passes and through rivers and riverbeds, when they are afflicted with hunger, thirst, and cold.

व्याधिदुर्भिक्षमरणपीडितं[2] दस्युभिर्द्रुतम्[3]।
पङ्कपांसुजलच्छन्नं[4] व्यस्तं पुञ्जीकृतं पथि॥51॥

स्कन्नं पङ्कादिगतम्। व्यस्तं विक्षिप्तम्। पुञ्जीकृतं पथि एकायने॥51॥

When they are harassed with raids of robbers and distressed with diseases, want of food and epidemic and oppression, when on the route of march they get muddy unclean water for drink, and when they become separated or gathered together.

प्रसुप्तं भोजनव्यग्रमभूमिष्ठमसंस्थितम्।
[5]चोराग्निभयवित्रस्तं वृष्टिवातसमाकुलम्[6]॥52॥

अभूमिष्ठं [7]स्वबलायोग्यायां भूमौ स्थितम्। असंस्थितमनिविष्टम्॥52॥

---

1. 'श्र' क पाठः
2. 'मकरपी' क पाठः
3. 'विद्रु' क पाठः
4. 'ला' क पाठः
5. 'द्यो' क पाठः
6. 'हतम्' क पाठः
7. 'अस्वबलयो' ङ पाठः

When they fall deeply asleep and become busy in preparing their meal, when they are not in the proper ground and are not prepared for attack ; when they are afflicted with the fear of thieves and fire, and when they are over taken by rain and storm,

एवमादिषु जातेषु व्यसनेष्व[3]समाकुलः।
स्वसैन्यं साधु संरक्षेत् परसैन्यं च घातयेत्।।53।।

एवमादिष्विति। आदिशब्दादशेषबलव्यसनोपग्रहः। असमाकुलः सावधानः। स्वसैन्यं रक्षेत् परावस्कन्दात्।।53।।

When all these disasters overtake his army, a king should protect it; but when the hostile troops are over taken by them, he should fall upon them and defeat them.

(इति प्रयाणव्यसनरक्षणं नाम त्रिंशं प्रकरणम्)

---

1. 'षु समाकुलम्।' क पाठः

एकत्रिंशं प्रकरणम्

कूटयुद्धविकल्पप्रकरणम्

(Deceitful tactics in Warfare)

विशिष्टो देशकालाभ्यां भिन्नारिप्रकृतिर्बली।
कुर्यात् प्रकाशयुद्धं हि[1] कूटयुद्धं विपर्यये।।54।।

उक्तव्यसनानां हि कूटयुद्धहेतुत्वात्[2] तदनन्तरं कूटयुद्धविकल्पा उच्यन्तेऽष्टादशभिः श्लोकैः। विशिष्ट इत्यादि। चतुरङ्गेण हि बलेन व्यायामयुद्धं क्रियते। तच्च द्विविधं, मुख्यं तावत् प्रकाशयुद्धम्, [3]अप्रकाशयुद्धं कूटमिति। तत्र यदा [4]स्वबलानुकूलदेशकालः [5]कृतपरप्रकृत्युपजापो[6] बलेन चाधिकः शत्रोः, तदा प्रकाशयुद्धम् आभाषितं सङ्ग्रामं कुर्यात्। विपर्ययः विरुद्धदेशकालः अभिन्नरिप्रकृतिर्बलहीनश्च कूटयुद्धं प्रच्छन्नुयुद्धं कुर्यात्।।54।।

Having effected an estrangement between the enemy and his Prakritis and with the advantages of the season and the soil in his favour, a king should fight a pitched battle; otherwise he should fight in underhand ways.

[7]तेष्ववरकन्दलालेषु[8] परं हन्यात् समाकुलम्[9]।
अभूमिष्ठं हि भूमिष्ठं तद्भूमौ चोपजापतः।।55।।

---

1. 'तु' क पाठः
2. 'त्वादन' ङ पाठः
3. 'तदन्यत् कूटयुद्धमि' क ख पाठः
4. 'रूपदे' ङ पाठः
5. 'तप्र' ग-घ पाठः
6. 'पोविशिष्टो ब' ङ पाठः
7. 'साध्वव' क पाठः
8. 'हिं' क पाठः
9. 'ले' क पाठः

कीदृशं तदित्याह– तेष्वित्यादि। अवस्कन्दकालेषु कन्दराशैलादिप्रयाणादिषु। अभूमिष्ठं स्वभूमिष्ठं परं हन्यादिति सम्बन्धः। स्वबलयोग्यायां[1] वा भूमौ स्थितं परस्परप्रकृतिषूपजापाज्जातावकाशो हन्यादित्यर्थः।।55।।

In unfair warfare, the foe when busy in pitching tents on unfavorable grounds should be slain by the king who is on favorable grounds; when a king is on his own ground she is said to be on favorable grounds.

प्रकृतिप्रग्रहाकृष्टं पाशैर्वनचरादिभिः।
हन्यात् प्रवीरपुरुषैर्भङ्गदानापकर्षणैः।।56।।

आकृष्टं पाशैर्वनचरादिभिः भङ्गदानापकर्षणैरिति सम्बन्धः। आदिशब्दाद् दूष्यामित्रोपग्रहः। भङ्गदानेनापकर्षणं येषां तैः दूष्यामित्राटविकबलैः पाशभूतैः स्वभूमितोऽपकृष्टं परं विभूमिप्राप्तं प्रवीरपुरुषैर्हन्यात्।।56।।

A king who is cheerless in consequence of his Prakritis being separated from him should be killed through secret agents, foresters, and brave soldiers, who should employ against him gift or bribery or isolation.

पुरस्ताद् दर्शनं दत्त्वा तल्लक्षकृतनिश्चयः।
हन्यात् पश्चात् प्रवीरेण [2]बलेनोत्पीड्य वेगिना।।57।।

पुरस्ताद् दर्शनं दत्त्वा येनकेनचिद् बलेन, तल्लक्षकृतनिश्चयः पौरस्त्यकृतावधानान् परसैनिकान् हन्यात्। पश्चाद् अदत्तपृष्ठावधानत्वात्। प्रवीरेण हस्त्यश्वबलेन बेगवता।।57।।

Displaying himself in the front and thence having established the mark, a king should eliminate his enemies from behind, falling upon him with alert and heroic troops.

पश्चाद् वा सङ्कुलीकृत्य हन्यात् सारेण पूर्वतः।
आभ्यां पार्श्वावधातौ तु व्याख्यातौ कूटयोधने।।58।।

---

1. 'यां भू' ग-घपाठः
2. 'नाप्लुत्य वे' क पाठः

पश्चाद् वा सङ्कुलीकृत्य पृष्ठतो व्याकुलीकृत्य येनकेनचिद् बलेन। हन्यात् पूर्वतः पुरस्ताद्, दत्तपृष्ठावधानान्। आभ्यां पार्श्वाघाताविति। वामतो दक्षिणतो वा पार्श्वतः सङ्कुलीकृत्य दक्षिणतो वामतो वा हन्यात्।।58।।

He may also placing the greater part of the army in the enemy's back where consequently his attention will be drawn, kill this latter from the front, falling upon him with the best part of his troops. In this way the edges also may be assaulted in partial warfare.

पुरस्ताद् विषमे देशे पश्चाद्धन्यात् तु वेगवान्।
पुरः[1] पश्चाच्च विषम एवमेव तु पार्श्वयोः।।59।।

पुरस्ताद् विषमे देशे [2]परिवर्तनस्तम्भनावकाशाद्ययोग्ये। पश्चाच्च विषमे पुरो हन्यादिति सम्बन्धः। एवमेव तु पार्श्वयोरितिं। वामदक्षिणयोरिति सम्बन्धः। देशे वामतो दक्षिणतो वा हन्यादित्यर्थः।।59।।

If the ground in the front be unfavorable, a swift moving king should change position and kill the enemy from behind. A king should kill his enemy going over to his side who foolishly believes that he has conquered him.

प्रथमं योधयित्वा च दूष्यामित्राटवीबलैः।
श्रान्तं सन्नं निराक्रन्दं हन्यादश्रान्तवाहनः।।60।।

दूष्यामित्राटवीबलैः परकीयकल्पैः। [3]बलं बलेन हन्यात्। (पूर्वतः?) [4]प्रथममिति। पूर्वं योधयित्वा पश्चाच्छ्रान्तं सन्नम्। निराक्रन्दं [5]निराशं, क्षीणबलत्वात्।।60।।

Appealing the troops of the enemy out of their camps villages and forts into pastures, a cool-headed king should kill them.

---

1. 'रश्च पश्चाद्वि' ख-ग पाठः
2. 'नसंस्त' ङ पाठः
3. 'बलं वि (ल्वे ? श्वेन)' ङ-च पाठः
4. 'परमिति' ग-घ-ङ-च पाठः
5. 'राक्रोशं' ग-घ-पाठः

दूष्यामित्रबलैर्वापि भङ्गं दत्त्वा प्रयत्नवान्।
जितमित्येव विश्वस्तं हन्यात् [1]सत्रव्यपाश्रयः।।61।।

दूष्यामित्रबलैर्वा भङ्गं दत्त्वा पलायनेनानयोर्जितं मयेति विश्वस्तं परं भग्नानुसारिणम्। प्राक् [2]सत्रव्यपाश्रयः प्रयत्नवानप्रमत्तो हन्यात्।।61।।

Getting his own forces of convicted and alienated soldiers defeated in the encounter when the enemy feels confident that" I am victorious" and retires to his fort the energetic king should fall upon him and crush him.

स्कन्धावारपुरग्रामसस्यसार्थव्र[3]जादिषु।
विलोभ्य च परानीकमप्रमत्तो विनाशयेत्।।62।।

स्कन्धावारादिषु प्रख्यापितरक्षाशैथिल्येषु विलोपयितुं विलोभ्योभयवेतनैः ततो विलोपेऽप्रमत्तः परानीकं हन्यात्।।62।।

Inviting away the subjects of the enemy out of their fortification and market and other crowded places , villages through secret agents the cool headed king should plunder and destroy the dominion of the enemy.

फल्गुसैन्यप्रतिच्छन्नं कृत्वा वा सारवद् बलम्।
मन्दयत्नं[4] तद्विलोपे हन्यादुत्प्लुत्य सिंहवत्।।63।।

फल्गुसैन्यप्रतिच्छन्नमिति। असारबलेन[5] सारबलमवच्छाद्य तद्विलोपे फल्गुबलाभिघाते अवज्ञया शिथिलयत्नं (समीचीभूतं?) परं सारबलेन सिंहवदुत्प्लुत्य हन्यादिति।।63।।

Concealing the inefficient portion of the army, and with the rest of it supported by the friends, a king should crush the enemy falling upon him even like a lion.

---

1. 'सत्त्वव्य' इति मूलकोशेषु पाठः
2. 'त्रापाश्रितः प्र' ग-घ पाठः
3. 'प्र' ख-ग पाठः
4. 'त्नविलोपेन ह' इति मूलकोशेषु पाठः
5. 'न सिंहसा' ग-घ पाठः

मृगयासम्प्रसक्तं[1] वा [2]हन्याच्छत्रुमपाश्रयम्।
अथवा गोग्रहाकृष्ट्या तल्लक्षं मार्गबन्धनात्।।64।।

मृगयासंप्रसक्तमाटविकप्रोत्साहितम्। गोग्रहाकृष्ट्या गोग्रहणेनान्यतः समाकृष्य गोग्रहणकृतलक्ष्यं परं मार्गेषूपरुध्य हन्यात्।।64।।

Remaining hidden, a king should kill his enemies when he is engaged in hunting; or he may kill him appealing him away by the hope of plunder and then blocking his route of return.

अवस्कन्दभयाद् रात्रौ प्रजागरकृतश्रमम्।
दिवाप्रसुप्तं वा हन्यान्निद्राव्याकुलसैनिकम्।।65।।

अवस्कन्दभयादिति। रात्रौ सायमेवावस्कन्दं दास्यतीति भयात् प्रजागरकृतश्रमं ततो निद्राव्याकुलसैनिकं दिवसुप्तं हन्यात्।।65।।

The troops that could not sleep through fear of being attacked in the night and that have been worn out through the drudgeries of night-keeping should be attacked and defeated on the following day.

अहस्सन्नाहतः[3] श्रान्तमपराह्णे विनाशयेत्।
निशि विस्रम्भसुप्तं[4] वा तत् सौप्तिकविधानवित्।।66।।

अहस्सन्नाहत इति। अहनि व्याजकलहेन सन्नाहपरिश्रान्तम् अपराह्णे मुक्तसन्नाहं हन्यात्। सुप्ते भवं मर्दनं सौप्तिकं, तद्विधानवित्। विस्रम्भसुप्तं वा तत् परबलं विनाशयेदिति सम्बन्धः।।66।।

A king knowing the rules of night attack should lead out a night-attack with the fourth part of his army, against the enemy innocently locked in the arms of sleep.

In this way, a king possessed of swiftness should slay his enemies.

---

1. 'यु' ख-ग पाठः
2. 'त्सत्त्वसमाश्रयः' ख-ग पाठः
3. 'नश्रा' ख-ग पाठः
4. 'ब्ध' क पाठः
5. 'क्रौ' क पाठः
6. 'नृंभिर्वा' क पाठः

सपादकोशावरणैर्नागैः कुर्यात् तु सौप्तिकम्।
[5]कुर्यादुग्रजवोपेतैर्नरैर्वा[6] खड्गपाणिभिः।।67।।

किं तत् सौप्तिकमित्याह–सपादकोशावरणैरिति। पादकोशश्चर्ममयाः कण्टकाद्याबाधकपरिहारार्थम्। आवरणं शस्त्रनिवारणार्थम्। नरैर्वा, यदि हस्तिनो न सन्ति।।67।।

Mist, darkness, herds of cows, pits, hillocks, underwood, and river-beds—these indicate the foe, for they are the seven kinds of hiding places.

प्रतिसूर्यमहावातं[1] हन्यात् सम्मीलितेक्षणम्।
[2]इत्येवं कूटयुद्धेन हन्याच्छत्रून् लघूत्थितः।।68।।

प्रतिसूर्यमहावातं प्रतिकूलौ सूर्यमहावातौ यस्य परबलस्य तत् प्रतिघातकृतसम्मीलनत्वाद्धन्यात्[3]। इत्येवमित्युपसंहरति। लघूत्थितो हन्याद् मा भूत् कालातिपत्तिरिति।।68।।

With swift swordsmen inflamed with wrath, a king should kill the enemy whose eyes are blinded in consequence of the sun's rays falling on them or the wind blowing against them.

A persevering sovereign exerting in the right manner, should slay his foes by the different kinds of warfare, knowing their movements through the agency of his spies.

नीहारतिमिराङ्गारश्वभ्राग्निवननिम्नगाः[4]।
वदन्ति सत्रमित्यादि सत्रं छद्म प्रकीर्तितम्।।69।।

[5]सत्रव्यपाश्रय इत्यादि सत्रमुक्तं, तस्य स्वरूपमाह– नीहारेत्यादि। श्वभ्राणि कन्दराः। सत्रमित्यादीत्यादिशब्दाद् धान्वनशैलविषमादयो द्रष्टव्याः। सत्रं [6]छद्म प्रकीर्तितम् आत्मच्छादनात्।।69।।

---

1. 'तप्रतिस' ख-ग पाठः
2. 'निहन्यादिति कूटेन युद्धेनारीन्' ख-ग पाठः
3. 'लितत्वा' क-ख पाठः
4. 'दि' क पाठः
5. 'त्त्वव्यपाश्रय इति स' क-ख पाठः
6. 'वर्त्म' ग-घ पाठः

Thus always a king should kill his enemies by prejudiced war. The killing of enemies by deceitful measures is not detrimental to one's righteousness. The son of Drona with his sharp weapon slew the troops of the Pandavas when they were unsuspectingly locked in the arms of sleep at night.

(पुनरावर्तमानस्य निराशस्य तु जीविते।
अनार्यो जायते वेग इति भग्नं न पीडयेत्।।
अल्पागमातिव्ययता क्षयो वृद्धिर्विपर्यये।
समायव्ययता स्थानं कर्मसु ज्ञेयमात्मनः।।
द्वावपि प्रस्तुनौ वध्यप्रभत्तौ व्यवसायवत्।)

साध्वप्रमत्तो व्यवसायवर्ती येन प्रकारेण परं निहन्यात्।
चरैः समावेदिततत्प्रचारः शङ्केत तेनैव ततोऽप्रमत्तः[1]।।70।।

यथा विजिगीषुः कूटयुद्धप्रयोगान् परत्र प्रयुङ्क्ते, तथा परोऽप्यस्मिन्निति तत्प्रतिविधानार्थमाह– साध्वित्यादि। शोभनमप्रमत्तः। व्यवसायवर्ती कृतोत्साहः। चरैः समावेदितः शत्रुप्रचारो यस्मै सः। तेनैव प्रकारेण। ततः परस्माच्छङ्केत।।70।।

The soldiers of the enemy who have turned their backs or have become hopeless of life or have lost their movement should not be struck down as they have submitted.

The enemy whose sources of income have diminished and expenses have increased manifold are said to be suffering from diminution of finances or financial break down and disruption of growth of potential and the enemy whose potentiality of income and expenditure as also his dominion and activities stand at par with that of the Vijigisu both such enemies if found to be seriously hostile deserve to be attacked and dispensed resolutely and vigorously.

The prudent and enthusiastic Vijigisu should assail the enemy by the different methods on the basis of the

---

[1] 'मेयः' ख-ग पाठः

reports and signals from secret agents about the activities of the enemy.

सुनिय[1]तमुपहन्यात् कूटयुद्धेन शत्रून्
न हि तिरयति धर्मं छद्मना शत्रुघातः।
अचकितमवसुप्तं पाण्डवानामनीकं
निशि सुनिशितशस्त्रो द्रोणसूनुर्जघान।।71।।

ननु निर्दिष्टदेशकालः सङ्ग्रामो धर्मिष्ठः। कूटयुद्धस्याधर्मिष्ठत्वा[2]त् कथं शत्रुमनेन हन्यादित्याह– सुनियतमित्यादि। शत्रुरपकारी, तस्य कूटेन व्यापादनं नाधर्माय। तथाचागमः–

"विषेण वा माधव! मायया वा शस्त्रेण गोविन्द! तथाग्निना वा।
यैस्तैरुपायैररविन्दनाभ! शत्रोर्वधं वेदविदो वदन्ति।।"

इति। पूर्वैराचरितश्चायं मार्ग इत्याह– अचकितमिति विस्रब्धं सुप्तम्। द्रोणसूनुश्वत्थामा। स हि पितृवधामर्षितो विस्रब्धसुप्ते पाण्डवानीके सौप्तिकमरोदिति।।71।।

Thus the Vijigisu should always adopt treacherous tactics in thrashing his enemy and killing by deception he will not be contravening dharma-righteousness, the son of Drona killed of the sons of pandavas with his sharp weapons recklessly, while they were asleep.

(इति कूटयुद्धविकल्पो नामैकत्रिंशं प्रकरणम्)

इति शङ्करार्यकृतायां कामन्दकीयनीतिसारपञ्चिकायां जयमङ्गलायां सैन्यबलाबलं सेनापतिप्रचारः प्रयाणव्यसनरक्षणं कूटयुद्धविकल्पो नाम ऊनविंशः सर्गः।

---

[1] 'पुणमु' ख-ग पाठः

[2] 'त्वं क' ङ पाठः

अथ विंशः सर्गः (Canto – 20)

द्वात्रिंश प्रकरणम्

गजाश्वरथपत्तिकर्मप्रकरणम्

(Position and Functions of Army during march)

प्रयाणे पूर्वयायित्वं वनदुर्गप्रवेशनम्।
अकृतानां च मार्गाणां तीर्थानां च प्रवर्तनम्।।1।।

अस्मिन् सर्गे पञ्च प्रकरणानि गजाश्वरथपत्तिकर्मणि, पत्त्यश्वरथगजभूमयः, दानकल्पना, व्यूहविकल्पाः, प्रकाशयुद्धं चेति। तत्र चतुरङ्गं स्वकर्मभिः कूटयुद्धादौ व्याप्रियत इति तत्कर्माण्युच्यन्ते नवभिः श्लोकैः– प्रयाण इत्यादि। प्रयाणकाले परैर्मार्गे संरुद्धे संरोधभङ्गार्थं हस्तिनां पुरो यानम्। वनदुर्गे अश्वाद्यगम्ये प्रवेशनं हस्तिभिः सैन्यस्य। तीर्थानां जलावतरणानां प्रवर्तनं संक्षोभ्यकरणम्।।1।।

To go in front in all marches, to enter first into forests and difficult tracts, to create roads and passages where there are none.

तोयावतारसन्तारावेकाङ्गविजयस्तथा।
अभिन्नानामनीकानां भेदनं भिन्नसङ्ग्रहः।।2।।

तोयावतारसन्ताराविति। जलदुर्गविजयार्थं हस्तिभिस्तोयावतरणं, नाव्यतोयानां च नदीनां सन्तरणम्। एकाङ्गविजयः सुकृतेन [1]सुकल्पितेन केवलेन हस्तिना विजयः। अभिन्नानां परानीकानां पराक्रमातिशयात्। भिन्नसङ्ग्रहः भिन्नव्यूहानां छिद्रपूरणेन सन्धानम्।।2।।

To descend into and swim over watery stretches, to conquer the body-guards -constituting a part of the enemy's army, to break through united ranks, and to gather to their own side the routed troops.

---

1. 'विकलिते' ङ पाठः

बिभीषिकाभिघातश्च प्राकारद्वारभञ्जनम्।
कोशनीतिर्भयत्राणं हस्तिकर्म प्रचक्षते।।3।।

बिभीषिका भीतिजननं सन्नाहसम्भ्रमेणैव। अभिघातः परेषां व्यसनैः।[1] कोशनीतिः प्रयाणकोशवहनम्। भयात् प्रत्युपस्थितात् त्राणम्।।3।।

To ward off causes of danger, to break down walls and gates, to protect the treasury and the uniform adherence to the policy, protecting from all dangers, these are the functions of the elephants.

चतुरङ्गस्य सैन्यस्य निषेधो बलरक्षणम्।
[2]अभिन्नभेदनं भिन्नसन्धानं रथकर्म तत्[3]।।4।।

चतुरङ्गस्य बलस्य परकीयस्य निषेधो रथैः। बलस्यात्मीयस्य रक्षणम्।।4।।

Roles of the Charioteers are to resist the advance of the four fold army of the enemy to safeguard the troops of own army to break through the enemy ranks and to find out and surround the dispersed enemy warriors.

वनदिङ्मार्गविचयो विवधासाररक्षणम्।
अनुयानापसरणे शीघ्रकार्योपपादनम्।।5।।

वनदिङ्भार्गविचयः वनानां सोपद्रवाणां निरूपणमश्वैः। अनुयानं भग्नस्य परबलस्य पश्चात् सरणम्, अपसरणं पलायनम्। शीघ्रकार्योपपादनं वार्ताज्ञानादिकार्यसम्पादनम्।।5।।

To investigate the woods, the different directions, and the routes, to protect the supplies of food and the supporting troops, to effect with promptitude inset acts of pursuit and retreat.

दीनानुसरणं घातः कोटीनां जघनस्य च।
इत्यश्वकर्म पत्तेश्च सर्वदा शस्त्रधारणम्।।6।।

---

1. 'नम्' ग-घ-ङ पाठः
2. 'भोद्यभे' क पाठः
3. 'च' क पाठः

दीनानुसरणं यतोयतः सैन्यं दैन्यमापद्यते, ततस्ततोऽनुसरणम्। घातः कोटीनां बलाग्रभागानाम्। जघनस्य पृष्ठभागस्याशु परिवृत्य घातः। पत्तेश्चेति चशब्दात् [1]सर्वभेदेषु शस्त्रधारणं कर्म॥6॥

To approach and help the distressed portion of the army, the Kotee and the Jaghana, these are the functions of the horse. Of infantry the functions are always to be armed with weapons.

शोधनं कूपतीर्थानां मार्गाणां शिबिरस्य च।
यवसादि च यत्किञ्चिद् विज्ञेयं विष्टिकर्म तत्॥7॥

द्विविधाः पत्तयः युद्धयोग्या इतरे च। तत्र पूर्वेषां कर्मोक्तम्, इतरेषामाह– शोधनमित्यादि। प्रयाणे कूपादीनां शिबिरस्य परिक्षेपस्य शोधनं कर्म। यवसादि च यत्किञ्चित् सम्पाद्यं तद् विष्टिकर्म विज्ञेयम्। आदिशब्दाद् यन्त्रावरणोपकरणादिवहनं ज्ञेयम्॥7॥

To purify the pits and the passages, the roads and the tents, and to know the every details of stock of fodder and food and like Viswakarma.

जातिः सत्त्वं वयःस्थानं [2]प्राणिता वर्ष्म वेगिता।
तेजः शिल्पमुदग्रत्वं स्थैर्यं साधु विधेयता॥8॥

जात्यादियुक्ताश्च हस्त्यादयः स्वकर्मसु क्षमा भवन्तीत्याह– जातिरित्यादि। तत्र पदातीनां जातिर्ब्राह्मणादिः, हस्तिनां भद्रमन्द्रादिः, अश्वानां बाह्लीककाम्बोजादिः। सत्त्वं पदातीनां व्यसनेऽभ्युदये (च) यदविकारकं, हस्त्यादीनां च [3]देवमानुषासुरगन्धर्वभावः[4]। वयःस्थानं वयःस्थता त्रयाणामिति तृतीया चतुर्थी पञ्चमी च दशा। प्राणिता [5]प्राणवत्त्वम्। प्राणस्त्रिविधः उत्तमो मध्यमोऽधमश्चेति[6]।

---

1. 'देशेषु' क-ख पाठः
2. 'णवर्मविवेकिता' क पाठः
3. 'दै' ङ पाठः
4. 'वाः' ङ पाठः
5. 'णित्वम्' ग-घ-ङ पाठः
6. 'श्चा व' ङ पाठः

वर्ष्म महाकायता। वेगिता जवः। सोऽपि त्रिविधः पूर्ववत्। तेजः शौर्यम्। शिल्पं, तत्र पदातीनां कृतास्त्रता, हस्त्यश्वानां त्वाहितविनयता। उदग्रत्वम् उन्नतपूर्वकायता। स्थैर्यं दृढकायमनस्कता। विधेयता, तत्र पदातीनां स्वामिनः, इतरयोर्यन्तुः॥8॥

High lineage, youthful age, the tact of knowing other creature's heart, prowess, skillfulness, promptitude resoluteness and the inclination for the performance of good acts.

सुव्यञ्जनाचारतेति पत्तिकुञ्जरवाजिनाम्।
इति लक्षणमेतेन युक्तान्[1] कर्मसु योजयेत्॥9॥

सुव्यञ्जनता प्रशस्तलक्षणता। स्वाचारता[2], तत्र पदातीनां शिष्टाचरणं, हस्त्यश्वानां सेनान्याद्याचारचरणता[3]। इति लक्षणमिति, पत्तिकुञ्जरवाजिनां स्वस्वकर्मनिष्पादनयोग्यताया अनेन लक्ष्यमाणत्वात्। तस्मादनेन युक्तान् स्वकर्मसु योजयेत्। तत्र च हस्त्यश्वबललक्षणैः[4] रथानामप्युक्तमेव, तदधीनत्वाद् रथचर्यायाः। सन्निवेशसारदारुमयत्वादिकं प्रसिद्धमेवेति नोक्तम्॥9॥

These are the qualifications of infantry, cavalry, car warriors and horses, who possess good marks and follow all rules of conduct; the possessor of all these qualifications only should be employed in action.

(इति गजाश्वरथपत्तिकर्माणि नाम द्वात्रिंशं प्रकरणम्)

---

1. 'क्तं क' क पाठः
2. 'ता प' ङ पाठः
3. 'चारता' घ ङ पाठः
4. 'णाभ्यां' ङ पाठः

त्रियस्त्रिशं प्रकरणम्

पत्त्यश्वरथगजभूमिप्रकरणम्

(Convenient ways for the march of the Army)

सस्थूलस्थाणुवल्मीकवृक्षगुल्मापकण्टका।
सापसारा पदातीनां भूर्नातिविषमा मता।।10।।

यथा तत्कर्माणि युद्धार्थानि, तथा तद्भूमयोऽपीति तत्त्यश्वरथगजभूमय उच्यन्ते पञ्चभिः श्लोकैः– सस्थूलेत्यादि। स्थूलस्थाणुभिर्वल्मीकवृक्षगुल्मैश्च योधाश्रयैः सह वर्तते युद्धभूमिः। अपकण्टका कण्टकरहिता सञ्चरणयोग्या। सापसारा अपसरणमार्गोपेता। नातिविषमा स्तोकनिम्नोन्नता।।10।।

A ground free from dangers and thorns and of which the trees and groves have been cut down and the mounds leveled and which possesses outlets of retreat such a ground is thought advantageous for the movements of the infantry.

स्वल्पवृक्षोपला क्षिप्रलङ्घनीयदरा[1] स्थिरा।
[2]निःशर्करा विपङ्का च सापसारा च वाजिभूः।।11।।

स्वल्पवृक्षोपला वाजिनामसङ्गकारिणी भवति। क्षिप्रलङ्घनीयप्रदरवती, बृहच्छ्वभ्राभावात्।[3] स्थिरा यत्र खुरा न विशन्ति।।11।।

Grounds with small number of trees and stone, having no pits, creepers and caves and which is steady, and free from gravel or mud and possess outlets for retreat, such grounds are said to be cavalry-grounds.

---

[1] 'नी विदरा' मूलकोशपाठः

[2] 'निर्गता च विष' ख-ग पाठः

[3] 'त् विदरा दरणवर्जिता। स्थि' ङ पाठः

निःस्थाणुसिकतापङ्का निर्वल्मीकोपला समा।
केदारव्रततिश्वभ्रवृक्षगुल्मविवर्जिता।।12।।

निःस्थाणुसिकतापङ्का निर्वल्मीकोपला च भूः[1] (चक्रसहा तदारोहणचर्यानुकूला) केदारं क्षेत्रम्। व्रततिः वल्ली।।12।।

Devoid of sandy soils, mud, earthen mound gravels and stones, and free from marshes, creepers, pits, trees, woods, and such like things.

निरुत्खाता निर्दरणा [2]खुरचङक्रमणक्षमा।
स्थिरा चक्रसहा चैव रथभूमिः[3]प्रकीर्तिता।।13।।

निरुत्खाता चक्राप्रतिघातिनी। खुरचङ्क्रमणयोग्या स्थिरत्वात्।।13।।

Where there are no gardens and crevices, which are capable of bearing the tread of hoofs, and are steady and can bear the wheels, such grounds are said to be chariot grounds i.e. where chariots may be driven with safety.

(रथानां शस्यते भूमिर्भुवः सर्वास्तु हस्तिनाम्।
नागम्या नाम भूरेषां तेन नागाः स्मृता बुधैः।।)
मर्दनीयतरुश्छेद्यव्रततिः पङ्कवर्जिता।
[4]सुगम्यशैलविषमा हस्तिभूरिति कीर्तिता।।14।।
(द्वे शते धनुषां गत्वा राजा तिष्ठेत् प्रतिग्रहे।
भिन्नसन्धारणस्तस्मान्न बुध्येताप्रतिग्रहः।।)
(नागम्या नाम भूरेषां तेन नागाः स्मृता बुधैः।
तस्मादेता भुवोऽत्यर्थं नागानां सम्प्रकीर्तिताः।।

---

[1] 'भूमिः' ग-घ-ङ पाठः
[2] 'दू' ख-ग पाठः
[3] 'भूः सम्प्र' ख पाठः
[4] 'निर्दरा गम्यशैला तु विषमा गजमेदिनी' क पाठः

तुरगादीनि भिन्नानि प्रतिगृह्णाति यद् बलम्।
प्रतिग्रह इति ख्यातः स तु कार्यो भरक्षमः।।
द्वे शते धनुषां गत्वा राजा तिष्ठेत् प्रतिग्रहः।
भिन्नसाधारणस्तस्मान्न युध्येताप्रतिग्रहः।।
तेन शून्यस्तु यो व्यूहः स भिन्न इव लक्ष्यते।
तस्माद् विद्वाञ्जयाकाङ्क्षी न युध्येताप्रतिग्रहः।।)
ज[1]यार्थी नृपतिस्तिष्ठेद् दूरं गत्वा प्रतिग्रहः।
भिन्नं च प्रतिगृह्णीयान्न हि यु[2]ध्येत तं विना।।15।।

गजमूमिमाह–मर्दनीयतरुश्छेद्यव्रततिरिति। शक्यमर्दनवृक्षा छेद्यव्रततिश्च हस्तिनां तदारोहा[3]णां चाबाधनी। सुगम्यशैलविषमेति। हस्तिनां गम्याः शैला विषमाश्च।।14।।

बलान्तराणां त्वगम्यां भूमिं प्रसङ्गादाह– जयार्थीति। यत्र स्थितः स्वबलं प्रतिगृह्णाति स[4] प्रतिग्रह उच्यते। तथा चोक्तं–

"द्वे शते धनुषां गत्वा राजा तिष्ठेत् प्रतिग्रहः।
भिन्नसन्धारणस्त[5]स्मान्न युध्येताप्रतिग्रहः।।" (कौटि० अर्थ० 10.5.157) इति।।15।।

The grounds for the chariots, the horses and the elephants should be steady and hard. The wise should not consider that the grounds for the horses are not for elephants.

Grounds where are these trees to be crushed -i. e., delicate trees which the elephants may eat up and creepers to be rooted out, which is free from mire, and is fertile and rough,

---

[1] 'विजयार्थीति यस्ति' क पाठः
[2] 'बुध्ये' क पाठः
[3] 'हणकानां च नाबा' ङ पाठः
[4] 'तत्स्थानं प्र' ङ पाठः
[5] 'न्त' क-ख पाठः

where there are accessible hillocks, such are grounds for the elephants.

An intelligent monarch desirous of victory should never hazard a fight without good cause or his rear well protected. In case of sheer necessity he may fight being surrounded by numerous troops.

In the field of combat the king should be placed at a distance of 200 dronas away at the back or rear of the army protecting his soldiers aggrieved by enemy action It may thus be possible for him to restructure and regenerate his own troops but he should not take any action unsupported by his own forces. Wise men advise the use of elephants in negotiating impenetrable tracts and for this purpose essentially of the elephant force is well known. Horses are useful in capturing the defeated enemy soldiers Thus they are chiefly capable of encircling prisoners of war. Even when the enemy's vyuha appears to be vacant or scattered an intelligent king should not risk involvement in the encounter unguarded.

(इति पत्त्यश्वरथगजभूमयो नाम त्रयस्त्रिंशं प्रकरणम्)

चतुस्त्रिंशं प्रकरणम्

दानकल्पनाप्रकरणम्

(Rewards for fighting forces)

गजेष्वारोपितः साधुः शीघ्रपा[1]तैरधिष्ठितः।
यत्र राजा तत्र कोशः कोशाधीना हि राजता।।16।।

यथा[2] युद्धभूमयो युद्धार्थास्तथा योधेभ्यो दानमपीति तत्कल्पनोच्यते षड्भिः श्लोकैः। तत्र 'पक्षादिनानेन गृहीतकोशः पक्षादिहीनं रिपुमभ्युपेयादि' (स० 16. श्लो० 34) त्युक्तम्। स च कोशो युद्धकाले क्व तिष्ठेदित्याह– गजेष्वित्यादि। साधुः सारभूतः, देशकालनुरूपद्रव्ययुक्तो वा। शीघ्रपातैः प्रजविभिर्जनैराप्तैरधिष्ठितः। कोशाधीना हि राजतेति। राजसमूहो राजता। साचार्थतृष्णता युध्यमाना तदधीना भवति। तस्माद् राजसमीप एव कोशः स्यादिति। अन्यस्त्वाह– रञ्जनाद् राजा। दूरस्थे हि कोशं कथं तदानीं योधान् रञ्जयेदित्ति।।16।।

Placed on elephants and guarded by lighter troops, the treasures should be carried where the king goes; for royalty depends on treasures.

प्रत्यग्रे कर्मणि कृते श्लाघमानः कृतादरः।
योधेभ्यस्तु ततो दद्यात् को हि दातुर्न युध्यते।।17।।

कर्मणि कृते वक्ष्यमाणे। श्लाघमानः बहुमन्यमानः। कृतादरः यथार्हकृतमानः।।17।।

After the completion of a difficult work, praised and held in respect, a king should (liberally) remunerate the warriors; for who does not fight for a liberal-handed king?

दद्यात् प्रहृष्टो नियुतं [3]भराणां राजघातने।
तदर्धं तत्सुतवधे सेनापतिवधे तथा।।18।।

---

[1] 'यानैर' क पाठः

[2] 'था भू' ङ च पाठः

[3] 'धर्माणां' क पाठः, 'शूरा' ग पाठः

नियुतं [5]भराणां यथादेशप्रसिद्धानामाहतद्रव्याणां लक्षम्। तदर्धं पञ्चाशत्सहस्राणि।।18।।

A king should cheerfully give ten millions of Barnas to the slayer of his royal antagonist ; half the amount should be given while this Latter's son or his general is slain.

प्रवीराणां तु मुख्यस्य शतं शतगुणं वधे।
वदर्धं कुञ्जरवधे प्रदेयं[3] स्यन्दनस्य च।।19।।

मुख्यनायकस्य शतं शतगुणं, दश सहस्राणीत्यर्थ:। तदर्धं पञ्च सहस्राणि।।19।।

When a chief of a brave detachment of heroes is slain, ten thousand Barnas should be given.

साहस्रोऽश्ववधः[1] शत्यः पत्तिमुख्यवधः[2]स्मृतः।
शिरोविंशतिकं [3]शेषं भोगद्वैगुण्यमेव च।।20।।

साहस्रोऽश्ववध: सहस्रं दीयतेऽस्मिन्निति। (शतं दीयतेऽस्मिन्निति) शत्य:। शिरोविंशतिकं शेषमिति। शेषाणां शिर: प्रमाणीकृत्य विंशतिर्देया। भोगद्वैगुण्यमेव चेति। यथोक्तानामनुक्तानां च कृतकर्मणां पूर्वोचिता या यस्य-यस्य वृतिस्तस्येतस्य तत्तद्भोग्यद्वैगुण्यं कल्पनीयम्।।20।।

When an elephant or a car is destroyed half of this amount should be given; and a thousand Barnas should be given, when an archer or a foremost foot soldier is slain.

युग्यं हेम च कुप्यं च यो यज्जयति तस्य तत्।
दद्याद् वस्त्वनुरूपं वा हृष्टो योधान् प्रहर्षयेत्।।21।।

स्वयं गृहीतानां च परबलद्रव्याणामनुज्ञानं, यदाह– युग्यमित्यादि। युग्यं

---

1. 'खर्वाणाम्' क-ख पाठ:
2. 'धानस्य' क पाठ:
3. 'धे देय:' क पाठ:
4. 'धे तथा' क पाठ:
5. 'सर्वं भो' मूलकोशेषु पाठ:

वाहनम्। कुप्यं कम्बलास्तरणादि। दद्याद् वस्त्वनुरूपंवेति उक्ताद् विधानान्तरं दर्शयति। योधान् प्रहर्षयेत्। तद्यथा–

"यान् यज्ञसङ्घैस्तपसा च विप्राः स्वर्गैषिणः पात्रचयैश्च यान्ति।
क्षणेन तानप्यतियान्ति शूराः प्राणान् सुयुद्धेषु परित्यजन्तः॥
नवं शरावं सलिलस्य पूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम्।
तत् तस्य मा भून्नरकं च गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येद्"॥इति॥

A score of cows or any other object of enjoyment or gold or any other base metal—these belong: to them who conquer them.

(इति दानकल्प नाम चतुस्त्रिशं प्रकरणम्)

पञ्चत्रिंशं प्रकरणम्

व्यूहविकल्पप्रकरणम्

(Varieties of Array of the Army)

पञ्चारत्नि धनुस्तस्मिन्[1] धन्विनं स्थापयेद् युधि।
त्रिगुणेऽश्वं गजरथौ योज्यौ पञ्चसुपञ्चसु।।22।।

यथा युद्धार्थं दानकल्पना, तथा व्यूहोऽपि युद्धनिमित्तमिति तद्विकल्पा उच्यन्ते। तत्र व्यूहविधानं दशभिः श्लोकैराह– पञ्चारत्नीत्यादि। पञ्चहस्तप्रमाणमिह धनुर्ग्राह्यं न चतुर्हस्तम्। तस्मिन् धन्विनं स्थापयेदिति, तावत्यधिष्ठाने पदातिरेको योद्धुं व्याप्रियेत। धन्विनमिति वचनादधन्विनां स्थानमनियतम्। तच्चानुक्तमपि यथासुखं कल्पनीयम्। त्रिगुणे त्रिधनुषि। अश्वं स्थापयेत्। पञ्चसुपञ्चसु धनुष्षु गजरथौ स्थाप्यौ तावति तेषां यथासुखं व्याप्रियमाणत्वात्।।22।।

The king should cheerfully remunerate the soldiers according to the things they bring; then he should place the powerful in battle array.

शमान्तरस्तु पुरुषस्तुरङ्गस्त्रिशमान्तरः।
कुञ्जरः स्यम्दनश्चैव स्मृतौ पञ्चशमान्तरौ।।23।।

शमान्तरस्तु पुरुष इति। चतुर्दशाङ्गुलः शम इत्युच्यते। द्वयोः पदात्यधिष्ठानयोरन्तरं शमप्रमाणं स्थापयेत्। एवमश्वाधिष्ठानयोरन्तरं त्रिशमं हस्त्यधिष्ठानंस्यन्दनाधिष्ठानयोश्च पञ्चशममिति।।23।।

The number of horses should be three times the number of cars and elephants, and five and five should be employed together. Foot-soldiers should be employed with them at the interval of one and horses at the interval of three.

---

1. 'स्थाने ध' क पाठः

तथा वा[1] खलु युध्येरन् पत्त्यश्वरथदन्तिनः।
यथा भवेन्न[2] सम्बाधो व्यायामविनिवर्तने।।24।।

तथा[3] वा युध्येरन् पत्त्यादयो द्विगुणं त्रिगुणं वान्तरं परिकल्प्य, यथा व्यायामे विनिवर्तने च परस्परस्य सम्बाधो न भवेत्। सम्बाधश्चाङ्गविक्षेविधुरत्वम्।।24।।

Elephants and cars should be placed at the interval of five. This kind of division is commended by all masters of polity.

असङ्करेण युध्येरन् सङ्करः सङ्कुलावहः।
[4]महासङ्करयुद्धे च संश्रयेरन् महागजान्।।25।।

तद्[5] भङ्गकारणं सम्भवतीत्याह– असङ्करेणेति। संश्रयेरन् महागजान् न योधानिति शेषः। तदानीं पत्त्यश्वानामसञ्चारात्।।25।।

The horses, men and car-warriors and elephants should fight in such a way that their efforts in case of retreat may be unhindered.

अश्वस्य प्रतियोद्धारो भवेयुः पुरुषास्त्रयः।
इति कल्प्यास्तु पञ्चाश्वा विधेयाः कुञ्जरस्य च।।26।।

अश्वस्य प्रतियोद्धार इति। अश्वस्य योद्धु[6]: पुरस्तात् त्रयः पुरुषाः प्रतियोद्धारोऽग्रयायिनः स्थापयितव्याः। इति कल्प्या इति। प्रतियोद्धपुरुषत्रययोजनया कल्पनीयाः। पञ्चाश्वाः ते च कुञ्जरस्य पुरस्तात् प्रतियोद्धारो विधेयाः।।26।।

When dangerous irregular fight follows it should be fought with mixed troops. In fierce wars, the mighty and noble dynasties should be sought shelter with.

---

1. 'च' ख-ग पाठः
2. 'दस' क पाठः
3. 'था च वा' क-ख पाठः
4. 'ङ्कुलयु' क पाठः
5. 'दभ' क पाठः
6. 'द्धुः त्र' ङ पाठः

पादगोपाश्च तावन्तः पुरुषा दश पञ्च च।
विधानमिति नागस्य कथितं स्यन्दनस्य च।।27।।
अनीकमिति विज्ञेयमिति कल्प्या नव द्विपाः।
अनीकस्य च रन्ध्रं च[3] पञ्चचापं प्रचक्षते।।28।।

पादगोपाश्च तावन्त इति। हस्तिनः पादरक्षकास्तावन्त एव पञ्चाश्वाः पञ्चदशपुरुषान्विता विधेयाः। ते चरणमूलस्थाः, प्रतियोद्धारस्तु पुरस्सरा इति विशेषः। विधानमिति। एकस्य हस्तिनो व्यूहविधानमेतदुक्तम्। स्यन्दनस्य चेति। द्विविधो हि व्यूहः शुद्धो व्यामिश्रश्चेति। तत्र शुद्धो[1] हस्तिव्यूहो रथ व्यूहश्च। यथा हस्तिव्यूहस्येदं विधानं, तथा रथव्यूहस्यापि द्रष्टव्यम्। व्यामिश्रस्य तु विधानं वक्ष्यति[2]।।27।।

इति कल्पना नव द्विपा इति। एकहस्तिविधानेन प्रत्येकं नव द्विपाः कल्पनीयाः[4]। तच्चानीकमिति[5] विज्ञेयम्। तथा चोक्तं ''त्रीणि त्रिकाण्यनीकमि'' (कौटि० अर्थ० 10.5.155)ति। एवमनीके पञ्चचत्वारिंशदश्वाः शतं पञ्चत्रिंशच्च पुरुषाः प्रतियोद्धारो भवन्ति। तावन्तश्चाश्वपुरुषाः पादगोपा इति। अनीकस्य[6] रन्ध्रमिति। द्वयोरनीकयोरसम्बाधार्थमन्तरं पञ्चधनुः प्रमाणम्।।28।।

Three men should always be made adversaries and an elephant should always be opposed by five horses.

Fifteen men and four horses, these are said to be capable of withstanding an elephant or a chariot.

The weakness of a force is said to be Panchacapa by those who are conversant with the forming of arrays and are accomplished in the art of war-fare.

---

1. 'द्वव्यूहो ह' क-ख-ग-घ पाठः
2. 'ते' ङ पाठः
3. 'तु' क पाठः
4. 'ल्प्याः' ग-घ-ङ पाठः
5. 'ति। त' ग-घ-ङ पाठः
6. 'स्येति। रन्ध्रमनीकयोर्द्वयोर' ग-घ पाठः

इत्यनीकविधानेन स्थापयेद् व्यूहसम्पदः।
उरस्यकक्षपक्षांश्च तुल्यानेतान् प्रचक्षते।।29।।

व्यूहसम्पदः व्यूहप्रकारान् अनीकसमुदायत्वाद् व्यूहस्येति[1]। अनीकभेदानाह– उरस्यकक्षपक्षांश्चेति। मध्ये त्रिकत्रयकल्पितमनीकमुरस्यम्। तस्य पार्श्वयोस्तत्प्रमाणौ कक्षस्थानीयौ कक्षौ। ततो बहिरुभयतः पक्षस्थानीयौ पक्षाविति। तुल्यानेतान् प्रचक्षते। एवमस्मिन् पञ्चानीके व्यूहे पञ्चचत्वारिंशद्धस्तिनो भवन्ति। द्वे शते पञ्चविंशतिश्चाश्वाः। षट् शतानि पञ्चसप्ततिश्च पुरुषाः प्रतियोद्धारः, तावन्तश्च पादगोपा इति।।29।।

The armies in vyuha should be arranged thus in distinct units of urasya –the central, kasa –two rear wings and paksa – two front wings and five wings of identical position.

उरः कक्षौ च पक्षौ च मध्यः पृष्ठं प्रतिग्रहः।
कोटी च व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह [2]इष्यते।।30।।

सप्ताङ्गो व्यूह इष्यते पञ्चानीक एव। तद् यथा– उरस्यं कक्षौ पक्षौ च त्रीण्यङ्गानि स्थापयित्वा तेषामेव पृष्ठतः प्रोरस्यं प्रकक्षौ प्रपक्षौ च स्थापयेत्। तत्र प्रोरस्यो मध्य उच्यते, प्रकक्षौ पृष्ठं, प्रपक्षौ कोटीत्यपराणि त्रीण्यङ्गानि, प्रतिग्रहश्च सप्तममङ्गम्। सोऽपि [3]विभिन्नसन्धानहेतुत्वाद् व्यूहेऽन्तर्भवति।।30।।

The Uras the two Kakshas, the two wings, the centre, the back, the rear and the Kotee—these are the seven limbs of the Vyuha or array mentioned by those acquainted with their nature.

उरस्यकक्षपक्षैस्तु[4] व्यूहोऽयं सप्रतिग्रहः।
गुरोरेष[5] च शुक्रस्य कक्षाभ्यां परिवर्जितः।।31।।

[6]तत्र सप्ताङ्गे मतभेदं दर्शयितुमाह– उरस्यकक्षपक्षैस्त्विति[7]। अयं षडनीको

---

1. 'स्यानी' ग-घ-ङ पाठः
2. 'उच्यते' ख-ग पाठः
3. 'भग्नस' क-ख पाठः
4. 'क्षा' मूलकोशपाठः
5. 'व' क पाठः
6. 'सप्ता' क-ख पाठः
7. 'क्षेष्विति' क-ख पाठः

राजस्थानलक्षणेन प्रतिग्रहेण सह बृहस्पतेर्व्यूहविभागः[1]। एष एव शुक्रस्य कक्षाभ्यां परिवर्जितः चतुरनीक इत्यर्थः। प्रपक्षपक्षोरस्यप्रोरस्यास्तूभयोरपि यथासम्भवं द्रष्टव्याः। तत्र शुक्रस्य पञ्चाङ्गो व्यूहः, कक्षप्रकक्षाभावात्। बृहस्पतेस्तु सप्ताङ्गः॥31॥

According to our preceptor the Vyuha has the Uras, the Kaksha and the wings and the rear parts only; according to Sukra it is devoid of the Kakshas.

अभेद्याः कुलजा मौला लब्धलक्षाः प्रहारिणः।
सेनाङ्गपतयः कार्या युद्धदृष्टप्रतिक्रियाः॥32॥

एवं व्यूहविधानमुक्तवा सारफल्गुबलविनियोगं चतुर्भिः श्लोकैर्दर्शयति–अभेद्या इत्यादि। अभेद्याः [2]परबलस्य। लब्धलक्षाः प्रतापवन्तः। प्रहारिणः शूराः। ते व्यवस्थाकरणाय सेनाङ्गस्य पतयः कार्याः। तथा चोक्तम् "अङ्गदशकस्यैकः पतिः, पतिदशकस्यैकस्यैकः सेनापतिः, तद्दशकस्यैको नायक" इति। युद्धदृष्टप्रतिक्रियाः, युद्धे दृष्टा प्रतिक्रिया प्रतिविधानं यैरिति॥32॥

Unalienable, nobly-born, pure-hearted, accomplished in striking, sure of aim, and competent to fight with resoluteness, such men should be made leaders of divisions.

प्रवीरपुरुषैरेते तिष्ठेयुः परिवारिताः।
अभेदनैवे[3] युध्येरन् रक्षेयुश्च परस्परम्॥33॥

एते सेनाङ्गपतयः। तिष्ठेयुः परिवारिताः, तद्वशे प्रवीरपुरुषैः स्थातव्यमित्यर्थात् कथयति। अभेदेन सम्भूय॥33॥

Surrounded by these heroic and brave persons a king should stay on the field and should fight inseparably and protecting one another.

---

1. 'कारः। ए' ग-घ-ङ पाठः
2. 'रस्य' ग-घ पाठः
3. 'न च यु' क पाठः

फल्गु सैन्यस्य[1] यत्किञ्चिन्मध्ये व्यूहस्य तद्भवेत्।
युद्धवस्तु च यत्किञ्चित् [2]प्रायस्तज्जघने भवेत्।।34।।

सैन्यस्य चतुरङ्गस्य। यत्किञ्चिदसारं सैन्यं, तद् व्यूहस्य मध्ये प्रोरस्ये भवेत्। एवं तत्सहिष्णु भवति। युद्धवस्तु यन्त्रायुधाद्युपकरणम्। जघने पृष्ठे।।34।।

The flower of the troops should be placed in the center of the array and the fighting materials should be placed in the Jaghana,

युद्धार्थं युद्धकुशलं मुण्डानीकं प्रयोजयेत्।
युद्धं हि नायकप्राणं[3] हन्येत तदनायकम्।।35।।

मुण्डानीकमिति। यद् राजस्थानमध्वजत्वादनभिलक्ष्यभूतं[4] तन्मुण्डानीकम्। युद्धकुशलं सैन्यं युद्धार्थं बलमध्ये नियोजयेत्। अन्यथा तत् सैन्यमनायकं हन्येत। उक्तञ्च "पितृपुत्रभ्रातृकाणामायुधीयानामध्वजं मुण्डानीकं राजस्थानं[5] कुर्वीते" (कौटि० अर्थ० 10.3.150)ति।।35।।

The fiercest of the forces accomplished in war should be employed in the fight. A good general is said to be the soul of the battle, and it is lost if there is no general.

(श्येनः सूची च वज्रश्च शकटं मकरध्वजः।
इत्येवमादयो व्यूहाः शास्त्रज्ञैः समुदाहृताः।।)
व्यूहोऽनुपृष्ठमचलः पत्त्यश्वरथदन्तिभिः।
तथाप्रतिहतो ज्ञेयो हस्त्यश्वरथपत्तिभिः।।36।।

व्यामिश्रं व्यूहविधानं पञ्चभिः श्लोकैर्दर्शयति– व्यूह इत्यादि। अनुपृष्ठमिति। पुरस्तात् पत्तयः, तत्पृष्ठेऽश्वाः। तत्पृष्ठे रथाः, तत्पृष्ठे [6]हस्तिन इति अचलो

---

1. 'न्यं च य' क पाठः
2. 'प्रशस्तं ज' ख-ग पाठः
3. 'त्रा' क पाठः
4. 'ध्यस्थत्वा' ग-घ पाठः
5. 'न्यानां कु' ङ पाठः
6. 'गजाइ' ग-घ-ङ-च पाठः

नाम। तथा हस्तिनोऽश्वा रथाः पत्तयश्चानुपृष्ठमित्यप्रतिहतसंज्ञः। तदुभयं चतुरनीकम्।।36।।

The Vyuha, that infantry, cavalry, chariots and elephants constitute, one at the back of another, is said to be Achala; that formed by elephants, horses, cavalry, and infantry is incapable of being endured.

उरसि स्थापयेन्नागान् प्रचण्डान् कक्षयो रथान्।
हयांश्च पक्षयोर्व्यूहो मध्यभेदी प्रकीर्तितः।।37।।

उरसि उरस्ये। मध्यभेदी हस्तिभिर्दृढीकृतमध्यत्वान्मध्येन परबलस्य भेदनशीलः।।37।।

The cavalry in the centre, the chariots in the two kakshas, the elephants in the flanks,—such an array is said to be Madhyabhedi.

मध्यदेशे हयानीकं रथानीकं तु कक्षयोः।
पक्षयोश्च गजानीकं व्यूहोऽन्तभिदयं स्मृतः।।38।।

मध्यदेशे उरस्ये। व्यूहोऽन्तयोर्दृढोऽन्तभेदी, अन्तयोर्हस्तिभिर्दृढीकृतत्वात्।।38।।

In place of chariots horses may be posted and in place of horses foot-soldiers may be posted; and in the absence of chariots, an intelligent king should arrange the elephants.

रथस्थाने हयान् दद्यात् पदातींश्च हयाश्रये।
रथाभावे तु [1]सर्वत्र नागानेव प्रकल्पयेत्।।39।।

रथस्थाने कक्षयोरित्यर्थः। हयाश्रये मध्यदेशे। पक्षयोस्तु गजानीकं स्यादेवेत्येवमपरोऽन्तभेदी। रथाभावे त्विति। सर्वत्र व्यामिश्रे व्यूहे रथाभावे तत्स्थाने नागानेव प्रकल्पयेद् अश्वपदातीनामस्थिरत्वात्।।39।।

The foot-soldiers, the horse, the chariots and the elephants should be thrown in the middle in divisions. The elephants surrounded by the infantry, cavalry, and cars should be placed in the centre.

---

[1] 'मतिमान् ना' क पाठः

विभज्य प्रक्षिपेद् व्यूहे रथपत्त्यश्वकुंञ्जरान्।
यदि स्याद् दण्डबाहुल्यं स[1] चावापः प्रकीर्तितः।।40।।

विभज्य प्रक्षिपेदिति शुद्धं व्यामिश्रं वा व्यूहं कल्पयित्वा यदि दण्डबाहुल्यं स्यात् तद्दाढर्यार्थं पुनस्तस्मिन् रथादीन् विभज्य प्रक्षिपेत्। तत्र रथादीस्त्रीन् भागान् कृत्वा भागमेकं कक्षयोः द्वितीयं पक्षयोः तृतीयम् उरस्ये प्रक्षिपेत्। तथा हस्तिनामश्वानां चायमेव विभागः। तथाचोक्तं "रथानां द्वौ त्रिभागावङ्गेष्वावपेच्छेषमुरस्यवस्थापयेत्। तेन हस्तिनामश्वाना चावापा व्याख्याताः" (कौटि० अर्थ० 10.5.155) इति। स चावापः प्रकीर्तितः समन्तादुप्यते प्रक्षिप्यत इति कृत्वा।।40।।

According to experts in Planning Vyuhas the major arrays are described to be Bow shaped-Dhanu, needle pointed –Suci, Shaped like staff-danda, Cart shaped –Sakata and that bearing makara ensign-makara dhvaja, and two other arrays mentioned in other editions are Hawk shaped-syena and thunder shaped–Vajra according to suitability of time and place.

मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः।
चत्वारः प्रकृतिव्यूहा भेदास्त्वेषां प्रकीर्तिताः।।41।।

इदानीं संस्थानतो[2] व्यूहभेदांश्चतुर्दशभिः श्लोकैर्दर्शयति– मण्डल इत्यादि। एते च मण्डलादयश्चत्वारः स्वस्वभेदापेक्षया प्रकृतिव्यूहाः।।41।।

Prakriti vyuhas are considered by the wise are to be four-Mandala, Asmhata, Bhoga, and Danda.The intelligent ruler should plan his array of army considering the suitability of time and place.

(प्रकल्पिते भुजे व्यूहे यदङ्गमधिकं ततः।)

---

1. 'सेनावापः म की' ख-ग पाठः
2. 'के' ङ च पाठः

तिर्यग्वृत्तिस्तु दण्डः स्याद् भोगोऽन्वावृत्तिरेव[1] च।
मण्डलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः।।42।।

[2]एषां स्वरूपभेदमाह– तिर्यग्वृत्तिरित्यादि। [3]पक्षादीनां तिर्यग्वृत्तिर्दण्डः। भोगोऽन्वावृत्तिः, अनु समस्तानामनीकानामावृत्तिरन्योन्यानुगता वृत्तिर्भोगः सर्पशरीरवत्। मण्डलः सर्वतोवृत्तिः अनीकानां समन्ताद् वृत्तिर्मण्डलः। पृथग्वृत्तिरसंहतः। पृथग्ग्रहणमनीकसन्धेः पञ्चधनुः प्रमाणादपि विश्लेषतरार्थम्। विश्लिष्टतरानीकोऽसंहतः।।42।।

The special feature of the Danda vyuha is the angular projection of both its wings,-as bird flies, and that of Bhogavyuha is that its wings are shaped like the raised hood –bhoga of serpent, and that the vyuha arranged in semicircular composition –Ardhavrttireva. Mandala vyuha is almost a circular composition with attacking points on all sides. The composite array in which the different wings of the army charge simultaneously but separately is called Asamhata vyuha.

प्रदरो दृढकोऽसह्यश्चापस्तत्कुक्षिरेव च।
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ।।43।।
विशालविजयः सूची स्थूणाकर्णश्चमूमुखः।
[4]झषास्यो वलयश्चैव दण्डभेदाः सुदुर्जयः।।44।।

अनीकानामितरेतरासंहतत्वात् कः पुनरेषां भेद इत्याह– प्रदर इत्यादि। तत्र प्रदराद्या दुर्जयान्ताः सप्तदश दण्डभेदाः।।43-44।।

Different forms of Danda vyuha are pradara, Dradhaka, Asahaya, Capa or alternatively Capakukshi, Prathista, Suprathista, Syena, Vijaya, Sanjaya, Visalavijaya, Suci,

---

[1] 'व्या' ख पाठः
[2] 'ते' ङ पाठः
[3] 'त्या' च पाठः
[4] 'रथास्यो' ख पाठः

Sthanukarna, Camumukha, Sukahakyarasaya, balaya and sudrajya.

अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्यां कक्षपक्षतः।
अतिक्रान्तश्च पक्षाभ्यां त्रयोऽन्ये तु विपर्यये।।45।।

एषां यथाक्रमं लक्षणमाह– [1]अतिक्रान्त इत्यादि। तत्र पक्षकक्षोरस्यैः समं वर्तमानो दण्ड इति पक्षादयो यस्य [2]व्यूहस्योद्दिष्टाः, इयं तावद् दण्डप्रकृतिः। अस्याः प्रदरादयो भेदाः। अतिक्रान्तः कक्षाभ्यामिति सम्बन्धः। स एव दण्डः पुरोनिर्गतकक्षः प्रदरः। (तस्य प्रयोगः?) प्रतिक्रान्तः कक्षपक्षत इति सम्बन्धः। स एव दण्डः कक्षाभ्यां पक्षाभ्यां च प्रतिक्रान्तः[3] प्रविष्ट उरस्यमात्रेण निर्गतो दृढकः। अतिक्रान्तश्च पक्षाभ्यामिति। दण्ड एव पक्षमात्राभ्यां निर्गतोऽसह्यः। त्रयोऽन्ये तु विपर्यये इति। प्रदरादीनां त्रयाणां यथासङ्ख्येन विपर्यये चापश्चापकुक्षिः प्रतिष्ठश्चेति त्रयोऽन्ये ज्ञेयाः। तत्र प्रदरविपर्यये प्रतिक्रान्तकक्षश्चापसंस्थानत्वाच्चापः। दृढकविपर्यये कक्षाभ्यां पक्षाभ्यां चातिक्रान्त उरस्यमात्रेण प्रविष्टश्चापकुक्षिः। असह्यविपर्यये पक्षाभ्यां प्रतिक्रान्तो रेखाभूतशेषानीकः प्रतिष्ठसंज्ञको व्यूहो भवति।।45।।

The Dandavyuha may be arrayed to charge with the Kakasa wings or simultaneously with the Kaksa and Paksa wings or only with the paksa wings, then they will be designated as pradara, drdhaka andasahya respectively, failing which three alternative forms of array –viz. capa, Capakukshi and Prathista may be arranged.

पक्षोरस्यैरतिक्रान्तः प्रविष्टोऽन्यो विपर्यये।
स्थूणापक्षो [4]धनुःपक्षो द्विस्थूणो दण्ड ऊर्ध्वगः।।46।।

पक्षोरस्यैरतिक्रान्तः[5] प्रविष्टोऽन्यो विवर्यय इति। पक्षाभ्यामतिक्रान्तः उरस्येन

---

1. 'भि' ग-घ पाठः
2. 'स्योपदि' क-ख-च पाठः
3. 'न्त उ' ग-घ पाठः
4. 'न्वप' ख पाठः
5. 'भि' ग-घ पाठः

च प्रविष्टोऽन्यः (सु) प्रतिष्ठ इति। अन्यशब्दः काकाक्षिवदुभयत्र सम्बध्यते। अस्य सुप्रतिष्ठस्य विपर्यये अन्यः श्येनो ज्ञेयः। प्रतिक्रान्तपक्षो निर्गतोरस्यो मध्यकक्षश्च। स्थूणापक्ष इति स्थूणाकर्णो व्यूहः स्थूणेत्युच्यते। यथा देवदत्तो दत्त इति। स्थूणाकर्णस्य लक्षणं वक्ष्यति 'द्विगुणान्त्य' इति। स्थूणाकर्णाविव पक्षौ यस्य दण्डव्यूहस्य सोऽर्धतृतीयव्यूहसङ्घातः सप्तदशानीको विजयो नाम। धनुःपक्ष इति। [1]चापव्यूहावेव पक्षौ यस्य दण्डस्य स सञ्जयोऽर्धतृतीयव्यूह[2]सङ्घातस्त्रयोदशानीकः। द्विस्थूण इति। द्वौ स्थूणाकर्णावुपर्युपरि निविष्टौ चतुर्दशनीको विशालविजयाख्यो व्यूहः। उपर्युपरि निविष्टैः पक्षादिभिर्यो दण्ड ऊर्ध्वगो भवति स एवंलक्षणः सूचीसंज्ञको व्यूहः।।46।।

Another alternative form –Suprathista is advancing the paksa wings and supported by the Kaksha wings in depth, attacking with the urasya unit. Failing the next alternative – syena may be adopted or it may be Sthanupaksha- or Vijaya in which both wings are strengthened with three units or Dhanujh paksha or sanjaya in which wings are arranged in the shape of bows. or dvisthana or visalavijaya with wings doubly strengthened or Danda-Urdhaga or Suci Arrayed pointedly in the form of staff or a needle.

[3]द्विगुणान्त्यस्त्र्यभिक्रान्तपक्षोऽन्योऽस्य विपर्यये।
द्विचतुर्दण्ड इत्येते ज्ञेया लक्षणतः क्रमात्।।47।।

द्विगुणान्त्य इति द्विगुणावन्त्यौ पक्षौ यस्य दण्डव्यूहस्य स स्थूणाकर्णो नाम। व्यभिक्रान्तपक्ष इति। त्रयस्त्रयोऽभिक्रान्ताः पक्षा यस्य दण्डस्य स चतुर्गुणपक्षः एकादशानीकश्चमूमुखसंज्ञः। अन्योऽस्य विपर्यये। प्रतिक्रान्तपक्षोऽन्यो झषास्यो नाम व्यूहः। सोऽप्येकादशानीकः। द्विचतुर्दण्ड इति। दण्डग्रहणं प्रत्येकं योज्यम्। द्वौ दण्डव्यूहावेकादशानीको वलयो नाम। चतुर्दण्डो विंशत्यनीको दुर्जय इति दण्डभेदा निर्दिष्टा इति।।47।।

---

[1] 'धनुर्व्यूहौ प' ग-घ पाठः

[2] 'हस्त्र' ग-घ पाठः

[3] 'स्त्वतिक्रा' मूलकोशेषु पाठः

When the prominent ends of paksas are doubled it is sthunakarna, when trebled it is camumukha, and the latter when reversed it is rasasya.With double or fourfold Danda formation it is balaya or durjaya.

गोमूत्रिकाहिसारी[1] च शकटो मकरस्तथा।
भोगभेदाः समाख्यातास्तथा[2] परिपतन्तिकः।।48।।

भोगव्यूहभेदानाह– गोमूत्रिकेत्यादि। [3]पक्षादिविषमं वर्तमानो भोगः। तत्र गोमूत्रमार्गप्रतिच्छन्दो गोमूत्रिका। सर्पसृतिप्रतिच्छन्दोऽहिसारी। तयोर्यौगिकेन नाम्ना निर्देशादेव [4]लक्षणमप्युक्तं वेदितव्यम्।।48।।

Different variations of Bhogavyuha are gomutrika, Ahisari, Sakata, makara and paripatatantaka- Gomutrika is that which takes the shape of flowing urine of cows, and ahisari reflects the serpentine movement.

दण्डपक्षो युगोरस्यः शकटस्तद्विपर्यये।
मकरो [5]व्यवकीर्णश्च शेषः कुञ्जरवाजिभिः।।49।।

शेषाणां लक्षणमाह– दण्डपक्ष इत्यादि। शकटसंस्थानस्य विवक्षितत्वादूर्ध्वराजी अत्र दण्डो ग्राह्यः। तथाच पक्ष इति पक्षकक्षयोः सामान्येन ग्रहणम्। यस्य पौर्वापर्य्रेण दण्डवदवस्थितौ कक्षपक्षौ। युगोरस्यः द्विगुणोरस्यः शकटः। तद्विपर्यये मकरः तद्विपरीतसंस्थान इत्यर्थः। द्वावप्येतौ षडनीकौ। व्यवकीर्णश्च[6] शेष इति हस्त्यादिभिरावापैः [7]मध्येऽवकीर्णः शकटो मकरो वा व्यूहः। शेषः परिपतन्तिको नाम व्यूहः। [8]सचस्पष्टात्र दर्शितः।।49।।

---

[1] 'कार्द्धराजी च' ख पाठः
[2] '(तो ? तः) परिपतन्तकः' क पाठः
[3] 'दिभिर्विष' ग-घ पाठः
[4] 'णंघे' क-ख पाठः
[5] 'प्यवकर्णी च' ख पाठः
[6] 'ति' ग-घ पाठः
[7] 'ध्ये व्यतिकी' ग-घ पाठः
[8] 'तु स्फुटत्वा' क-ख पाठः

When the wings –kasas and paksas are arranged like dandas, with the double units of Urasya-middle it is sakata or chariot shaped vyuha, and in the reverse order –i.e. double units of urasya at the base, it is makaravyuha, and the last one the paripatantaka vyuha is a form of makaravyuha, the central part of which is strengthened by concentration of units of elephants and of cavalary forces.

मण्डलव्यूहभेदौ च सर्वतोभद्रदुर्जयौ।
अष्टानीको द्वितीयस्तु प्रथमः सर्वतोमुखः।।50।।

मण्डलव्यूहभेदावाह– मण्डलेत्यादि। अष्टानीको द्वितीयस्तु प्रथमः सर्वतोमुख इति। पक्षादीनां मण्डलवृत्तिरचनया सर्वतोवृत्तिर्मण्डलः। तत्र बहिर्मुखत्वेनावस्थितः स[1]र्वतोमुखः सर्वतःसैन्यः सर्वतोभद्रः। स एव यत्रयत्र भयातिशयस्तत्रतत्र द्विगुणमुरस्यं कल्पयित्वा तद्वत् कक्षयोश्च द्वैगुण्यादष्टानीको [2]दुर्जयसंज्ञः[3]। ननु[4] च सर्वतोभद्रेण यायाद् (स० 19. श्लो० 49) इत्युक्तम्। तत् कथं पार्श्वतः[5] पुरतो गम्यत इति। उच्यते। सर्वतोभयागमनवेलायामस्य सर्वतोमुखत्वम्। यानवेलायां[6] तु तद्विधसंस्थानानामेव[7] यातव्यमार्गाभिमुखता भविष्यति।।50।।

Mandala vyuhas are of two types Sarvathobadra and durjaya, the first one is provided with mukhas or attacking points on all sides of the vyuha and the special features of the second one –durjaya is that it is eight pronged –astanika – double units is each of the two kakshas and two paksas or spearheaded by war elephants-Gajanika.

अर्धचन्द्रक उद्धानो वज्रो भेदास्त्वसंहते।
तथा कर्कटशृङ्गी च काकपादी च गोधिका।।51।।

---

1. 'विश्वतो' क-ख पाठः
2. 'यः ननु' ग-घ पाठः
3. 'ज्ञः। सच तथा लेखनी यः। न' क-ख पाठः
4. 'नु स' क-ख पाठः
5. 'पश्चात् पार्श्वगतः पु' ग-घ पाठः
6. 'त्रा' ग-घ पाठः
7. 'नमे' क-ख पाठः

असंहतभेदानाह– अर्धचन्द्रक इत्यादि। भेदास्त्वसंहत इति। असंहतव्यूहेऽर्धचन्द्रादयो भेदा ज्ञेया इति सम्बन्धः। तथेति। यथार्थचन्द्रादयो ऽसंहतव्यूहभेदाः, तथा कर्कटशृङ्ग्यादयोऽपीति॥51॥

Ardhacandraka, Uddhana or udyanaka and vajra are the varieties of asmahata vyuha and so also Kukkutasrngi or karkatasringi, Kakapadi and Godhika.

त्रिचतुःपञ्चसैन्यानां ज्ञेया आकारभेदतः।
इति व्यूहाः समाख्याता व्यूहभेदप्रयोक्तृभिः॥52॥

अर्धचन्द्रादित्रयेण सह कर्कटकशृङ्ग्यादीनां त्रयाणां यथाक्रमं सैन्यसाम्यं दर्शयति–त्रिचतुःपञ्चसैन्यानामाकारभेदत इति। त्रयाणामनीकानां तदाकृतिसंस्थानादर्धचन्द्रः कर्कटकशृङ्गी च, चतुर्णामुद्धानकः काकपादी च, पञ्चानां वज्रो गोधा चेष्येषां[1] क्रमः। तत्र कक्षाववस्थाप्य समधिकोरस्यस्य मध्येन किञ्चिदन्तः प्रवेशाद् द्वयोश्च पक्षयोः किञ्चिदतिक्रमात् त्रयाणामनीकानां प्रवेशनिर्गमापेक्षयार्धचन्द्रसंस्थानत्वादर्धचन्द्रकः। एवम् एकेनोरस्येन प्रविश्य द्वाभ्यां[2] कक्षाभ्यां यथावस्थितयोरेव पक्षयोर्द्विगुणीकरणादिति[3] त्रयाणां प्रवेशवशात्[4] कर्कटकशृङ्गी, तत्संस्थानत्वात्। कक्षयोः पक्षयोश्च कोणस्थयोर्मध्य-स्थितेनोरस्येन [5]यथास्थितेन[6] सहोभयतो [7]रचनाविशेषाच्चतुर्णामनीकानां [8]प्रवेशानिष्कासादुद्धानकसादृश्यादुद्धानः। मध्ये उरस्यमवस्थाप्य पार्श्वयोर्द्वयोरु-पर्यधस्ताच्च क्रमात् प्रसारितकक्षपक्षत्वाच्चतुर्णामनीकानां प्रसारणवशात् काकपदसंस्थानत्वाच्चतुःशाखा काकपदी। पञ्चानामनीकानामाकृतिसंस्थानाद् [9]वज्रो गोधा च। तत्र संस्थानानि

---

[1] 'ति क्र' ग-घ पाठः
[2] 'द्वयोः पक्षयोस्तथा तयोर्द्विगुणी' ग-घ पाठः
[3] 'तिव्यवसितव्यः' ग-घ पाठः
[4] 'शाभावात्' क-ख पाठः
[5] 'था च स्फीते' ग-घ पाठः
[6] 'नोभ' ग-घ पाठः
[7] 'षादिति चतु' ग पाठः
[8] 'शनि' ग-घ पाठः
[9] 'ततो गो' ग-घ पाठः

[1]त्रीणि त्रिकानि हस्तिनामुरस्यः, ततः क्रमाच्चत्वारः [2]पञ्च च हस्तिनः, तेषां द्वयोर्द्वयोश्च परत[3] एकैकम्। ए(के ? ते) त्रयस्त्रयः शाखास्थानीया[4] इत्युभयतःपक्षो वज्रसंस्थानत्वाद् वज्रः। [5]तथैवोरस्यकक्षौ चावस्थाप्य[6] मध्यतो गोधाया द्वौ त्रीन् द्वौ [7]शिरस्येकमेकं जिह्वास्थानीयं न्यस्येदिति मुखतः पक्षतः एकं द्वौ त्रीण्येकमिति पादपुच्छतः तन्मध्ये [8]पञ्चपुच्छोऽयमिति पक्षोऽयं गोधासंस्थानाद् गोधाव्यूहः।।52।।

Varity of shapes of Asmahata vyuhas depends on whether it is three –branched or four branched or five branched. These are the different forms of Vyuhas, according to experts in the technology of Vyuhas.

[9]ऐते सप्तदश प्रोक्ता दण्डव्यूहास्तु भेदतः।
तथा व्यूहद्वयं चैव मण्डलस्य समासतः।।53।।
असंहतास्तु षड् व्यूहा भोगव्यूहास्तु पञ्चधा।
व्यूहज्ञैस्ते प्रयोज्याः स्युर्युद्धकाल उपस्थिते।।54।।
श्येनः सूचीमुखो वज्रः शकटो मकरोऽम्बुजः।
इत्यादयः स्मृता व्यूहास्तदाकारान् प्रकारयेत्।।

इदानीं व्यूहानां सङ्ख्यापूर्वकं नियोगं दर्शयति– एत इत्यादि। सप्तदश[10] प्रकृतिव्यूहेन सहाष्टादश।।53।।

युद्धकाल इति प्रकाशयुद्धकाले।।54।।

---

1. 'णिह' ग-घ पाठः
2. 'श्च हस्तिनां पक्षाद् उभयतस्तत्र हस्तिनः' ग-घ पाठः
3. 'तः शाखासंस्था' ग-घ पाठः
4. 'यास्त्रयस्त्रयः कृत्वोभ' ग-घ पाठः
5. 'स्यः कक्षो वाव' ग-घ पाठः
6. 'प्य तन्मध्यत एव त्रीन् शि' ग-घ पाठः
7. 'सैकमेकं च जिह्वासंस्थया न्य' ग-घ पाठः
8. अपुच्क पतौ अयं ग-घ पाठः
9. 'इति' मूलकोशेषु पाठः
10. 'श प्रोक्ताः' ग-घ पाठः

There are seventeen varities of dandavyuha two of mandala vyuha, six of asmahata vyuha, and five of Bhogavyuha –a total of three varities. The ruler, conversant with vyuha formations, should array his army –as necessary in consideration of the advantages of time and place, when war breaks out.Syena, suci-mukha, vajra, Sakata, and Makara are the vyuhas that are designed according to their respective forms and features.

इति व्यूहविकल्पो नाम पञ्चत्रिंशं प्रकरणम्

षट्त्रिंशं प्रकरणम्

प्रकाशयुद्धप्रकरणम्

(The conduct of open war)

पक्षादीनामथैकेन हत्वा शेषैः परिक्षिपेत्।
उरसा वा समाहत्य कोटिभ्यां परिवेष्टयेत्।।55।।

युद्धकाल इत्युक्तत्वात् तदिदानीं प्रकाशयुद्धं सप्तभिः श्लोकैर्दर्शयति-पक्षार्दानामित्यादि। अथेत्यनीकप्रकरणप्रस्तावार्थम्। एकानीकेन परव्यूहं हत्वा शेषैरनीकैः परिक्षिपेत्। उरसा वा उरस्येन। कोटिभ्यां प्रपक्षाभ्याम्।।55।।

Penetrating -the enemy formation with either paksa –wing of the army, and consolidating his central uras, the vijigisu should throw –employ the rest of the units to attack and besiege the enemy ranks with his koti units.

[1]परकोटी समाक्रम्य पक्षाभ्यां सप्रतिग्रहः।
कोटिभ्यां [2]जघनं हन्यादुरसा च प्रपीडयेत्।।56।।

परकोटी परव्यूहस्य प्रपक्षौ पक्षाभ्यामाक्रम्य जघनं प्रोरस्यं प्रतिग्रहकोटिभ्यां [3]हन्याद्, उरसा च प्रपीडयेद्, जघनम्। एतेन च तदुभयं तदुभयपीडनेन भिद्यते।।56।।

Charging the outer flanks –parakoti by both the paksa units without disturbing his pratigraha -the reserve unit at the rear, or along with the his reserve unit-saprathigrahahoh, he should assail the rear flanks and bring pressure on the central part-of the enemy vyuha in order to force them to surrender.

---

1. 'प्रतिकोटी' ख-ग पाठः
2. 'यि' ख-ग पाठः
3. 'भिन्द्याद्' ग-घ-ङ-च पाठः

(एवं व्यूह्य प्रयत्नेन यत्नवान् पृथिवीपतिः।
विदारयेद् व्यूहकृतैर्बलैर्विद्विषतो बलम्।।)
यतः फल्गु यतो भिन्नं यतो दूष्यैरधिष्ठितम्।
ततो रिपुबलं हन्यादात्मनश्चोपबृंहयेत्[1] ।।57।।

यत इति। यस्मिन् परव्यूहस्य भागे। फल्गु असारम्। भिन्नं कृतोपजापं, विश्लिष्टन्यासं वा। दूष्यैः क्रुद्धलुब्धादिभिः। ततस्तस्मिन् भागे। आत्मनश्चोपबृंहयेद् बलं, [2]पराघातप्रतिषेधार्थम्।।57।।

An energetic ruler should carefully array his forces to crush the forces of the enemy.

सारं द्विगुणसारेण फल्गु सारेण पीडयेत्।
संहतं च गजानीकैः प्रचण्डैर (वधा? पसा) रयेत्।।58।।

फल्गु बलं सारेण पीडयेदिति सम्बन्धः। संहतं दुर्भेद्यम्।।58।।

Where the enemy's troops are weak, separated, led by vicious persons, there it should be assailed—and thus a king's own strength should be added to.

दुर्जयान् करिणः सिंहवसासिक्तैर्मतङ्गजैः।
आहन्यात् करिणीनां वा समूहैः साध्वधिष्ठितैः।।59।।

सिंहवसासिक्तैः क्षान्तिपूर्वकम्[3]। साध्वधिष्ठितैः निषुणयोधाधिष्ठितैः।।59।।

The enemy should be pressed by doubly strong forces,—and he should be opposed when united together, by furious detachments of elephants by covering lion skin.

सलोहजालैर्दृढबन्धदन्तैः सुकल्पितैरूर्जितपादरक्षैः।
[4]प्रवीरयोधैर्मददुर्निवारैर्हन्याद् गजेन्द्रैर्द्विषतामनीकम्।।60।।

---

1. 'मादये' क पाठः
2. 'रघात' ग-घ-ङ पाठः
3. 'र्वम्' क-ख पाठः
4. 'र्महागजैः' क पाठः

सलोहजालैः आवरणैः [1]लोहस्थगितैः शस्त्रिभिर्वा। पादरक्षाः पादगोपाः प्रतियोद्धारः।।60।।

Unconquerable elephants (of the enemy) should be slain by elephants besmeared with the fat of lions or by groups of elephants ridden by brave guides.

एकोऽपि वारणपतिर्द्विषतामनीकं
[2]युक्तं निहन्ति मदसत्त्वगुणोपपन्नः।
नागेषु हि क्षितिभृतां[3] विजयो निबद्ध-
स्तस्माद् गजाधिकबलो नृपतिः सदा स्यात्।।61।।

एकोऽपि, किं पुनर्बहवः। गुणो विनयाधानम्। नागेषु हि विजयो निबद्ध इति सेनाया हस्तिनः प्रधानमङ्गमिति दर्शयति।।61।।

The troops of the enemy should be slain by foremost of elephants duly equipped, furious, caparisoned with iron networks, ridden by brave warriors, and irresistible in consequence of being in rut.

इति प्रकाशयुद्धं नाम षट्त्रिंशं प्रकरणम्

इति कामन्दकीयनीतिसारे गजाश्वरथपत्तिकर्माणि, पत्त्यश्वरथगजभूमयः,
दानकल्पना, व्यूहविकल्पः, प्रकाशयुद्धं नाम विंशः सर्गः।

---

[1] 'स्थितैः' क पाठः

[2] 'व्य' क पाठः

[3] 'भुजां वि' क पाठः

Glossary

अ

अंसपथ m. A land route, an overland route

अंसभार m. A load carried on the shoulders or back by a person,

अकरद a. Exempted from taxes

अकर्मण्य a. Unable to work, unfit for work

अकृत a. (1) Not made arable, undeveloped (2) Not established, not current

अकृतप्रवेश a. Not permitted to enter

अकृत्य a. Not likely to be seduced from loyalty, not liable to be traitorous

अकोपक n. A disinclination to revolt

अकोप्य a. Not deserving to be condemned or rejected

अक्ष m. (1) The number five and its multiples (com.) (2) A weight (=16 māṣa-scom.)

अक्षण m. (Movement during) the prohibited period of the night fine for movement during the prohibited period of the night

अक्षपटल n. The records and audit office

अक्षशाला f. A workshop for the manufacture of gold and silver articles

अग्निष्ठ n. A fire-place, an oven

अग्र n. Total, the total number or amount

अग्राह्य a. Not to be seized or arrested beyound reach, unassailable n. An unasailable position,

अघात m. Prohibition of slaughter (of anmals)

अङ्क m. The lap, i.3. side, proximity अङ्कमुपास्थित Come within one's reach, अङ्केकृ To bring within one's reach to take into custody, to seize अङ्के प्रह To strike when within one's power

अङ्गविद्या f. The science of (interpreting the signs or movements of) the body

अङ्गुष्ठसंदंश m. The thumb and the middle finger, forming a pair of tongs. (Cb Cp)

अजस्र a Constantly in demand (com.)

अजात्य a (1) Illegitimate, (2) Spurious, counterfeit

अञ्चन n. Bending (of the body)

अञ्जनी f. A container for eyesalve

अट्टालक m. A tower on the parapet, a watch-tower

अणि, अणिद्वार, अणिहर्म्य See आणि, आणिद्वार, आणिहर्म्य

अतजात a Not of a particular class or kind

अतिकर्षण n. Encroachment (on the road) by ploughing reducing the width of the road (Cb)

अतिक्रान्त a (1) Passed over, put off (2) Gone to, suread over (3) Marching out

अतिगत a Gone to

अतिचार m. Transgression (of marital duties), misconduct in general (title)

अतिनयन n. Conveying (of troops, secret agents etc.) secretly, smuggling

अतिनी 1P. (1) To smuggle, to bring in, to lead in(2) To direct

अतिपत्ति f. Passing, lapse

अतिपातन n. Passing, missing

अतियाञ्चा a. Making an exorbitant demand

अतिलब्ध a. Treated with great severity, heavily chastised

अतिवह् caus. To proceed with (a case), to dispose of (a case)

अतिवाद m. (1) Excessive praise(2) Reproof, reprim and

अतिशय m. A. special favour

अतिसंधा 3U. To over-reach, to outwit, to cheat et passim.

अतिसंधि m. An over-reaching pact, a pact more advantageous to oneself

अतिसर्ग m. (1) Giving up, surrender (2) Granting permission, allowing

अतिसारण n. Taking into (foreign territory). smuggling

अतिहृ 1P. To throw out or dismiss (a suit)

अत्यय m. (1) Penalty, etc. (2) Tribute

अत्यराल m. An elephant beyound the stage of rutting

अत्यावाप m. Infiltration of traitorous elements

अत्यासद् caus. To encounter, to assail, to attack

अत्याहित a Rash, daring

अत्याहृ caus. To over-tax, to extort money from

अत्युष्णोपक्षीण a. In which excessive heat has subsided

अदितिकौशिक m. A sect of religious mendicants begging in the name of a deity whose flag they carry

